३२
२४९

अथस्कंदपुराण द्वितीय खंड २ प्रारंभः ॥ श्री ॥

श्रीगणेशायनमः श्रीगुरुभ्योनमः श्रीसरस्वत्यैनमः श्रीमुनयऊचुः दक्षिणार्णवतीरेतुयानितीर्था
निपंचच ताब्रूहिविशालाक्षवर्णयंस्तितानिच सर्वतीर्थफलंयेषुनारदाद्यावदंतिच तेषांचरितमा
हत्म्यंश्रोतुमिच्छामहेवयं उग्रश्रवाउवाच शृणुध्वमस्वद्भुतपुण्यसत्कथंकुमारनाथस्यमहाप्रभा
वं द्वैपायनायन्ममन्चाहपूर्वंहर्षाश्रुसमाकुमचर्चितांगः कुमारनाथगीतान्नश्रूयतांमुनिसत्तमाः
यासर्वदेवैमुनिभिःपितृभिश्चप्रपूजिता साध्वाचारःस्तंभतीर्थंयोनिषेवेतमानवः नियतंतस्यवा
सःस्याद्ब्रह्मलोकेयथाममब्रह्मलोकाद्विष्णुलोकस्तस्मादपिशिवस्यच पुत्रप्रियत्वात्तस्यापि
गुहलोकोमहत्तमः अत्राश्चर्यकथायाचफाल्गुनस्यपुरेरिता नारदनमुनिश्रेष्ठस्तावांवक्ष्यामिवि
स्तरात् पुरानिमित्तेकस्मिंश्चित्किरिटीमणिपूरतः समुद्रंदक्षिणंभ्यागातस्नातुंतीर्थानिपंचसः व
र्जयंतिसदायानिभयात्तीर्थानितापसाः कुमारेशस्यपूर्वंचतीर्थमस्तिमुनेःप्रियं स्तंभेशस्यद्वितीयंच
सौभद्रस्यमुनेप्रियं॥ वर्केश्वरंमन्यच्चपौलोमिप्रियमुत्तमं चतुर्थंचमहाकालंकरंधमनृपप्रियं भ
रद्वाजस्यतीर्थंचसिद्धेशाख्यंहिपंचमं एतानिपंचतीर्थानिदृष्टोदेगुरुपुंगवः तपस्विभिर्वर्जितानिम

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

 हापुण्यानि तानि च दृष्ट्वा पार्थो नारदादिकान्पूर्वतमहामुनीन् तीर्थानीमानि रम्याणि प्रभावा
द्भुतवंतिच किमर्थं त्वतवर्ज्यंते सदैवब्रह्मवादिभिः तापसा ऊचुः ग्राहाः पंचवसंत्येषु हरंतिचतत्
२ पोधनान् अतएतानि वर्ज्यंते तीर्थानि कुरुनंदन इति श्रुत्वा महाबाहुर्गमनाय मनो दधे ततस्तं ताप
साः प्रोचुर्गंतुं नार्हसि फाल्गुन बहवो भक्षिता ग्राहै राज्ञा नो मुनयस्तथा तत्वं द्वादशवर्षाणि तीर्थाना
मर्बुदेष्वपि स्नातः किमेतैस्तीर्थैस्त्वमापतंगवत्लोभव अर्जुन उ॰ यदुक्तं करुणासारैः सारंकिलदिहोच्य
तां धर्मार्थामनुज्ञायश्च न सर्वार्थामहत्त्वमिभिः धर्मकामं हि मनुजं यो वारयति मंदधीः तदाश्रितस्य
जगतो निःश्वासे भस्मसाद्भवेत् यज्जीवितं चाचिविद्युत्तरांशुसमानक्षणभंगुरं तच्चधर्मकृते यातियाति
लोपास्तिकानतु जीवितं च धनं दाराः पुत्राः क्षेत्राणि गृहाणि च यांति येषां धर्मकृते तएव भुवि मानजः ताप
सा ऊचुः एवं ते ब्रुवतः पार्थ दीर्घमायुः प्रवर्धतां सदा धर्मरतिर्भूयाद्याहि स्वं कुरु वांछितं एवमुक्तः प्रण
म्य तानात्रीर्भिरभिसंस्तुतः जगाम तानि तीर्थानि द्रष्टुं भरतसत्तमः ततः सौभद्रमासाद्य महर्षेस्तीर्थमु २
त्तमं विगाह्य तरसा वीरः स्नानं चक्रे परंतपः अथ तं पुरुषव्याघ्रमंतर्जलचरो महान् निजग्राह जले ग्राहः

कुंतीपुत्रं धनंजयं तमादायैव कौंतेयो विस्फुरंतं जलेचरं उदतिष्ठत महाबाहुर्बलेन बलिनां वरः उद्धृतस्तु
तदा ग्राहः सोर्जुनेन यशस्विना बभूव नारी कल्याणि सर्वाभरणभूषिता दीप्यमानाश्रियाविप्रादिव्य
रूपा मनोरमा तदद्भुतं महद्दृष्ट्वा कुंतीपुत्रो धनंजयः तां स्त्रियं परमप्रीतामिदं वचनमब्रवीत् कावै त्व
मसि कल्याणि कुतो वा जलचारिणी किमर्थं च महत्पापमिदं कृतवती ह्यसि नार्युवाच अप्सरा ह्यस्मि कौं
तेय देवारण्यनिवासिनी इष्टा धनपतेर्नित्यं वर्चा नाम महाबलं मम सख्यश्च तस्यान्याः सर्वाः कामगमाः शु
भाः ताभिः सार्धं प्रयातास्मि देवराजनिवेशनात् ततः पश्यामहे सर्वा ब्राह्मणं नाविकेतकं रूपवंतमधी
यानमेकमेकांतचारिणं तस्यैव तपसा वीर तद्वनं तेजसावृतं आदित्य इव तं देशं कृत्स्नमेवावभासयत्
तस्य दृष्ट्वा तपस्तादृक् रूपं चाद्भुतदर्शनं अवतीर्णास्मितं देशं तपोविघ्नचिकीर्षया अहं च सौरभेयी च
सामयी बुद्बुदा लता योगपद्येन तं विप्रमभ्यगच्छाम तारत गायंत्यो लसमानाश्च लोभयंत्यश्च तं द्विजं
सचनास्मासु कृतवान्मनो धीरः कथंतन नाकंपत महातेजाः स्थितस्तपसि निर्मले सास्मान्कुपितोस्मा
सु ब्राह्मणः क्षत्रियर्षभ ग्राहभूता जले यूयं भविष्यथ शतं समाः तेनावयं प्रव्यथिताः सर्वाभरणसत्तमा

स्कं०पु०२ आयाता शरणं विप्रं तपोधनमकल्मषं रूपेण वयसा चैव कंदर्पेण च दर्पिताः अयुक्तं कृतव
त्यस्मक्षंतुमर्हसि नो द्विज एष एव च धास्माकं सपर्यास्तु तपोधन यद्वयं शंसितात्मानं प्रलोब्धु
३ स्त्वामुपागता अवध्याश्च स्त्रियः सृष्टा मन्यते धर्मचिंतकाः तस्माद्धर्मेण धर्मज्ञ एष वादो मनीषिणां
शरणं च प्रपन्नानां शिष्टाः कुर्वंति पालनं शरण्यं त्वां प्रपन्नास्मा तस्मात्वं क्षंतुमर्हसि एवमुक्तस्तु ध
र्मात्मा ब्राह्मणः शुभकर्मकृत प्रसादं कृतवान्भूरिरविसोमसमप्रभः ब्राह्मण उवाच भवतीनां
शरीरेण परिमृद्यामि चेतसि अहो धार्ष्ट्यमहो मोहो व्यवसायप्रवर्धनं मस्तकस्थायिनं मृत्युं यदि प
श्यदयं जनः ओ हे रोपि न रोचते किमुताकार्यकारिता अहो मानुष्यकं जन्म सर्वजन्मसु दुर्लभं
तृणवत्क्रियते कैश्चिद्योषिमुद्धैर्दुराधरैः तान्ययं समदृष्ट्वा मो जनिर्वे किं निमित्तमः कोवा ऊर्मो वि
चार्यैतन्मनसा सह मान्यतां नवै तापरिनंदामो जनिर्याभ्यप्रवर्तते केवलं तास्त्रिनिंदामो यच्चता
सुरनिर्गलाः यतः पद्मभुवा सृष्टं मिथुनं विश्ववृद्धये तत्तथा परिपाल्यं वै नास्ति दोषोस्ति कश्चन ३
या वांधवैः प्रदत्ता स्याद्वन्हि द्विज समागमे — गार्हस्थ्यापनं धन्यं तया साकं हि सर्वदा यथा प्रकृति पुंयो

र्योगो योयत्नेनातिपरस्परं साध्यमानो गुणाय स्यादगुणायाप्यसिद्धितः एवं यत्नात्साध्यमानं स्वकं
गार्हस्थ्यमुत्तमं गुणाय महते भूयादगुणायाथ साधितं पुरि पंच मुखश्चास्य एकादश भटाश्च युतः
साकं भार्यो बहूयसा सकथं स्यादचेतनः यश्च स्त्रियासमायोगः पंचयज्ञादिकर्मभिः क्रियायत्र
तबैस्सृष्टो मृदेहो साध्यतेऽन्यथा अहो शृणुध्वं नो चेद्भूः भ्रूश्रूषा जायते शुभाः तथापि बाहुमुखोरा
रूयामः श्रेणोतिकः षट्धातुसारं तद्वीर्यं समानां परिहाय च विनिक्षिपकुर्यानौ तु तस्यैदं प्रोक्तवा
नयमः प्रथमं चौषधीद्रोग्धा आत्मद्रोग्धा ततः पुनः पितृद्रोग्धा विश्वद्रोग्धा यास्य संधं त्वाश्वतीः स
माः मनुष्यं ति तरो देवा मुनयो मानवास्तथा भूतानि चौपजीवंति तदर्थं नियता भवेत वच सामन
सान्वे च जितेन्द्र्याकरश्चात्रैकैः दांतमाकुर्हं ततीर्थकाकतीर्थमतः परं काकप्रायेन रैयस्मि नरमंतेता
मसा जनाः हंसोपमितदेवानां कोर्थस्तेन विचिंतयतां एवं विधं हि विश्वस्य निर्माणं स्मरतां हृदि अ
पि कृतत्रिलोक्याश्च कथं पापरमेनमतः तदिदं न्यमर्त्यानां शास्त्रदृष्टमहो स्त्रियः यभ्लोकमयाद्दृष्टं
मुत्क्षिप्रत्यक्षतः कथं भवतीपुच्चकः पोक्ता येय दर्थं हि निर्मिताः तत्तमर्थं प्रकुर्वंति सस्समस्तु चेमवच

स्कं०पु०२ ज्ञातंसहस्रंविश्वेचसर्वमक्षयवाचकं परिमाणंज्ञातंलवनेतदक्षय्यवाचकं यदाचवोग्राहभूता गृ
ह्णातिपुरुषाजले उत्कर्षतिजलात्कश्चित् स्थलंपुरुषसत्तमः यदायूयंपुनःसर्वाःस्वरूपंप्रतिपत्स्यथ आ
४ मत्कंनोक्तपूर्वंमेहसतापिकदाचन कल्याणश्चकुसंस्पृष्टश्शुद्धिस्तद्वदुराहिवः नार्युवाच ततोभिवाद्यतं
विप्रंकृत्वाचैवप्रदक्षिणं अर्चितयामोपस्पसतस्माद्वयात्सुदुःखिताः क्वनुनामवयंसर्वाः कालेनाल्पेन
तंनरंसामागच्छेमयेनस्वंरूपमापादयेसुनः तावयंचिंतयित्वेहमुहूर्तादिवभारत दृष्टवत्योमहाभागं
देवर्षिमथनारदं सर्वाहृष्टाःस्मतद्दृष्ट्वादेवर्षिममितद्युतिं अभिवाद्यचतंपार्थस्थितास्मोव्यथिताननाः
सनोपृच्छद्दुःखमूलमुक्तवत्योवयंचतं श्रुत्वातच्चतथातत्त्वमिदंवचनमब्रवीत् दक्षिणसागरेनूपेपं
चतीर्थानिसंतिते पुण्यानिरमणीयानितानिगच्छतमाचिरं तत्रस्थापुरुषव्याघ्रःपांडवोधनंजयः
मोक्षयिष्यतिशुद्धात्मादुःखादस्मानसंशयः तस्यसर्वावयंवीरश्रुत्वावाक्यमिहागताः त्वमिदंसत्यव ४
चनंकर्तुमर्हसिपांडव त्वद्विधानांहिसाधूनांजन्मदीनोपकारकं श्रुत्वेतिवचनंतस्याःसस्नौतीर्थेष्व
नुक्रमात् ग्राहभूताश्चोज्जहारयथापूर्वासपांडवः ततःप्रणम्यतावीरंप्रोच्यमानाजयाशिषः गंतुंरु

ताभिलाषिन्य माहपार्थोधनंजयः एषमेहृदिसंकल्पःसुहृदःपरिवर्तते कस्माद्वोनारदमुनिर्नतुजान
नसंशयः सर्वःकोप्यतिदीनोपिस्वपूज्यस्यार्थसाधकः स्वपूज्यतीर्थवासंप्रोक्तवान्नारदःकथं तथे
यनवदुर्गास्सुसतीषतिवलास्तुच सिद्धेशसिद्धगणपश्चापिवोत्तिस्थितिकथं एकैकएषांशक्तोहि अ
पिदेवानभिवारितुं तीर्थसंरोधकारिण्यः सर्वानावारयत्कथं इतिचिंतयतेमह्यंमन्येदोलायतेमनः मह
न्मेकौतुकंजातंसत्संवावक्तुमर्हथ अथसरज० योग्यपृच्छसिकौंतेयपुनःपर्यात्तरांमुखं एषस्वविप्रैरभि
संवृतार्थोमुनिःसमायातितथेतिनारदः सर्वेहिपृच्छतवचैषवक्ताप्रोक्तोवमाकान्तलंगतस्ताः इति
श्रीस्कंदपुराणेकुमारिकाखंडेप्रथमोध्यायः १ श्री सूतउवाच ततोद्विजंपरिवृतंनारदंदेवपू
जितं अभिगम्योपजग्राहसर्वानार्यःपृथक्पृथक् ततस्तंनारदःप्राहजयारातिधनंजयः धर्मेभवतुतेबु
द्धिर्देवेषुब्राह्मणेषुच कच्चिद्दत्तामहायात्रावर्षिकी आचरेनखिद्यसेनेवमथिवाकुप्यसेन
च मुनिनामपिचेतांसितीर्थयात्रासुपांडव खिद्यंतिपरिकुप्यंतिश्रयसांविधुमूलतः कच्चिन्नेतेनदोषे
णसमाश्लिष्टोसिपांडव अत्रवांगीरसांगीतांगाथामेतांहिशुश्रुमः यस्यहस्तौचपादौमनश्चैवसुसंयतं

स्कं०पु०२ निर्विका याः क्रियाः सर्वाः स तीर्थफलमश्नुते तदिदं हृदि धार्यं ते किं लालं तातमन्यसे भ्राता युधि
ष्ठिरो यस्य सखा यस्य स केशवः पुनरेतत्समुचितं यद्धर्मः क्षिप्तं नृणां वयं हि धर्मगुरवः स्था
५ पितास्तेन विष्णुना विष्णुना चात्र श्रृणु मे गीतां गाथां द्विजान्प्रति यस्यामलामलयशः श्रवणा
वगाह सद्यः पुनाति जगदाश्वपचाद्विकुंठः साहं भवद्भिरुपलभ्य सुतीर्थकीर्तिं छिंद्यां स्वबाहु
मपि वः प्रतिकूलवृत्तिं प्रियं च पार्थ ते ब्रूमो येषां कुशलकामुकः सर्वे कुशलिनस्ते च यादवाः पां
वस्तथा अधुना भीमसेनेन कुरूणामुपतापकः शासनाद्धृतराष्ट्रस्य वीरवर्मा नृपाहतः स हि
राज्ञामजेयोऽभूद्यथा पूर्वं बलिर्बली कंटकं कंटकेनैव धृतराष्ट्रो जिगाय तं इत्यादि नारदप्रोक्तां
वाचमाकर्ण्य फाल्गुनः अतीव मुदितः प्राह तेषामकुशलं कुतः ये ब्राह्मणमते नित्यं ये च ब्राह्म
णपूजकाः अहं चक्रोत्त्या नियतस्तीर्थानि विचरन्नतु आगतस्तीर्थतद्विप्र मोदाती वमहृदि
तीर्थानां दर्शनं धन्यमवगाहस्ततोधिकाः माहात्म्यश्रवणं तस्मात्दैवैरपि मुनिरब्रवीत् तदहं ५
श्रोतुमिच्छामि तीर्थस्यास्य गुणान्मुने एतेनैव श्रव्यमेतत्यत्वयांगीकृतं मुने त्वं हि त्रिलोक्यं

विचरन्वेत्सि सर्वां हि सारतां तदेतत्सर्वतीर्थेभ्योऽधिकं मन्यो त्वदाहृतं नारद उवाच उचितं
तव पार्थैतद्यत्पृच्छसि गुणिन् गुणान् गुणिनामेव युज्यते श्रोतुं धर्मो भवान् गुणान् साधूनां ध
र्मश्रवणैः कीर्तिर्नैयौति चान्वहं पापानामसतां लोपे रायुर्याति यथान्वहं तदहं कीर्तयिष्यामि ती
र्थस्यास्य गुणान्बहून् यथाश्रुतानि जानासि युक्तमंगीकृतं मया पुराहं विचरन्पार्थ त्रिलोक्यं
कपिलानुगः गतवान्ब्रह्मणो लोकं तत्रापश्यं पितामहं स हि राजर्षिदेवर्षिमूर्तामूर्तैः सुसंवृ
तः विभाति विमलो ब्रह्मा नक्षत्रैरुडुराडिव तमहं प्रणिपत्याथ चक्षुषा कृतस्वागतः उपविष्टः
प्रमुदितः कपिलेन सहैव च एतस्मिन्नंतरे तत्र वार्त्तिका समुपागताः प्रहीयंते हि ते नित्यं जग
द्द्रष्टुं हि ब्रह्मणा कृतप्रणामान्तथा तान्समासीनान्पितामहः चक्षुषामृतकल्पेन ल्हादयन्निव
चाब्रवीत् कुत्र कुत्र विविचिंर्णं वो दृष्टं श्रुतमथापि वा किंचिदेकाद्भुतं ब्रूत श्रवणाद्येन पुण्यता
इत्युक्ताः भगवता तेषां यः प्रव रो मतः सुश्रवानाम ब्रह्माणं प्रणिपत्येदमुक्तवान् प्रभो राग्रच
वित्ति यथा दीपार्व स्तथा तथापि खलु वाच्यं मे परार्थं प्रेरितेनिते मुनिः कात्यायनो नाम श्रुता

स्कं०पु०२ धमान् बहून्नबहून् सारजिज्ञासयातस्थावेकाग्रमनास्तं समाः ततः प्रोवाच तं दिव्या वाणी कात्यायन
शृणु पुण्ये सरस्वतीतीरे पृच्छ सारस्वतं मुनिं स ते सारं धर्ममध्ये धर्मज्ञोभिवदिष्यति इति श्रुत्वा मुनि
६ वरा मुनिश्रेष्ठमुपसृत्य प्रणम्य शिरसा भूमौ पप्रच्छेदं हृदिस्थितं सत्यं केचित्प्रशंसंति तपः शौचं त
थापरे सांख्यं केचित्प्रशंसंति योगमन्ये प्रचक्षते क्षमां केचित्प्रशंसंति तथैव च शमार्जवं केचि
न्मौनं प्रशंसंति केचिदाहुः परं श्रुतं सम्यक्ज्ञानं प्रशंसंति केचिद्वैराग्यमुत्तमं अग्निष्टोमादिकर्माणि
तथा केचित्परं विदुः आत्मज्ञानं परं केचित् समलोष्टाश्मकांचनाः इत्थं व्यवस्थिते लोके कृत्याकृत्य
विधौ जनाः व्यामोहमेव गच्छंति क्षेमं यइति वादिनः यदेतेषु परं कृत्यमनुष्ठेयं महात्मभिः वक्तुमर्हसि
धर्मज्ञ मम सर्वार्थसाधकं सारस्वत उवाच यन्मां सरस्वती प्राह सारं वक्ष्यामि तच्छृणु छायाकारं जग
त्सर्वमुत्पन्नं क्षयधर्मि च वरांगनानेत्रभंगरत्नबुद्बुदमेव च धनायुर्यौवनं भोगान् जलचंद्रवदस्थि
रान् बुध्वा सम्यक्परामृश्य स्थाणुदानं समाश्रयेत् दानयुक्तः पुरुषः पापं नलं कर्तुमितिश्रुतिः स्थाणु
भक्तो जन्म सूनामो नीतिश्रुतिस्तथा सावर्णिनाचगाथेद्वे कीर्तिते शृणुष्व पुरा रूपोऽहि भगवान्धर्मो वृषभो यस्य

MEMORIAL

वाहनं पूज्यते स महादेवः स धर्मपर उच्यते दुःखावर्ततमो वीचिधर्माधर्मजले तथा क्रोधयं केहमो
ग्राहे लोभबुद्बुदसंकटे ज्ञानगंभीरपाताले सत्ययानविभूषिते मज्जंतं तारयेल्लोको हरसंसारसा
गरात् दानं दत्ता दानं वाचः कीर्तिधर्मात्तथायुषः परोपकरणं कायादसारात्सारमुद्धरेत् धर्मरागं
श्रुतौ चिंता दाने व्यसनमुत्तमं इंद्रियार्थेषु वैराग्यं संप्राप्तं जन्मने फलं देशेऽस्मिन् भारते जन्म प्राप्य मा
नुष्यमध्रुवं न कुर्यादात्मनः श्रेयस्तेनात्मा वंचितश्चिरं देवासुराणां सर्वेषां मानुष्यमतिदुर्लभं तत्
संप्राप्य तथा कुर्यान्न गच्छेन्नरकं यथा सर्वस्य मूलं मानुष्यं तथा सर्वार्थसाधकं यदि लाभेन यत्नेन तन्म
लं रक्ष प्रयत्नतः महता पुण्यमूल्येन क्रीयते कायनौस्त्वया गंतुं दुःखोदधेः पारं तर यावन्न भिद्यते
अविकारिशरीरं तं दुःप्राप्यं प्राप्य वै ततः नापक्रामति संसारात् आत्मदासनराधमः तपस्तप्यंति यत
यो जुह्वते चात्र याज्ञिनः दानानि चात्र दीयंते परलोकार्थमादरात् कात्यायन उवाच दानस्य तपसो वा
पि भगवन् किं च दुष्करं किं वा महत्फलं प्रेत्य सारस्वत ब्रवीहि तत् सारस्वत उवाच न दानाद्दुष्करतरं
पृथिव्यामस्ति किंचन मुने प्रत्यक्षमेवैतद्दृश्यते लोकसाक्षिकं परित्यज्य प्रियान्प्राणान् धनार्थे हि म

हाभयं प्रविशंति महालोभात् समुद्रमटवीं गिरिं सर्वामन्ये प्रपद्यंते श्च वृत्तिरितिया स्मृता हिं
सा प्रायां बहुक्लेशां कृषिं चैव तथापरे तस्य दुःखार्जितस्येह प्राणेभ्योपि गरीयसः आयासशतल
ब्धस्य परित्यागस्तु दुष्करः यद्ददाति यदश्नाति तदेव धनिनो धनं अन्ये मृतस्य क्रीडंति दारैरपि ध
नैरपि अहन्यहनि यो चैतमहं मन्ये गुरुं यथा मार्जनं दर्पणस्येव यः करोति दिने दिने दीयमानं
हि नोपैति भूय एवाभिवर्धते कूप उत्सिच्यमानो हि भवेच्छुद्धो बहूदकः एकजन्मकृतस्यार्थं सह
स्राणि विलोपयेत् प्राज्ञो जन्मसहस्राणि संचिनोत्येकजन्मनि मूर्खो हि न ददात्यर्थानिह दारिद्र्य
शंकया प्राज्ञस्तु विसृजत्यर्थान् अमुत्रास्येव शंकया किं धनेन करिष्यंति देहिनो भंगुराश्रयाः य
दर्थं धनमिच्छंति तच्छरीरमशाश्वतं अक्षरद्वयमभ्यस्तं नास्ति नास्तीति यत्पुरा तदिदं देहि देही
ति विपरीतमुपस्थितं बोधयंति च याचंते देहीति कृपणं जनाः अवस्थेयमदानस्य माभूदेवं
भवानपि दातुरेवोपकाराय वदत्यर्थी ति देहि मे यस्माद्धातप्रयात्यूर्ध्वमधस्तिष्ठेत्प्रतिग्रही दरि ७
द्रा व्याधिता मूर्खाः परप्रेष्यकराः सदा अदत्तदाना जायंते दुःखस्यैव हि भाजनाः धनवंतमदाता

रं दरिद्रं चातपस्विनं उभावंभसि मोक्तव्यौ कंठे बध्वा महाशिलां शतेषु जायते शूरः सहस्रेषु च
पंडितः वक्ता दशसहस्रेषु दाता जायेत वा न वा गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः
अलुब्धैर्दानशीलैश्च सप्तभिर्धार्यते मही शिबिरौशीनरो गात्राणि सुतं च प्रियमौरसं ब्राह्मणार्थमु
पाकृत्य नाकपृष्ठमितो गतः प्रतर्दनः काशिपतिः प्रदाय नयने स्वके ब्राह्मणायातुलां कीर्तिमिहा
मुत्र चाश्नुते निमी राष्ट्रं च वैदेहो जमदग्न्यो वसुंधरां ब्राह्मणेभ्यो ददौ चापि गयश्चोर्वी सपत्तनां
अवर्षति च पर्जन्ये सर्वभूतनिवासकृत् वसिष्ठो जीवयामास प्रजापतिरिव प्रजाः ब्रह्मदत्तश्च
पांचाल्यो राजा बुद्धिमतांवरः निधिं शंखं द्विजाग्र्येभ्यो दत्वा स्वर्गमवाप्तवान् सहस्रजिच्च राजर्षिः
प्राणानिष्टान् महायशाः ब्राह्मणार्थे परित्यज्य गतो लोकाननुत्तमान् एते चान्ये च बहवः सश
णो दानेन भक्तितः रुद्रलोकं गता नित्यं शांतात्मानो जितेंद्रियाः एषां प्रतिष्ठिता कीर्तिर्यावत्स्था
स्यति मेदिनी इति संचिंत्य सारार्थी स्थाणुदानपरो भव सोपि मोहं परित्यज्य तथा कात्यायनो
भवत् श्रीनारद उवाच ब्रह्मप्रेषितेन चारेण कथामाकर्ण्य पद्मभूः हर्षाश्रुसंयुतातीव प्रश

स्कं·पु·२ शंसमुद्रमुद्रः साधु ते व्याहृतं वत्स एवमेतन्न चान्यथा सत्संसारस्वतं प्राह प्राहुश्चेदं तथा श्रुति दा
८ नं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवंति दानेनारीनभ्यं मोहंत दानेनारि द्विषंतो
मित्राणि भवंति तस्मात्सर्वेषु लोकेषु सर्वे दाने प्रतिष्ठितं तस्माद्दानं परं वदंतीति संसारसागरे घोरे
धर्माधर्मोर्मिसंकुले दानं तत्र निषेवेत तच्च नौरिव निर्मलं इति संचिंत्य च मया पुष्करे स्थापिता द्विजाः
रुद्रेण नागराश्चैव पार्वत्या शक्तिपुर्भवाः श्रीमाले च तथा लक्ष्म्या ह्येवमादि सुरोत्तमैः नानाग्रहाराः संद
त्ता लोकोद्धरणकांक्षया नहि दानफलेकांक्षा काचिन्नास्ति सुरोत्तमाः साधुसंशिष्यर्णार्थं हि नैदानः परि
कीर्तितं ब्राह्मणाश्च कृतस्थाना नानाधर्मोपदेशनैः समुद्धरंति वर्णांस्त्रींस्ततः पूज्यतमा द्विजाः दा
नं चतुर्विधं दानमुत्सर्गं कल्पितं तथा संश्रुतं चेति त्रिविधं तत्क्रमान्नू परिकीर्तितं वापीकूपतडाकानां वृ
क्षविद्या सुरोकसां मठप्रपाग्रहक्षेत्रदानमुत्सर्ग इष्यते उपजीवन्त्रिमानूयश्च पुण्यं कोपि चरेन्नरः ष
ष्ठमंशं स लभेत यावद्योविस्रजेद्द्विजः तदेषामेव सर्वेषां विप्रसंस्थापनं परं देवसंस्थापनं चैव धर्मस्त ८
न्मूल एव यत देवतायतनं यावद्यावच्च ब्राह्मणगृहं तावद्दातुः पूर्वजानां पुण्यां शाश्वोपतिष्ठति एतस्वल्पं

हि वाणिज्यं पुनर्बीजं फलप्रदं जीर्णोद्धारे च द्विगुणमेतद्देवत्र कीर्तितं तस्मादिदं लहमपि ब्रवीमि सुर
सत्तमाः नास्ति दानसमं किंचित्संसारस्य तारणे श्रीनारद उ॰ इति सारस्वतप्रोक्तो तथापद्मभुवे
रितां साधु साधितमोद्यत सुराश्चाहं सुविस्मितः ततः सभाविसर्गो ते सुरम्ये मेरुमूर्धनि उपवित्वयत्रि
लारेषु अहमेतदचिंतयं सत्यमाह विरंचस्तु स किमर्थं नु जीवति येनैकमपि दानं न आचरीतमित्सथो
तदहं दानपुण्यं हि करिष्यामि कथं स्फुटं कौपीनदंडमात्रधनो धनं स्वल्पं हि नास्ति मे अनर्हते यद्ददाति न
ददाति तथार्हते अर्हानर्हपरिज्ञानाद्दानधर्मो हि पुष्करः देशे काले च पात्रे च शुद्धेन मनसा तथा न्या
यार्जितं च यो दद्याद्योवने च तथा श्रुत तमोद्वतसुयाद्द्यात भयक्रोधात्तथैव च भुंक्ते दानफलं तद्विगर्भ
स्थनात्र संशयः बालस्यापि च सोश्नाति यद्दत्तं दंभकारणात् दत्तमन्यायतो वित्तं तथा चैवार्थकारणात्
तस्माद्देशे च काले च सुपात्रे विधिना नरैः शुभार्जितं प्रयुंजीत श्रद्धया मविवर्जितं तदेतन्निर्धनत्वाच्च क
थं नाम भविष्यति सत्यमाहुः पुरा वाक्यं पुराणमुनयोमलाः नाधनस्यास्त्ययं लोको न परश्च कथं चन
अभिशास्तं प्रपश्यंति दरिद्रं पार्श्वतः स्थितं दारिद्र्यं पातकं लोके कस्तं शंसितुमर्हसि पतितः सोच्यते सर्वेनि

स्कं·पु·२ धनश्चापि सोच्यते यः कृशाश्वः कृशाधनः कृशाभृत्यः कृशातिथिः सवै प्रोक्तः कृशो नाम न शरी
रकृशः कृशः अर्थवान्दुःकुलीनोपि लोके पूज्यते मानरः शशिनस्तुल्यवंशोपि निर्धनः परिभूय
९ ते ज्ञानवृद्धास्तपोवृद्धा येच वृद्धा बहुश्रुताः ते सर्वे धनवृद्धाश्च द्वारे तिष्ठंति वारिताः यद्यप्ययं
त्रिभुवनेऽर्थोस्माकं परान्नहि तथाप्यन्यप्रार्थितो हि तस्यैव फलदो भवेत् अथवै अग्रतं सर्वं चिंत
यिष्यामि सस्फुटं विलोकयामि पूर्वं तु किंचिद्योग्यं हि स्थानकं संचिंतयित्वेति बहुप्रकारं देशां
ग्रामान्नगराणि चाश्रमान् बहून्नहं पर्यटनाभुयामि स्थानं हितं स्थाप ये पत्र विप्रान् इतिश्री स्कं
दपुराणे कुमारिकाखंडे द्वितीयोध्यायः सूत उवाच एवं स्थानानि पुण्यानि यानि यानि हि वै भुवि
निरीक्षंस्तत्र तत्राहं नारदो विप्रसत्तम विचरन्मेदिनीं सर्वां प्राप्तोहमाश्रमं भृगोः यत्र रेवा नदी
पुण्या सप्तकल्पस्मरा वरा महापुण्या पवित्रा च सर्वतीर्थमयी शुभा पुनाति कीर्तनेनैव दर्शने
न विशेषतः तन्नावगाहनात्सार्थमुच्यते जंतुरंहसा यथास्मिन्पिंगला नाडी देहमाध्य व्यवस्थि
ता इयं ब्रह्मांडपिंडस्य स्थाने तस्मिन्प्रकीर्तिता तत्रास्ति शुक्लतीर्थाख्यं रेवायां पापनाशनं यत्रैवे

स्नानमात्रेण ब्रह्महत्या प्रणश्यति तस्यापि संनिधौ पार्थ रेवाया उत्तरे तटे नानावृक्षसमाकी
कीर्णं लतागुल्मोपशोभितं नानापुष्पफलोपेतं कदलीखंडमंडितं अनेकश्वापदाकीर्णं विह
गैरनुनादितं सुगंधपुष्पशोभाढ्यं मयूररवनादितं भ्रमरैः सर्वमुत्सृज्य निलीनं रावसंयुतं य
था संसारमुत्सृज्य भक्तेन हरपादयोः कोकिलामधुरैः स्वानैर्ह्लादयंति यथा मुनीन् तथा कथामृ
ताख्यानैर्ब्राह्मणा भवभीरुकान् यत्र वृक्षा ह्लादयंति फलैः पुष्पैश्च पत्रकैः छायाभिरपि काष्ठैश्च
लोकानिव हरव्रताः पुत्रपुत्रीति वासं ते यत्र पुत्रप्रिया खगाः यथा शिवप्रियाः शैवा नित्यं शिवशिवे
ति च एवंविधं मुने तस्य भृगोराश्रममंडलं विप्रैस्त्रिवर्घसंयुक्तैः सर्वतः समलंकृतं ऋग्यजुःसाम
निर्घोषैरापूरितदिगंतरं रुद्रभक्तेन वीरेण यथैव भुवनत्रयं तत्राहं वीरसंप्राप्तो यत्रास्ते मुनिसत्त
मः भृगुः परमधर्मात्मा तपसा द्योतितप्रभाः आगच्छंतं तु मां दृष्ट्वा दीनं च मुदितं तदा अभ्युत्थानं कृ
तं सर्वैर्विप्रैर्भृगुपुरोगमैः कृत्वा तु स्वागतं दत्वा अर्घ्यार्घं भृगुणा सह आसनेषूपविष्टास्ते मुनींद्राः
सहिता मया विश्रांतं तु ततो ज्ञात्वा भृगुर्मामभ्युवाच ह क्वगंतव्यं मुनिश्रेष्ठ कस्मादिह समागतः आ

सं॰पु॰२ गमनकारणं सर्वं समाचक्ष्व परिस्फुटं ततस्तंचिंतयाविष्टोभृगुपार्थोहमब्रवं श्रूयतामभिधास्यामि यदर्थं
महमागतः मयापर्यटितासर्वासमुद्रांताचमेदिनी द्विजानांभूमिदानार्थंमार्गमाणःपदेपदे निर्दोषां
१० चपवित्रांचतीर्थैश्चापिसमन्वितां रम्यांमनोरमांभूमिंनपश्यामिकथंचन भृगुरुवाच विप्राणांस्थापना
स्थार्थंमयापिभ्रमितापुरा पृथ्वीसागरपर्यंतादृष्ट्वासर्वातदानघ महीनामनदीपुण्यासर्वतीर्थमयीशुभा
दिव्यामनोरमासौम्यामहापापप्रणाशिनी नदीरूपेणतत्रैवपृथ्वीनात्रसंशयं पृथिव्यांयानितीर्थानिदृष्ट्वा
दृष्टानिनारद तानिसर्वाण्यितत्रैवनिवसंतिमहीजले सासमुद्रेणसंप्राप्तापुण्यतोयामहानदी संजातस्त
त्रदेवर्षेमहीसागरसंगमः स्तंभाख्यंतत्रतीर्थंतुत्रिषुलोकेषुविश्रुतं तत्रयेमनुजास्नानंप्रकुर्वंतिविप
श्चितः सर्वपापविनिर्मुक्तोनोपसर्पंतिवैयमं तत्राद्भुतंहिदृष्टंमेस्नातुंतत्रागतेनवै तदहंकीर्तयिष्या
मिमुनेशृणुमाहाद्भुतं यावत्स्नानंव्रजाम्यस्मिन्महीसागरसंगमे तीरस्थितंप्रपश्यंतिमुनींद्रंपावकोप
मं प्रांशुहृद्दूचास्थिभ्रांतंतपोलक्ष्म्याविभूषितं भुजावूर्ध्वौततःकृत्वाप्ररुदंतंमुहुर्मुहुः तंतथादुःखितंदृष्ट्वा
दुःखितोहमथाभवं सतांलक्षणमेतद्धियदृष्ट्वादुःखितंजनं तत्सख्यंजायतेतस्यतथाघकलापहं अ

हिंसासत्यमस्तेयंमानुष्येसतिदुर्लभं ततस्तमुपसंगम्यपर्यपृच्छमहंतदा किमर्थंरोदिषिमुनेत्रोकेकिंकार
णंतव सुगुप्तमपिमेब्रूहिजिज्ञासाहतोहिमे मुनिस्ततोमावदत भर्गोनिर्भाग्यवानहं तेनरोदिमिमापृच्छ
दुर्भाग्यंचालयेद्विजः तमहंविस्मयाविष्टःपुनरेवेदमब्रुवं दुर्लभंभारतेजन्मतत्रापिचमनुष्यता मनुष्य
त्वेब्राह्मणत्वंमुनित्वंतत्रदुर्लभं तत्रापिचतपःसिद्धिःप्राप्येतत्सर्वचकंपरं किमर्थंरोदिषिमुनेविस्मयोत्रम
हान्मम एवंसंपृच्छतेमह्यमेतस्मिन्नेवचांतरे सुभद्रोनामनाम्नाचमुनिस्तत्राभ्युपाययौ सहिमेरूपरित्य
ज्यस्नात्वातीर्थस्यसारतां कृताश्रमःपूजयतितदास्तंभेश्वरंमुनिः सोप्येवंमामिवापृच्छन्मुनिंरोदनकार
णं अथाहाचम्यसमुनिःश्रूयतांकारणंमुने अहंहिदेवशर्माख्योमुनिसंयतवाग्मनाः निवसामिकृत
स्थानांगंगासागरसंगमे तत्रदत्तंतर्पयामिसदैवचपितृनहं श्राद्धांतेतेचप्रत्यक्षाह्याशिषोमेददंति
च ततःकदाचित्पितरःप्रहृष्टामामथाब्रुवन् वदंदाव्रचादामोदेवशर्मन्तिवांतिके स्थानेऽस्माकंकदाचि
त्वंनचायातिकृतःसुतः आहंस्थानंदिदृक्षुस्ततनत्राक्तोस्मिवेदितु ततःपरमित्युक्त्वागतवान्पितृभिःसह
पितृणांमंदिरंपुण्यंसोमलोकसमास्थितं तत्रतत्रस्थितश्चाहंतेजोमंडलदुर्दर्शान् दृष्ट्वाग्रतःपूजयाब्धा

स्कं·पु· न पश्यंस्तान्पितॄनिति किं ह्यमि समुपायं ति भर्त्तुं तस्तां भगार्चिताः भर्त्तुं प्रमुदितानेव तथा स्व
यं तथाह्यमी पितरज३० भद्रे ते पितरः पुण्याः समुद्रस्य महामुनेः तर्पितास्तेन मुनिना महीसाग
३३ रसंगमे सर्वतीर्थमयी यत्र निलीनाश्च दृश्यामही तत्र दर्शे तर्पयति सुभद्रस्तां स्वमन्तसुतं इत्या
कर्ण्य वचस्तेषां जजितोहं भर्त्तांतदा विस्मितश्च प्रणम्यैतान्पितॄन्स्वंस्थानमागतः तथा तथा चि
तितं च तत्र यास्याम्यहं स्फुटं पुण्याय त्रापि विख्याता महीसागरसंगमः कृताश्रमश्च तत्रैव तर्प
यिष्यति जान्पितॄन् दृष्टो दृष्टो यथा चासौ सप्त नामा समुद्रकः किं तेन ननु जातेन कुलांगारेण
पापिना यस्मिन्जीवति सपिनिजाः पितरोन्यस्य हाकराः इति संचित्य मुदितो रुचिं भार्यामथाब्रु
वं रुचे त्वया समायुक्तो महीसागरसंगमं गत्वा स्थास्यामि तत्रैव शीघ्रं त्वं सन्मुखीभव पतिव्र
तासि शुश्रूषासि कुलीनासि यशस्विनी तस्मादेतन्ममशुभे कर्तुमर्हसि चिंतितं रुचिस्तस्याजनि
नो भर्त्ता कथं पापङ्गराम्सना हे स्मत्रानस्तं भयं नाहं दत्तातुभ्यमकं त्वया इह कंदफलाहारैर्यत्किंतेन ३३
न पूर्यते तत्तुमिच्छसि मां तत्र यत्र क्षारोदकं सदा त्वमेव तत्र संयाहि नेदं तु तत्पूर्वजाः गच्छाति

छवाह ध्वसधा को कथं चिरं तथा ब्रुवंत्यास्तस्याश्च कर्णौ विस्मि पिधाय च विपुलं शिष्यमादिश्य
गृहे एको त्र आगतः सोहं स्नात्वात्र संतर्प्य पितॄन् श्रद्धापरायणः चिंतासु विपुलां प्राप्तो नरके
दुःकृतीयथा यदि तिष्ठामि चात्रैव अर्धदेहधरो ह्यहं नरो हि गृहिणी हीनो अर्धदेह इति स्मृतः
यथात्मना विना देहं कार्यं किंचिन्न सिध्यति एवं गृहिण्या हीनो हि न सत्कर्म सुरास्यते यो नरः स्त्रीषु
देहेषु अनुरक्तस्त्व सो पशुः अनयोर्हि फलं ग्राह्यं सारथा नात्र काचन अर्धदेही जमनुजस्त्व संस्थ
त्यः स तां मतः उत्तानपादिरस्य शय उत्तमो हि सुरैः कृतः अथ चेत्तत्र संयामि न महीसागरस्ततः
यामि चान कथं पादो चलतो मे कथंचन एतस्मिन्मे मनो विक्षुब्धं खिद्यते ज्ञानसंकटे अतो हमति
मुह्यामि भर्त्तुं त्वामिति रोदिमि इति श्रुत्वा वचस्तस्य भर्त्ता रोमांचपूरितं साधु साध्विति सथोवाच तं
सुभद्रा प्रयंतथा दंडवच्च प्रणमितो महीसागरसंगमं चिंतयाय वः स्वमनसि प्रतिकारं मुने
रुभौ यदि हि मानुष्यमासाद्य जलबुद्बुदभंगुरं परार्थाय भवंत्येते पुरुषान्यपुरीषकाः ततः सचिं
ताप्रोहेदं सुभद्रा मुनिसत्तमं मा मुने परिखिद्य स्वदेव त्रामेन राखिराभव अहं ते नाशयिष्याम्यशं

स्कं॰पु॰२ सूर्यस्तमो यथा गमिष्यस्याश्रमे स्वं च नात्रापि परिहास्यते शृणुत कारणं तुभ्यं तर्पयिष्ये पितॄन् नहं
देवशर्मा एवं ते वदमानस्य आयुरस्तु शतं समाः यदत्वाक्यं महत्कर्म कर्तुमिच्छसि मत्कृते हर्षस्थाने
१२ विषादश्च पुनर्मां बाधते शृणु अपि वाक्यं शुभं सोतो न गच्छन्ति मिया मुने कथमेतन्महत्कर्म कारयिष्ये
धावद् पुनः किंचित्प्रवक्ष्यामि यथा मे निःकृतिर्भवेत् त्वया स्थानकारितोसि मे यथावच्मि तथा कुरु अहं स
दा करिष्यामि श्राद्धं चोद्दिश्य ते पितॄन् श्राद्धं गार्ण्ये चात्र मत्पितॄणां त्वमाचर हीनत्वे चापि तपसः संचित
स्यापि जन्मना चतुर्भागं प्रदास्यामि एवमेवैतदाचर सुभद्र उवाच यद्येवं तव संतोषोस्त्वेवमस्तु मुनी
श्वर साधूनां च तथा हर्षस्तथा कार्यं विजानता भृगुरु॰ देवशर्मा ततो हृष्टो दत्वा पुण्यं त्रिवार्षिकं चतु
र्थांशं ययौ धाम स्वं सुभद्रोपि च स्थितः एवंविधो नारदासौ महीसागरसंगमः यमनुस्मरतो मद्य रोमां
चो द्यापि वर्तते नारद उ॰ इति श्रुत्वा फाल्गुनाहं हर्षगद्गदया गिरा मतो मतद्वाचो वाचं साधु साध्विति तं मे
गु यूयं वयं गमिष्यामो महीतीरं सुशोभनं आवामीक्षावहे सर्वं स्थानकं तदनुत्तमं नारदस्य वचः श्रुत्वा
भृगुस्तेन सहाययौ समस्तं तु महापुण्यं महीकूलं निरीक्षितं तद्दृष्ट्वा चातिहृष्टोहं मासं रोमो चकं चुकः

MEMORIAL

अब्रुवं मुनिशार्दूलं हर्षगद्गदया गिरा त्वत्प्रसादात्करिष्यामि भृगो स्थानमुत्तमं स्वस्थानं गम्यतां
ब्रह्मन्ततः कृत्यं विचिंतये एवं भृगुं चास्मि विसर्जयित्वा कल्लोलकोलाहलकौतुकी तटे अथोपविश्येदमचिं
तयं तदा किं कृत्समात्मानमिवैकयोगी इति श्रीस्कंदपुराणे कुमारिकाखंडे तृतीयोध्यायः ३ नारद उ॰
ततस्त्वहं चिंतयामि कथं स्थानमिदं भवेत् ममायत्तं यतो राज्ञां भूमिरेषा सदा यतः यत्वं धर्मं चर्माणं ग
त्वा या चामि मेदिनी अपर्यत्वे च सत्वभे याचितोनपुनः परः तथा हि मुनिभिः प्रोक्तं द्रव्यं त्रिविधमुत्तमं उ
त्तमं मध्यं च शबलं मध्यमं कृष्णमुच्यते श्रुतेः संपादनाच्छिष्यात्प्राप्तं शुक्लं च कन्यया तथा कुसीद वाणिज्यं कृ
षि याचितमेव च शबलं प्रोच्यते सद्भिर्द्यूतचौर्यणसाहसैः व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतं शु
क्लवित्तेन यो धर्मं प्रकुर्याच्छ्रद्धयान्वितः तीर्थं पात्रं समासाद्य देवत्वं तत्समश्नुते राजसेन च भावेन वित्तेन श
बलेन च प्रदद्याद्दानमर्थिभ्यो मानुषत्वं तदश्नुते तमोवृतस्तु यो दद्यात्कृष्णवित्तेन मानवः तिर्यक्त्वं तत्फ
लं प्रेत्य समश्नाति नराधमः तन्नु याचितद्रव्यं मे राजसं हि स्फुटं भवेत् अथ ब्राह्मणभावेन नृपयाचे प्रति
ग्रहं तदप्यहो चापि कष्टं हेतुनानेन मे मतं अयं प्रतिग्रहो घोरो मध्वास्वादो विषोपमः प्रतिग्रहेण संयुक्तो

स्कं॰पु॰२ जीवराज्ञी वंसेतद्द्विजः तस्मादहं निवृत्तिश्च पापादस्मात्प्रतिग्रहात् ततः केनाभ्युपायेन द्वयोरन्य
तरेण तु स्थायतं स्थानकं कूर्म एतत्संचिंतयन्मुहुः यथा कुभार्यः पुरुषश्चिंतां तं प्रपद्यते तथैव विम
३३ ऽश्चाहं चिंतां तन लभाम्यणु एतस्मिन्नंतरे पार्थ स्नातुं तत्र समागताः बहवो मुनयः पुण्ये मही साग
रसंगमे अहं तानब्रुवं सर्वान् कुतो यूयं समागमाः तेमामूचुः प्रणम्याथ सौराष्ट्रविषये मुने धर्मव
र्मेपि न पतियोस्य देशस्य भूपतिः स तु दानस्य तत्वार्थी तिपवर्षगणान् बहून् ततस्तं प्राह हर्षेवा
णी श्लोकमेकं नृप शृणु द्विहेतु षडधिष्ठानं षडंगं च द्विपाकयुक् चतुःप्रकारं त्रिविधं त्रिनाशं
दानमुच्यते इत्येकं श्लोकमाभाष्य खे वाणी विरराम ह श्लोकस्यार्थं ना वभोग पृच्छमानापि नार
द ततो राजा धर्मवर्मा पटहेनाभ्यघोषयत् यस्तु श्लोकस्यैवास्य लब्धस्यत्प्रसामया करोति
सम्यक् व्याख्यातं तस्यैवैतद्दाम्यहं गवां च सप्त निलक्षं सुवर्णं चैतदेव तु सप्तग्रामान् प्रयच्छा
मि श्लोकव्याख्यां करोति यः पटहेनेति नृपतेः श्रुत्वा राज्ञो वचो महन् आजग्मुर्बहुदेशीया ब्रा ३३
ह्मणाः कोटिशो मुने वयं च तत्र याताः स्म धनलोभेन नारद दुर्बोधत्वान्नमस्कृत्य श्लोकं चात्र स

मागताः एवं फाल्गुन तेषां तु वचः श्रुत्वा महात्मनां अतीव संप्रहृष्टोहं तान्विसृज्य व्यचिंतयं अ
हो मा सदुपायो मे स्थानप्राप्तौ न संशयः श्लोकं व्याख्याय नृपतेर्लप्स्ये स्थानं धनं तदा विद्यामूल्येन
नैवं च याचितः स्यात्प्रतिग्रहः सम्यगाह पुराणर्षिर्वासुदेवो जगद्गुरुः धर्मस्य यस्य श्रद्धास्यान्न च सा
नैव पूर्यते एवं विविधविद्वांसः प्रकुर्वंतु यथारुचि स सम्मतद्विभोर्वाक्यं पुर्णं भाति तथाद्य मे मनो
रथोयं + पापस्य यस्य श्रद्धास्यान्न च सापि न पूर्यते + सफलः संभृतो कुरुत स्फुटं एवं च दुर्विनं श्लोकं
महं जानामि सस्फुटं अस्मत्तैः पितृभिः पूर्वमपख्यातो हि मे पुरा एवं हर्षान्वितः पार्थ संचिंत्याहं तत्ते
मुहुः प्रणम्य तीर्थं चलितो मही सागरसंगमं वृद्धब्राह्मणरूपेण ततोहं यातवान्नृपं इदं भणितवा
न स्मिं श्लोकव्याख्यां नृप शृणु यत्पटहाविख्यातं दानं च प्रगुणीकुरु एवमुक्ते नृपः प्राह प्रोचुरेवं
हि कोटिशः द्विजोत्तमा पुनर्नास्य प्राक्कुमर्थो हि शक्यते ये द्वेहेतु षडाख्यातान्यधिष्ठानानि कानि
च कानि चैव षडंगानि कौ द्वौ पाकौ तथा स्मृतौ के प्रकाराश्च चत्वारः किं च त्रिविधं द्विज त्रयो ना
शाश्च के प्रोक्ता दानस्यैतत्स्फुटं वद स्फुटानि मां स्तांस्तान्सप्तय दि वक्ष्यति ब्राह्मणे ततो गवां सप्त नियु

स्कं·पु·२ तं सुवर्णं चेत् देयतु सप्तग्रामाश्च दास्यामि नो चेत्सि स्वं गृहं इत्युक्तवचनं पार्थ सौराष्ट्रस्वामिनं नृपं धर्म
वर्माणमस्विदं प्रवोचम्मवधारय श्लोकव्याख्यां स्फुटां वक्ष्ये दानहेतुर्यतोऽशृणु मा लक्ष्मीतस्या अल्पतां भु
१४ द्यावहं श्रद्धा आस्तिक्यबुद्धिः शक्तिरा द्यैरहिते अत्र श्रद्धाविषश्लोका ---- भवंति कायक्लेशैश्च ब
हुभिर्न चैवार्थस्य राशिभिः धर्मः संप्राप्यते सूक्ष्मः श्रद्धा धर्मो हुतं तपः श्रद्धा स्वर्गस्य मोक्षस्य श्रद्धास
र्वमिदं जगत् सर्वस्वं जीवितं चापि दद्यादश्रद्धया यदि नाप्नुयात्स फलं किंचित् श्रद्दधानस्ततो भवेत्
श्रद्धया साध्यते धर्मो महद्भिर्नार्थराशिभिः अकिंचना हि मुनयः श्रद्धावंतो दिवं गताः त्रिविधा भवति श्रद्धा
देहिनां सा स्वभावजा सात्त्विकी राजसी चैव तामसी चेति तां शृणु यजंते सात्त्विका देवान् यक्षरक्षांसि रा
जसाः प्रेतान्भूतपिशाचांश्च यजंते तामसा जनाः तस्माच्छ्रद्धावता पात्रे दत्तं न्यायार्जितं हितत् ते नैव भगवा
न् रुद्रः स्वल्पके नापि तुष्यति शक्तिविषये श्लोका भवंति कुटुंबभक्तवसनाः भक्तमन्नं वसनं वस्त्रं याच
त्तद्रव्येण कुटुंबस्य वस्त्रमन्नं च संपद्येते तदतिरिक्तं देयं इतरत्तु न दोष मित्यर्थः मध्वास्वादो विषं पश्चाद्दा १४
तुर्धर्मोऽन्यथा भवेत् शक्ते परजने दाता स्वजने दुःखजीविनी मध्वापाने विषास्वाद स धर्मो न प्रतिरूपकः

भृत्यानामुपरोधेन यत्करोत्यूर्ध्वदैहिकं तद्भवत्यसुखोदर्कं जीवतोऽस्य मृतस्य च सामान्यं याचितं न्या
स माधि र्दाराश्च दर्शनं अन्वाहितं च निक्षेपः सर्वस्वं चान्वये सति आपत्स्वपि न देयानि नववस्तूनि पंडितैः
यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः इति ते गदितं राजन् द्विहन्त श्रूयतामतः अधिष्ठानानि वक्ष्यामि
षडेतच्छृणु तान्यपि धर्ममर्थं च कामं च व्रीडा हर्षभयानि च अधिष्ठानानि दानानां षडेतानि प्रचक्षते
पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनं केवलं धर्मबुद्ध्या यद्धर्मदानं तदुच्यते धनिनं धनलोभेन लोभयि
त्वार्थमाहरेत् तदर्थदानमित्याहुः कामदानमतः शृणु प्रयोजनमपेक्ष्यैवं प्रसंगाद्यत्प्रदीयते अनर्हे
षु सरागेण कामदानं तदुच्यते संसदि व्रीडया श्रुत्वा अर्थैरर्थिभ्यः प्रयाति च प्रदीयते च यद्दानं व्रीडादान
मिति श्रुतं दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षवद्यत्प्रदीयते हर्षदानमिति प्रोक्तं दानं तद्धर्मचिंतकैः अक्रोशा
नर्थहिंसानां प्रतीकाराय यद्भवेत् दीयते महोपकारिभ्यो भयदानं तदुच्यते प्रोक्तानि षडधिष्ठानानि अंगानि
षट् च मे शृणु दाता प्रतिग्रहीता च शुद्धिर्देयं च धर्मयुक् देशकालौ च दानानामंगान्येतानि षड् द्विजः अप
रोगी च धर्मात्मा दित्सुरव्यसनः शुचिः अनिंद्यजीवकर्मा च षड्भिर्दाता प्रशस्यते अनृजुश्चाश्रद्दधानानां ता

त्मा दृढभीरुकः असत्यसंधो निद्रालु दाता यंता मसो धमः ॥ त्रिशुक्लः कृषिवृत्तिश्च घृणालुः सक
लेंद्रियः विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते सोमुख्याद भिसंप्रीति रर्थिनां दर्शने सदा
३५ सत्कृतिश्चानुसूया च तदा शुद्धिरिति स्मृताः अपराबाधमक्लेशं स्वयत्नेनार्जितं धनं स्वल्पं वा विपुलं
वापि देयमित्यभिधीयते तेनापि किल धर्मेण उद्दिश्य किंचित्किंच देयं त धर्मयुगति शून्यशून्य
फलं मतं न्यायेन दुर्लभं द्रव्यं देशकालेपि वा पुनः दानार्हो देशकालौ तौ स्यातां श्रेष्ठौ नचान्यथा
षडंगानीति चोक्तानि द्वौ च पाकावतः शृणु द्वौ पाकौ दानजौ प्रोक्तः परत्रार्थमिहोच्यते सद्भ्यो यद्दी
यते किंचित्तत्परत्रोपतिष्ठति असत्सु दीयते किंचित्तद्दानमिह भुज्यते वैदिको दानमार्गोयं
चतुर्धा वर्ण्यते द्विजैः प्रपारामतडागादि सर्वकामफलं ध्रुवं तद्दानं त्रिकमित्याहुर्दीयते यद्दिने
दिने अपत्यविजयैश्वर्यस्त्रीबालार्थं च दीयते इच्छासंस्थं च यद्दानं काम्यमित्यभिधीयते का
लापेक्षं क्रियापेक्षं गुणापेक्ष्यमिति स्मृति त्रिधा नैमित्तिकं प्रोक्तं सदा होमविवर्जितं इति प्रोक्ता ३५
प्रकारास्ते त्रैविध्यमभिधीयते अष्टोत्तमानि चत्वारि मध्यमानि विधानतः कनीयसानि शेषाणि त्रिवि

धत्वमिदं विदुः गृहप्रासादविद्याभूकूपक्षा प्राणहाटकं एतान्युत्तमदानानि उत्तमद्रव्यदानतः
अन्नारामं च वासांसि उयप्रभृति वाहनं दानानि मध्यमानीति मध्यमद्रव्यदानतः कनीयसानि
शेषाणि त्रिविधत्वमिदं विदुः उपानच्छत्रपात्रादि दधिमध्वासनानि च दीपकाष्ठोपलादीनि चर
मं बहुवार्षिकं इति कनीयसान्याहुर्दानना शत्रयं शृणु यद्दत्वा तप्यते पश्चादासुरं तद्बुतामतं
अश्रद्धया यद्ददाति राक्षसं स्याद्वृथैव च यच्चाक्रुश्य ददात्यंग दत्वा चाक्रोशति द्विजं पैशाचं त
द्वृथा दानं दाननाशास्त्रयस्त्वमी इति सप्तपदे षं दानमाहात्म्यमुत्तमं शक्यते कीर्तितं राज
न् साधु वा साधु वा चदा धर्मवर्मोवाच अधमेसफलं जन्म अद्यमे तपसः फलं अद्य ते कृत
कृत्योस्मि कृतकृतिमतां वर पवित्रा सकलं जन्म वृथाचारी यथावृथा बहुक्लेशान्प्राप्त भार्या
सा वृथा प्रियवादि कृत्रान कृत्वा रूपं वा स च क्षारोदके वृथा बहुक्लेशैर्जन्मनीता विना धर्मेय
था वृथा एवं मे यवृथा नाम जातं तत्सकलं च यत् कृतं तस्मान्नमस्तुभ्यं द्विजोत्पन्नमानमः स
समाह पुरा विष्णुः पुरा मां विष्णुसद्मनि नाहं तथाग्नि यजमानह विस्मिता नेश्वानतत्घृतप्लुतमद

स्कं॰पु॰२ नष्टं तम्भग्मुखेन यद्ब्राह्मणस्य मुखतश्चरितानुपासं तुष्टस्य मध्यवर्हितैनिजकर्मपाकैः तन्मयाद्धर्म
३६ णावापियद्विप्रेष्वप्रियंकृतं सर्वस्य प्रभवो विप्रास्तत्क्षमंतु प्रसादये त्वं च को सीन सामान्यः प्रणम्याहं प्र
सादये आत्मानं ख्यापयमुने प्रोक्तश्चैवं ब्रुवंतदा नारद उ॰ नारदोपि नृपश्रेष्ठ स्थानकार्थी समागतः
प्रार्थये देहि मे द्रव्यं भूमितस्थानहेतवे यद्यपीयं देवतानां भूमिद्रव्यं च पार्थिव तथापि यस्मिन्योराजाका
ले प्रार्थ्यः सनिश्चितं महीश्वरस्यावतरो भर्तादाता भवश्च सः तथैव त्वामहं याचे द्रव्य श्रुधिरभीप्सया त
थैव मालयं पूर्वे देयार्थे प्रार्थनापरः राजा उ॰ यदि त्वं नारदो विप्र राज्यमस्त्वखिलं तव अहं हि ब्राह्मणानां
तदा स्वं कर्तानसंशयः नारद उ॰ यद्यस्माकं भवान्भक्तस्तत्ते कार्यं वचो न्वच प्रोक्तं द्रव्यं तयदेहि न स्त्र
च द्रव्यं भुवं च मे मह्यं सप्तगंग्यूतिमात्रां भयालोपस्य तथेति सोपि मे नेत्वहं चित्तचार्थनोपं इति श्रीस्कंद
पुराणे कुमारिकाखंडे चतुर्थोध्यायः ४ नारद उ॰ ततोहं धर्मवर्माणं प्रोक्तातिष्ठ तु धनं त्वयि कृत्य
कालं ग्रहीष्यामि स्थाय यौरैवतं गिरि आसं प्रमुतं चाहं पश्यं तं गिरिसत्तमं आवृयानं न रान्साधून्भ ३६
मेर्भुजमिवोत्थितं यस्मिन्नानाविधा वृक्षाः प्रकाशंते समंततः साधू गृहपतिं प्राप्य पुत्रभार्यादयो यथा

मुदिता यत्र संत्वृत्ता वासंते कोकिलादयः सद्गुरोर्ज्ञानसंपन्ना यथा शिष्यगणा भुवि यत्र तप्ता तपो मर्त्या
यथेप्सितमवाप्नुयुः श्रीमहादेवसामाद्य भक्तो यद्वन्मनोरथं तस्याहं च गिरः पार्थ समासाद्य महाशैलं
शीतसो वायुनोदेन प्रीणितो चिंतयं हृदि आदौ न्मायास्थानमासं यदतीव सुदुर्लभं इदानीं ब्राह्मणार्थेहं कू
र्मे तावदुपक्रमं ब्राह्मणाश्च विलोक्यो मे यो हि पात्रतमो मतः तथाहि चात्रश्रूयंते वचांसि श्रुतिवादिनं न ज
ला नरेणा न्यक्ता यद्वान्नौः कर्मवर्जिता तद्वद्दुष्टोप्यनामारो विप्रो नाधरणक्षमः ब्राह्मणोह्यनधीयानस्तृ
णाग्निरिव त्राम्यति तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते दानं पात्रमतिक्रम्य यदपात्रे प्रदीयते यदन्ने
गाम्नि क्रम्य गर्दभस्य गवान्हिकं उषारवापितं बीजं भिन्नभांडे च गोदुहं भस्मनि वहुतं द्रव्यं मूर्खे दान
म त्राश्वतं विधिहीने यथा पात्रे यो ददाति प्रतिग्रहं न केवलं हि तद्याति शेषं पुण्यं प्रणश्यति भराप्तान्
गास्तथा भोगान्सुवर्णं रहमेव च अश्वभक्षुस्त्वचं वासो घृतं तेजस्तिलाः प्रजाः घ्नंति तस्मादविद्वांस्तु वि
भियाच्च प्रतिग्रहात् स्वल्पकेनाप्यविद्वांस्तु पंके गौरिव सीदति तस्माद्धिगृह्णलपसो गृह्णस्वाध्यायसाध
काः स्वदारनिरताः शांतास्तेषु दत्तं सदाक्षयं देशे कालाद्युपायेन द्रव्यं श्रद्धासमन्वितं पात्रे प्रदीयते यत्त

स्कं.पु.२ सकलं धर्मलक्षणं न विद्यया केवलया तपसा वापि पात्रता यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रच
क्षते एतेषां तिसृणां चापि विद्या मुख्या महागुणः विद्यां विनांधवद्धि प्रपश्यंस्तु ष्मंतो हिते मताः
१० तस्माद्विप्रानृष्मातो विद्वान् देवोदेवोपरिक्षेयत् प्रश्नांश्चेन्मम वक्ष्यंति तेभ्यो दास्याम्यहं ततः
इति संचिंत्य मनसा तस्माद्देशात्समुत्थिताः आश्रमेषु महर्षीणां विचराम्यस्मि फाल्गुन इमान् श्लो
कान् गायनः प्रश्नरूपान् श्रृणुध्वतान् मातृकां को विजानाति कतीधा कीदृशाक्षरां पंचपंचा
द्भुतं गेहं को विजानाति वा द्विजः बहुरूपां स्त्रियां कर्तुमेकरूपां च वेत्ति कः को वा चित्रकथं बंधं
वेत्ति संसारगोचरः को वार्णवमहाग्राहं वेत्ति विद्यापरायणः को वाष्टविधं ब्राह्मण्यं वेत्ति ब्रा
ह्मणसत्तमः युगानां च चतुर्णां वा को मूलदिवसान् वदेत् चतुर्दशानां मनूनां वा मूलवासरं वेत्ति
कः कस्मिंश्चैव दिने प्राप्य पूर्वं वा भास्करो रथं उद्दुजयति भूतानि कृष्णाहिरिव वेत्ति कः को वास्मि
न् घोरसंसारे दक्षदक्षतमो भवेत् यथा नावप्ययिद्धो कश्चित् वेत्ति वक्ति ब्राह्मणः इति मे द्वादशाप्र १०
श्नान् ये विदुर्ब्राह्मणोत्तमाः ते मे पूज्यस्तस्मात्तेषामहमाराधकश्चिरं इत्यहं गायमानो वै भ्रमित

सकलां महीं तेचाद्धुर्दुरवयाख्याताः प्रश्नास्ते कूर्महे नमः इत्यहं सकलां पृथ्वीं विचिंत्यालब्धब्राह्म
णाः हिमाद्रिशिखरासीनो भूयश्चिंतामवाप्तवान् सर्वे विलोकिता विप्राः किमतः कर्तुमुत्सहे न
तो मे चिंतया नस्य पुनर्जाता मतिस्त्वियं अद्यापि न गतश्चाहं कलापग्राममनुत्तमं यस्मिन् विप्राः संव
संति मृत्तानि वतपांसि च चतुरासीतिसाहस्राः श्रुताध्ययनशालिनः स्थाने तस्मिन् गमिष्यामि
सुखो हचलितस्तदा खेचरो हिममाक्रम्य परं पारं गतस्ततः अद्राक्षं पुण्यभूमिस्थं ग्रामरत्नं महं
महत् शतयोजनविस्तीर्णं नानावृक्षसमाकुलं यत्र पुण्यवतां संति शतशः प्रवराश्रमाः सर्वेषाम
पि जीवानां यत्रान्योन्यन दुष्टता यत्र भातां मुनीनां यत् उपकारकरं सदा सतां धर्मवतां वृद्धा उपका
रान् शाम्यति यत्र कृतयुगस्यार्थे बीजं पार्थावशिष्यते सूर्यस्य सोमवंशस्य ब्राह्मणानां तथैव च
स्थानकं तत्समासाद्य प्रतिष्ठाहं द्विजाश्रमान् तत्रैते विविधान्वादान् वदंति द्विजोत्तमाः प्रतिप
क्षस्थापनेहोनावितं जातितथाना तत्र मधाविनः केचिदर्थमन्ये प्रपूरितं विचिक्षिपुर्महात्मा
नोनभोगतमिवामिषं तत्राहं करमुद्यम्य प्रावोचं पूर्यतां द्विजाः का कारायैः किमेतेर्वा यद्यस्ति ज्ञानशा

स्कं॰पु॰२ ठिता व्याकुरध्वं ततः प्रश्नान्समसृजं षष्ठान् बहून् ब्राह्मणा ऊ॰ वदब्राह्मणान्प्रश्नान्स्तान्श्रुत्वाधास्या
महे वयं परमोद्वेषनो लोभाः प्रश्नान्पृष्टसि यद्भवान् अहं पूर्वं विकयाते वेन्यरोधं ततः परस्परं अहं पूर्वम
१८ हं पूर्वमिति रीवायथारेण ततस्तानब्रुवप्रश्नानहं द्वादशावर्षकान् श्रुत्वोतमांमेवाचंत्त लीलायंतोमु
नीश्वराः किंते द्विजबालप्रश्नैरमिभिः स्वल्पकैरपिअस्माकं यंनिर्हिनं संमन्यसे सब्रवीलमुन् ततोतिवि
स्मितश्चाहं मन्यमानः कृतार्थतां तेषांनिर्हिनं संचित युष्माकमब्रवीलयं ततः सुतनुनामास बालोबा
लोभ्युवाचमां ममंदीयते वाणि प्रश्नैः स्वैसैस्तर्यद्विज तथापिवक्ष्मिमांयस्मान्निर्हिनं मतेभवान् सुत
नुवाच अक्षरास्तुद्विपंचाशत् मातृकायां प्रकीर्तिता ॐकारप्रथमस्तत्र चतुर्दश स्वरास्तथा स्पर्शाश्चै
वत्रयस्त्रिंशदनुस्वारस्तथैव च विसर्जनियस्यपरो जिह्वामूलियएव च उपध्मानियएवापिद्विपंचाश
दमीस्मृताः इतितेकथितासंख्या अर्थं वेषां शृणुद्विज अस्मिन्नर्थेचेतिहासं तव वक्ष्यामियःपुरा मिथिला
यांप्रवृत्तोभूद्ब्राह्मणस्यनिवेशने मिथिलायांपुरापुर्वाब्राह्मणःकौथुमाभिधा येनविद्याःप्रपठिताःभुविव
र्ततियाद्विज एकत्रिंशत्सहस्राणिवर्षाणांसकृतादरः क्षणमप्यनवच्छिन्नंपठितागेहयाभूत् ततःकेनापि

कालेनकौथुमास्याभवत्सुतः जड वद्वर्तमानः समातृकांप्रपद्यत पठित्वामातृकामन्यनोधीतिसकथंच
न ततःपितारिंवनरूपोजडं तं समभाषत अधीष्वपुत्रकाधिष्वतवदास्यामिनोदकान् अथान्यस्मै प्रदास्या
मिकन्यांयुत्पादयामिते पुत्रउ॰ तातकिंमोदकार्थायपच्यतेलोभहेतवे पठनं नामयत्पुंसांपरमार्थंहि
तत्स्मृतं कौथुमाउ॰ एवंतेवदमानस्यआयुर्भवतुब्राह्मणः साध्वीबुद्धिरियंतेस्तुकुतोनाध्येष्यतःपरं
पुत्रउ॰ तातसर्वंपरिज्ञेयंज्ञातमत्रैवचैवेयतः ततःपरंकंठशोषःकिमर्थंक्रियतेवद पिताउ॰ विचित्रंभा
षमबाउज्ञातोत्रार्थश्चकस्त्वया ब्रूहिब्रूहिपुनर्वत्साथोतुमिच्छामितेगिरं पुत्रउ॰ एकत्रिंशत्सहस्राणिप
वतापितयापितः नानातर्केनभ्रांतिरवसाधितामनसिस्वके अयंच्चायंचायमितिधर्मोयोदर्शितो दितः
तयुबालायंतेचेतस्तवस्तन्नायामिते उपदेशामुपस्वैवंथैवार्थतोसितत्ततः पाठमात्राहियविप्राद्विप
दापन्नांवाहिते तत्तेब्रवीमितद्वाक्यंमोहमार्तउमद्भुतं अकारःकथितोब्रह्माउकारोविष्णुरुच्यते मका
रश्चस्मृतोरुद्रस्त्रयश्चितेगुणास्मृताः अर्धमात्राचयामूर्ध्निपरमःससदाशिवः एवमोंकारमाहात्म्यश्रुति
रेषासनातनी ॐकारस्यमहात्म्यंयाथास्येननशक्यते वर्षाणामयुतेनापिग्रंथकोटिभिरेव च पुनर्यसार

DR. BHAU DAJI MEMORIAL

स्कं॰पु॰२ सर्वस्वं प्रोक्तं यतश्शृयतां परं ॐकारांता अकाराद्या मनवस्ते चतुर्दश स्वायंभुवश्च स्वारोचि
रोत्तमो रैवतस्तथा तामसश्चाक्षुषस्तथा वैवस्वतोधुना सावर्णिर्ब्रह्मसावर्णि रुद्रसावर्णि
३० रेवच दक्षसावर्णिरेवापि धर्मसावर्णिरेवच रौच्याभौत्यस्तथा वापि मनवोपि चतुर्दश श्वेतः
पांडुस्तथा रक्तस्ताम्रः पीतश्च कापिलः कृष्णः श्यामस्तथा धूम्रः सुपिशंगः पिशंगकः त्रिवर्णश
बलोवर्णैः कर्कंधुर इतिक्रमात् वैवस्वतरकारश्च तातकृष्णः प्रपद्यते ककाराद्या हकारांतास्त्र
यस्त्रिंशच्च देवताः ककाराद्या घकारांता आदित्या द्वादश स्मृताः धाता मित्रोर्यमा शक्रो वरु
णश्चांशुरेवच भगो विवस्वान्पूषा च सविता दशमस्तथा एकादशस्तथा त्वाष्टा विष्णुर्द्वादश उ
च्यते जघन्यजः स सर्वेषामादित्यानां गुणाधिकः ङकाराद्या बकारांता रुद्राश्चैकादशोर्वते
कपाली पिंगलो भीमो विरूपाक्षो विलोहितः अजकः शासनः शास्ता शंभुश्चंडो भवस्तथा भ
काराद्या षकारांता अष्टौ हि वसवो जताः ध्रुवो ध्वरश्च सोमश्च आपश्चैवनलोनिलः प्रत्यूषश्च ३०
प्रभासश्च अष्टौ ते वसवः स्मृताः सश्च हस्ताश्विनौ संख्यातौ त्रयस्त्रिंशदिमे स्मृताः अनुस्वारो

विसर्गश्च जिह्वामूलीय एवच उपध्मानिय इत्येते जरायुजतथांडजाः स्वेदजाश्चोद्भिजाश्चे
ति पितजीवाः प्रकीर्तिताः मवार्थकथितश्चाहं तत्वार्थं शृणु सांप्रतं ये पुमांसस्त्वमून्देवान्समा
श्रित्य क्रियापराः अर्धमात्रात्मिके नित्यपदे लीनास्त एव हि चतुर्णां जीवयोनीनां तदेव परिमु
च्यते यदाम्नन्मनसा वाचा कर्मणा च भजेत्सुरान् यस्मिन्शास्त्रे त्वमी देवा मानिता नैव पापिभिः
तच्छास्त्रं हि न मंतव्यं यदि ब्रह्मा स्वयं वदेत् अमी चेद्देवाः सर्वत्र श्रौते मार्गे प्रतिष्ठिताः पाखंड
शास्त्रं सर्वत्र निषिद्धा पापकर्मभिः तदमून्यव्यतिक्रम्य तपोदानमथो जपं ये कुर्वंति दुरात्मा
नो व यंति मरुतः पथि अहो माहस्य महात्म्यं पतत्यताविजितात्मनां पठंति मात्रकां पापाम
न्यंते न सुरानिति सूत उवाच इति तस्य वचः श्रुत्वा पिताभूदतिविस्मिताः पप्रच्छ च बहू
न्प्रश्नान्साध्यवादीत्तथा तथा मयापि तव प्रोक्तायं मातृकाप्रश्न उत्तमं द्वितीयं शृणु तं
प्रश्नं पंचपंचाद्भुतं गृहं पंचभूतानि पंचैव कर्मज्ञानेंद्रियाणि च पंचपंचापि विषया मनोबुध्य
हं मेव च प्रकृति पुरुषश्चैव पंचविंशः सदाशिवः पंचपंचभिरेतैस्तु निष्पन्नं गृहमुच्यते द

स्कं॰ पु॰ २ हेमतदिदं वेद तत्त्वतो यात्यसौ निर्वं बहुरूपां स्थितं प्राकृ बुध्यं वेदांतवादिनः साहिनानार्थभजनान्नाना
रूपं प्रपद्यते धर्मकेस्येस्य योगात्तु बहुर्धा यकैकै व च इतियो वेद तत्त्वार्थं नासौ नरकमाप्नुयात् मुनि भि
२० र्यच्चनप्रोक्तं यत्नमन्यत् देवतान् वचनं तद्बुधाः प्राहु वंधं चित्रकथं स्थिति यच्च कामान्वितं वाक्यं पंचम वा
घ्यतः शृणु एको लोभो महान्ग्राहो लोभात्पापं प्रवर्तते लोभात्क्रोधः प्रभवति लोभात्कामः प्रवर्तते लो
भान्मोहश्च माया च मानस्तंभः परासुता अविद्याप्रज्ञता चैव सर्वं लोभात्प्रवर्तते हरणं परवित्तानां परदारा
भिमर्शनं साहसानां च सर्वेषां मकार्याणां क्रियास्तथा स लोभः सहमोहेन विजेतव्यो जितात्मना दंभो द्रो
हश्च निंदा च पैशून्यं मत्सरस्तथा भवंत्येतानि सर्वाणि लुब्धानामकृतात्मनां सुमहांतापि शास्त्राणि धार
यंति बहुश्रुताः छेत्तारः संशयानां च लोभग्रस्ता व्रजंत्यधः लोभक्रोधमसक्ताश्च शिष्टाचारबहिःकृताः
अंतःक्षुरा वाग्मधुराः कूपाश्छन्नास्तृणैरिव कुर्वते ये बहून्मार्गांस्तां स्तां हेतुबलान्विताः सर्वमार्गं विलुं
पंति लोभाज्ञातिषु निष्ठुराः धर्मावतंसकाः क्षुद्रा मुष्णंति ध्वजिनो जगत् एते ते पापिनो ज्ञेया नित्यं लोभसम २०
न्विताः जनको युवनाश्वश्च वृषादर्भिः प्रसेनजित् लोभक्षयादिदं प्राप्तास्तथैवान्ये जनाधिपाः तस्मात्त्यजंति

यो लोभं ते तितिक्रामंति सागरं संसाराख्यमतोन्ये ये ग्राहग्रस्तान संशयः अथ ब्राह्मणभेदांस्त्वमष्टौ विप्रावधा
रय मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परं अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः एते ह्यष्टौ समुद्दि
ष्टा ब्राह्मणाः प्रथमं श्रुतौ तेषां परस्परश्रेष्ठा विद्यावृत्तविशेषतः ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत्
अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते एकोद्दिश्यमतिक्रम्य वेदस्याचारवानृजुः स ब्राह्मण इति प्रोक्तो नि
भृतः सत्यवाग्घृणी एकां शाखां सकल्पां च षड्भिरंगैरधीत्य च षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्
वेदवेदांगतत्त्वज्ञः शुद्धात्मा पापवर्जितः श्रेष्ठः श्रोत्रियवान्प्राज्ञः सोऽनूचान इति स्मृतः अनूचानगुणोपेतो यज्ञ
स्वाध्याययंत्रितः भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेंद्रियः ऊर्ध्वरेता भवत्यग्र्यो नियताशी न संशयी शा
पानुग्रहयोः शक्तः सत्यसंधो भवेदृषिः निवृत्तः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः ध्यानस्थो निष्क्रियो दांतस्तु
ल्यमृत्कांचनो मुनिः एवमन्वयविद्याभ्यां वृत्तेन च समुच्छ्रिताः त्रिशुक्लानाम विप्रेंद्राः पूज्यंते सवनादिषु एवं वि
धं च विप्र त्वमुक्तं शृणु युगादयः वैशाखस्य तृतीया या कृती स्यादि प्रकीर्तिता कार्तिकस्यादि नवमी क्रोधं त्रे
तादिरुच्यते माघ पंचदशी नाम द्वापरादिः स्मृता बुधैः त्रयोदशी नभस्ये च कृष्णा साहि कलेः स्मृता युगादयः

स्कं॰पु॰२ स्मृताह्येतादत्तस्याक्षयकारकाः एताश्चतस्रस्तिथयो युगाद्या दत्तं हुतं चाक्षयमाशु विद्यात् यु
गे युगे वर्षशतेन दत्तं युगादिकाले दिवसेन तत्फलं युगाद्याः कथिता ह्येता मन्वाद्याश्च शृणु सांप्रतं अ
२१ श्वयुक्शुक्लनवमी द्वादशी कार्तिके तथा तृतीया चैत्रमासस्य तथा भाद्रपदस्य च फाल्गुनस्यत्वमा
वास्या पौषस्यैकादशी तथा आषाढस्यापि दशमी माघमासस्य सप्तमी श्रावणस्याष्टमी कृष्णा त
थाषाढी पूर्णिमा कार्तिकी फाल्गुनी चैव ज्येष्ठे पंचदशी सिता मन्वंतरादयश्चैता दत्तस्याक्षयका
रकाः यस्यां तिथौ रथं पूर्वं प्राप देवो दिवाकरः सा तिथिः कथिता विप्रैर्माघे या रथसप्तमी तस्यां दत्तं
हुतं चेष्टं सर्वमेवाक्षयं मतं सर्वदारिद्र्यशमनं भास्करप्रीतये मतं नित्यं देहे जलकमात् कुर्यं बुधास्तत्श
णु तत्वतः यश्च याचनिकोऽनित्यं न स स्वर्गस्य भाजनं उद्वेजयति भूतानि यथा चोरस्तथैव सः नरकं
याति पापात्मा नित्योद्वेगकरस्त्वसौ १० इहोपपत्तिर्मम केन कर्मणा क्व च प्रयातव्यमतो भवान्म
या विचार्यं चर्यं प्रतिकारकारी बुधैः सदा कार्यो द्विजदक्षदक्षैः मासैरष्टमिरह्ना च पूर्वेण वयसायु २१
षा तत्कर्म पुरुषः कुर्याद्येनांते सुखमेधते अर्चिर्धूमश्च मार्गौ द्वौ वाकुर्वेदांतवादिनः अर्चिषा या

ति मोक्षं च धूमेनावर्तते पुनः यज्ञैरासाद्यते धूमो नैःकर्म्येणार्चिराप्यते एतयोरपरो मार्गः पाखंड
इति कीर्त्यते यो देवान्मन्यते नैव कर्माश्रममनुस्मृतान् नैतौ समयति पथानो न स्वार्थायं निरूपितः
इति ते कीर्तिताः प्रश्नाः त्वत्प्रश्ना ब्राह्मणसत्तम साधु वा साधु वा ब्रूहि स्वात्मपर्यालोकनमेव च इति श्री
स्कंदपुराणे कुमारिकाखंडे प्रश्नकथनं नाम पंचमोऽध्यायः श्रीनारद उ॰ इति श्रुत्वा फाल्गुनाहं रो
मांचपुलकीकृतः स्वरूपं प्रगटीकृत्य ब्राह्मणानिदमब्रुवं अहो धनपिता स्माकं यस्य स्रष्टस्य पा
लकाः युष्मद्विधा ब्राह्मणेंद्राः स समाह पुरा हरिः मत्तोऽप्यनंतात्सरतः परस्मात्समस्तभूतादीयतेर्न
किंचित् येषां किमुस्यादितरेण तेषां द्विजेश्वराणां मम माग्रवादिनां ते सर्वथा ह्यद्य धन्याः स्म संप्रा
प्तं जन्मनः फलं यद्भवंतो मया दृष्टाः पापापद्भववर्जिताः ततस्ते समहोत्साय ज्ञातात्तत्पुरोगमाः
अर्घपाद्यादिसत्कारैः पूजयामास मां द्विजाः प्रोक्तवंतश्च मां पार्थ वचः साधुजनोदितं धन्या वयं
हि देवर्षे त्वमस्मान् यदिहागतः कुतो वागमनं तुभ्यं गंतव्यं वा क्व सांप्रतं यत्राप्यागमने कार्यमुच्य
तां मुनिसत्तमः श्रुत्वा प्रीतिकरं वाक्यं द्विजानामिति पांडव प्रसन्नोऽहं मुनीन्द्रांस्तान् पृच्छयतां द्विजसत्तमाः

स्कं॰पु॰२ अहंहिब्राह्मणेभ्यश्चद्विप्राणांस्थानकंशुभं दातुकामोमहातीर्थेमहीसागरसंगमे परिक्ष्यब्राह्मणांस्तत्र
प्राप्तोयूयंपरिक्षिताः अहंवस्थापयिष्यामिचानुजानितद्विजाः एवमुक्तोविलोक्यैवमहीसागरसंगमः य
२२ त्रस्नातोमहातीर्थेफलंसर्वमुपाश्नुत पुनरेकोमहान्दोषोबिभीमोतितरांयतः तत्रचौरास्तुबहवोनिर्घृणाः
प्रियसाहसाः स्पर्शेषुवांउग्रांश्चेकस्मिंश्चांगच्छतिनोधनं धनेनतेनहीनानांकोदूराज्जन्मनोभवेत् वरंबुभु
क्षयायोसामाचारकरणावयं अर्जुनउवा॰ अद्भुतंवर्णतेविप्रकेहाचौराप्रकीर्तिताः किंधनंचहरस्तेतेयेभ्यो
बिभ्यतिब्राह्मणाः श्रीनारदउ॰ कामक्रोधादयश्चौरास्तपएवधनंतथा तस्यापहारभीतास्तेमामुचुरीति
ब्राह्मणाः तेनेहंप्राब्रुवंपश्चाद्द्विजानीतद्विजोत्तमाः जितक्रोधमनुष्याणांचौराकुर्वंतिकिंखलाः भयभीता
श्चालसाश्चनामहेशुचयोद्विजाः तेनाकिंनामकिंसाध्यंभूमिस्तंग्रसतेनरं शातातपउ॰ वयंचौरभयाभी
तास्तेहरंतिधनंमहत् कर्तुंतदाकथंशक्यंअगजागरणंतथा खलाश्चौरागताःक्वापितत्तोनस्थेनयावयं तस्मा
त्सर्वस्वनामोत्राभयंभीतावयंमुने प्रतिग्रहश्चयेघोराःषड्भिंग्राःफलदस्तथा एवंब्रुवतितस्मिंश्चहारीतोनाम २२
व्याब्रवीत् मूढबुध्याहिकोनाममहीसागरसंगमं सतेजश्चयत्रमोक्षश्चस्वर्गश्चकरगेतथा कलापादिषु

ग्रामेषुकोवसेतविचक्षणः यदीवासस्तमतीर्थेक्षणार्धमपिलभ्यते भयंचचौरजंसर्वंकिंकरिष्यतितत्रनः
कुमारनाथंमनसीपालकंकुर्वतादृढं साहसंचविनाभूतिनकथंचनलभ्यते तस्मान्नारदतत्राहमायास्ये
तववाक्यतः षट्त्रिंशतसहस्राणिब्राह्मणामेपरिग्रह षट्कर्मनिरताःशुद्धालोभदंभविवर्जिताः तैः
सार्धमागमिष्यामिममेदंतमनुत्तमं इत्युक्तवचनेतांश्चकृत्वाहंदंडुमूर्धनि निर्गतःसहसापार्थखचरोदि
मुदान्वितः शतयोजनमात्रंतुहिममार्गमतीत्यच केदारंसमुपायातोयुक्तस्तैर्द्विजसत्तमैः आकाशो
नसुशक्यश्चबिलेनाथसेदशकः अतिक्रांतुनाथाचतथास्कंदप्रसादतः अर्जुनउवाच कःकलापश्चत
त्ग्रामंकथंशक्यंबिलेनच कथंस्कंदप्रसादस्याद्देतन्मेब्रूहिनारद नारदउवाच केदाराधिमसंयुक्तंयो
जनानांशतंस्मृतं तदंतेयोजनशतंविस्तृतंतत्कलापकं तदंतेयोजनशतंवालुकार्णवमुच्यते शतयो
जनमात्रःसमूमिःस्वर्गस्ततस्मृताः बिलेनचयथाशक्यंगंतुतत्रशृणुष्वतत् निरन्नोवानिरुदकंदेवमारा
धयेद्गुरुं दक्षिणायांदिशितेतोनिःपापंमन्यतेयदा तदागुहोस्यदिशतिस्वप्नेगच्छतभारत तंतोगुहास्य
श्रीमतोबिलमस्तिबृहत्तरं तत्रप्रविश्यगंतव्यंक्रमाणांशतसप्तकं तत्रमारकतंलिंगमस्तिसूर्यसमप्र

स्कं॰पु॰२ मं तदग्रे मस्तिका चास्ति स्वर्णवर्णा सुनिर्मला नमस्कृत्य च तं लिंगं गृहीत्वा मृत्तिकां च तां आ
गतव्यं स्तंभतीर्थं समाराध्य कुमारकं कोलं वा कूपतो ग्राह्यं मृत्तायां निश्चितं जलं तेनोदकेन मृ
२३ त्तिकया स्नाने वद्रूपां जनं उद्वर्तनं चाद्य हस्य कदाचित् षष्ठिमे पदे नेत्रांजनप्रभावाच्च बलं प
श्यति शोभनं तेन मध्येन तृतीयातिगात्रो दूर्तप्रभावतः कारीषे नो मया सुय्यं ग्रे भक्ष्यं तेनैव कीट
कैः बिलमध्ये च संपश्यन् सिद्धान् भास्करसन्निभान् यास्येवं यास्मि सा पार्थ कलापग्राममुत्तमं
तत्र वर्षसहस्राणि चत्वार्यायुः प्रकीर्तितं फलानां भोजनं च स्यात् पुनः पुण्यं च नार्जयेत् दृष्ट्वैतत्कौ
थितं तुभ्यं मतश्चाभ्रज्ञणुध्वतत् ततः सामार्थ्यतः सूक्ष्मादं उस्याग्रे निधारयन् द्विजानहं समा
यातो महीसागरसंगमे तदेतत्कार्यमयामुक्तास्तीरपुण्याज्जलाश्रये ततो मया कृतं स्नानं सह तै
र्द्विजसत्तमैः निःशेषदोषदहनो महीसागरसंगमे पितॄणां देवतानां च कृत्वा तर्पणसत्क्रि
या जपमानापरं जप्यं निविष्टां संगमे वयं भास्करं समवेक्ष्यं तश्चिंतयंतो हरं हृदि तस्मिंश्चेवा २३
तरे पार्थ देवाः शक्रपुरोगमाः आदित्याद्या ग्रहाः सर्वे लोकपालाश्च संगताः देवानां योनयो ह्यष्टौ

गंधर्वाप्सरसां गणाः महोत्सवे ततस्तस्मिन् गीतवादित्र उत्तमे पादप्रक्षालनं कर्तुं विप्राणामु
द्यतस्त्वहं तस्मिन्काले चाश्रृणव महमातिथ्यवाक्यतां सामध्वनिसमायुक्तां तृतीयस्वरनादि
तां अतीव मनसो रम्यां शिवभक्तिभिवोत्तमां विप्रैरुत्थाय संपृष्टः कस्त्वं विप्रक चागतः किं वासा
पार्थ्यसि ब्रूहि यत्ते मनसि रोचते विप्र उ॰ मुनिः कपिलनामाहं नारदायानिवेधतां आगतः प्रार्थ
नो यव तच्छ्रुत्वाहमथाब्रुवं अन्याहं यदिहा याता: कपिल त्वं महामुने नास्त्यदेयं तवास्माभिः पा
त्रं नास्ति तवाधिकं कपिल उ॰ ब्रह्मपुत्र त्वयादेयं यदि मत्त्वं श्रृणुध्वतत् अष्टौ विप्रसहस्राणि म
मदेहीति नारद भूमिदानं करिष्यामि कलापग्रामवासिनां ब्राह्मणानामहं चैषां तदिदं क्रिय
तां च भो ततो मया प्रतिज्ञातमेवमस्तु महामुने त्वया पि क्रियतां स्थानं कापिलं कपिलोत्तमं
श्राद्धे वा प्राज्ञकाले वा ह्यतिथिर्विमुखो भवेत् यस्याश्रयमुपायात सुष्यसर्वं हि निष्फलं स गच्छेत्
रौरवान्लोकान्यो तिथिं नाभिपूजयेत् अतिथिः पूजितो येन स देवैरपि पूज्यते दानैर्यज्ञैस्त
तस्मिन्भाजितः कपिलामुनिः ततो मया मुनिः श्रीमान् हारीतो ह्ययितस्तदा पादप्रक्षालना

स्कं॰ पु॰ २ र्थो यस्मिन्देवसमागमे हारीतश्च पुरस्कृत्य वामपादं तदा स्थितः ततो हासो महाञ्जज्ञे सिद्धाप्सरसु
पर्वणा किंचित्स वक्त्रधा पृथ्वी साधुसाधु कृता द्विजाः ततो ममापि मनसि शोकवेदो महानभूत् स तां चे
२४ वतथा मेने गाथां पूर्वं बुधेरितां सर्वेष्वपि च कार्येषु हा तिष्ठेद्विगर्हितः कुर्वतामतिकार्याणि नीलापातो
ध्रुवं भवेत् ततोऽहमब्रुवं विप्रान् यूयं सर्वे भविष्यथ धनधान्यासमायुक्ता दारिद्र्यकलिलावृताः एव
मुक्ते प्रहस्यैव हारीतः प्राब्रवीदिदं तवैव यं मुने हानिर्यदस्माच्छापितो भवान् कः शापो दीयते तुभ्यं शापो
यमयमेव ते ततो विमृश्य [illegible] हमब्रुवं किमहं द्विजे तथाविधस्य भवतो वामपादप्रदानतः हारीतः
शृण्वतत् कारणं धीमान् श्रूयतामयतो भवत् इति चिंतयतश्चिन्ते हा दुःखाहं प्रतिग्रहः प्रतिग्रहेण वि
प्राणां ब्राह्मणं तेजो हि नाम्यति महादानं हि गृह्णतो ना ब्राह्मणं स्वं शुभं हि तत् यदातुर्दाता च अशुभं पृच्छ
ति स्वकं दाता प्रतिग्रहीता च वचनौ हि परस्परं मन्यते धः करो यस्य सोऽल्पबुद्धि--यते इति चिंतयतो म
ह्यं श्रूयताम् द्विनारदः निद्रार्तश्च भयार्तश्च कामार्तः शोकपीडितः हतस्वश्चान्यचिन्तश्च शून्यो ह्य तेभ
वंति च तेदेषु मतिमन् कोपं न कुर्वीथा यदि त्वया कृतः कोपस्ततस्तुभ्यमेवं हानिरियं मुने ततस्तापान्

चितश्चाहं तान्विप्रानब्रुवं पुनः धिग्मासस्तु सुदुबुम [illegible] विमृश्यार्थकारणं कुर्वतामविमृश्यैव तत्किं न स्तिनयद्भवेत्
सहसा न क्रियां कुर्यात् परं मतन्महापदं विमृश्यकारिणं धीरं वृणुते सर्व संपदः स त्वमाह महाबुद्धिश्चिरका
रीपरोऽहि सः पुरा हि ब्राह्मणं कश्चित् प्रख्यातोऽगिरसां कुले चिरकारी महाप्राज्ञो गौतमस्याभवत्सुतः चिरेण स
र्वकार्याणि यो विमृश्य प्रपद्यते चिरकार्याभिसंपत्तेश्चिरकारी तथोच्यते अलसग्रहणं प्राप्तो दुर्मेधावी तथो
च्यते बुद्धिलाघवयुक्तेन जनेनादीर्घदर्शिना व्यभिचारेण कस्मिंश्चिद्व्यतिक्रम्यापरान्सुतान् पित्रोक्तः कुपि
तेनाथ जहीमां जननीमिति स तथेति चिरेणोक्त स्वभावाच्चिरकारकः विमृश्य चिरकारित्वाच्चिंतयामास वै चि
रं पितुराज्ञां कथं कुर्यां न हन्यां मातरं कथं कथं धर्मच्छलेनास्मिन्निमज्जेयमसाधुवत् पितुराज्ञा परो धर्मः स्व
धर्मो मातृरक्षणं अस्वतंत्रं च पुत्रत्वं किं तु मां नात्र पीडयेत् स्त्रियं हत्वा मातरं च को हि जातु सुखी भवेत् पित
रं चाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात् अनवज्ञा पितुर्युक्ता युक्तं मातुश्च रक्षणं क्षमायोग्यावुभावेतौ नाति
तोदैत्याहिरण्याक्षमुखाः किल जंभस्तदाभवन्निव पश्य मामग्रसंस्थितं पश्यतालप्रतीका
शौ भुजावेतौ हरे मम वक्षश्चावज्रकठिनं मयि प्रहर सत्त्वरं इत्युक्तः केशवस्तेन रुक्मिणी सं
लिहन्रुषा मुमोच परिघं घोरं गिरीणामपि दारुणं तस्तेतस्याप्यनुपदं कालाय समयं दृढं

स्कं०पु०२ संताडयामास मथनं हृदये दृढं स पपात तथोतेभूमौ चूर्णितांगो ममार च तस्मिंनिपति
तेभूमौ प्रथने मथिते भृशं अवसादं युयुर्दैत्याः कर्मएकाकिनायथुः ततस्तेषु विषण्णेषु दानवे
७३ ष्वतिमानिषु चुकोपरक्तनयनो महिषो दानवेश्वरः प्रत्युद्यहरिरोद्रः स्वस्वबाहुबलमाश्रितः
तिक्ष्णधारेणशूलेन महिषो हरिमर्दयत् शक्त्या च गरुडो वीरो हृदये भिहनद्दृढं ततो विवस्त्रव
दनं प्रहाचलगुहानिभं ग्रस्तुमैच्छद्रणे दैत्यः सगरुत्मंतमच्युतं अथाच्युतोपि विज्ञाय दानवस्यचि
कीर्षितं वदनं पूरयामास दिव्यैरास्त्रैर्महाबलः स तैर्बाणैरभिहितो महिषोचलसन्निभः परिव
र्तितकायोर्धे पपात च मुमोह च महिषं पतितं दृष्ट्वा जीवयित्वा पुनर्हरिः महिषप्राह मत्तस्त्वंव
धं नाहसि दानवं योषिद्वध्यः पुरोक्तस्त्वं साक्षात्कमलयोनिना उत्तिष्ठ गच्छ मन्मुक्तो द्रुतमस्मान्
महारणात् इत्युक्तोहरणात स्मादेशादपगतोसुरः तस्मिन्पराङ्मुखे दैत्ये महिषे शुंभदानवः
संदृष्टोष्ठपुटापोटो भृकुटीकुटिलाननः निर्मथ्य पाणिना पाणिं धनुरादाय भैरवं सज्जीकृ ७३
त्वा महाघोरान्मुमोच शतशः शरान् ।सविन्नयाधिदट मुष्टिपातस्तत श्वाविष्णुं गरुडं च दैत्यः

बाणैर्ज्वलद्वह्निशिखानिकाशैः क्षिप्रैरसंख्यैः प्रतिघातहीनैः विष्णुश्चदैत्येंद्रशरार्दितो भृशं
मुखं हिमादाय कृतां तत्तुल्यां तयासु खंड्यास्यपिपषसंख्यशुंभस्य पुत्रं धरणीधराभं ततस्त्रि
भिः शुंभं भुजं ह्लिषघ्नासुतस्य शीर्षं दृशाभिश्चकृतुं विष्णुर्विकृष्टैः श्रवणावसानां दैत्यस्य बाणै
र्ज्वलनार्कवर्णैः स तैश्चाविद्धो व्यथितो बभूव दैत्येश्वरो विश्रुतशोणिताक्तः स तस्य किंचित् च
लितस्य धैर्याद् वीचशंखांबुजशार्ङ्गपाणि योषित्सुवध्या शरणं विमुंच शुंभाश्शुंभस्यत्यतैरर
हाभिः मनोर्हसिलंनवथैवमूढ ततोथ यातः स च शुंभदानवः जंभोथ तद्विष्णुसुखानि शा
म्यगर्जैश्चोच्चैः कृतसिंहनादः प्रोवाच वाक्यं च सलीलमोजो महाट्टहासेन जगद्विकंप्य कि
मभिस्तजलावास दैत्यैर्हीनपराक्रम मामासाद्य युद्धे तस्मिन् वदनेपौरुषं क्वचित् यत्तेपूर्वंह
तो दैत्या हिरण्याक्षमुखाः किल जंभस्तदाभवन्निव पश्यमामग्रसंस्थितं पश्यतालप्रतीका
शौ भुजावेतो हरेमम वक्षो वा वज्रकठिनं मयि प्रहरसत्त्वरं इत्युक्तः केशवस्तेन रुक्मिणीसं
लिहन्रुषा मुमोच परिघं घोरं गिरीणामपि दारुणं तस्तेतेस्याप्यनुपदं कालायसमयं दृढं

स्कं॰पु॰२ मुमोच मुद्गरं विष्णुर्द्वितीयं पर्वतं तथा तदायुद्धद्वयं दृष्ट्वा जंभोन्यस्य रथे धनुः अलुप्यपरिघं गृह्य गरुडं ते
न जघ्निवान् द्वितीयं मुद्गरं चानुगृह्य त्वा विनदन् रणे सर्वप्राणेन गां विदं तेन मूर्ध्नि जघान सः ताभ्यां चा
७२ तिप्रहाराभ्यां उभौ गरुडकेशवौ मोहाविष्टौ विचेतस्कौ मृतकल्पाविवासतां तदद्भुतं महद्दृष्ट्वा जगर्ज दैत्य
सत्तमा नेतान् हर्षमदद्भुतानिदं से हे जगन्तदा सिंहनादैस्तलोन्नादैर्धनुर्नादैश्च बाणजैः जंभं ते हर्ष
यामासुर्वासांस्याद्दुधुवुश्च ते शंखांश्च पूरयामासुश्चिक्षिपुर्देवताभृशं संत्रासमवाप्याथ महार
णहारः सर्वेनतयः परिरभ्य जंभं पराङ्मुखः संयुगत्प्रधृष्याद्व पलायनं वेगपरश्चकार इति श्रीस्कं
दपुराणे कुमारिकाखंडे विंशोध्यायः २० श्रीनारद उवा॰ तमालोक्य पलायं तं विध्वस्तध्वजकार्मु
कं दैत्यांश्च मुदितानिंद्रः कर्तव्यं नाध्यगच्छत अथायान्निकटं विष्णोः सुरेशस्त्वरयान्वितः उवाच चैनं
मधुरमुत्साहपरिबृंहितं किमभिः क्लीसैर्देवदानवैर्दृष्टमानैस्सैः दुर्जनैर्लब्धरंध्रस्य पुरुषस्य कुतः
क्रियाः शक्तेनापक्षितानीचामन्यतबलमात्मनः तस्मान्नीर्यमतिमानुपेक्षेत कथंचनं अथाग्रे
सरसंपत्त्या रथिनो जयमाप्नुयुः कस्तेसखा भवत्पूर्वं हिरण्याक्षवधे विभो हिरण्यकशिपोर्दैत्यामधुके

Dr. BHAU DAJI MEMORIAL

टभसंनिभाः विनिहत्सांस्तु संप्राप्य शलभा इव पावकं युगे युगे च दैत्यानां त्वत्तो नाशो भवेद्धुर त
थैवान्य हभीतानां त्वं हि विष्णोः सुराश्रयः एवं संनोदितो विष्णुर्व्यवर्धत महाभुजः बलेन तेजसा क्रुध्या
सर्वभूताश्रयो हरिः अथोवाच सहस्राक्षं केशवः प्रहसन्निव एवमेतद्यथा प्राह भवानस्मद्गतं वचः त्रै
लोक्यदानवान्सर्वान्दग्धुं शक्तः क्षणादहं दुर्जयस्तारकः किंतु मुक्त्वा सप्तदिनं शिशुं माहिषश्चैव शुंभ
श्च उभौ वाध्यौ च यौ पिता जंभो दुर्वाससा शप्तः शक्रवध्यो भवानिति तस्मात्त्वं दिव्यवीर्येण जहि जंभम
दोत्कटं अवध्यः सर्वभूतानां त्वामृते स तु दानवः मया गुप्तो रणे जंभो जगत्कंटकमुद्धर तदैकुंठवचः
श्रुत्वा सहस्राक्षोमरारिहा समादिशत्सुराध्यक्षान्सैन्यस्य रचनां प्रति ततश्चाभ्यर्थितो देवैर्विष्णुः सै
न्यमकल्पयत् यत्सारं सर्वलोकस्य वीर्यस्य तपसोपि च तदेकादश रुद्राश्च चक्रारचे सरान्हरिः
व्यालाद्यांगा महादेवा बलिनो नीलकंधराः चंद्रखंडत्रिपुंड्राश्च पिंगाक्षाः शूलपाणयः पिंगोत्तुंगज
टाजूटाः सिंहचर्मवसानिनः भस्मोद्धूलितगात्राश्च भुजमंडलभैरवाः कपालीशादयो रुद्रा विद्रावि
तमहासुरः कपालि पिंगलो भीमो विरूपाक्षो विलोहितः अजकः शासनः शास्ता शंभुश्चं उभवस्त

स्कं·पु·२ था एते एकादशानंतबलारुद्राः प्रभाविनः अपालयंत त्रिदशान्विगर्जत इवांबुदाः हिमाचला
मे महति कांचनांबुरुहस्रजि प्रचलच्चमहादेवंघंटासंहतमंडिते ऐरावणे चतुर्दंते मत्तमातंग
७३ मास्थितः महामदजलश्चावे कामरूपे शतक्रतुः तस्थौ हिमगिरिशृंगे भानुमानिव दीप्तिमान्
तस्यारक्षत्सदं सव्यं मारुतोमितविक्रमः जुगोपापरमग्निश्च ज्वालामालितदिग्मुखः पृष्ठरक्षो भव
द्विष्णुः समरेशः शतक्रतुः आदित्या वसवो विश्वे मरुतश्चाश्विनावपि गंधर्वा राक्षसा यक्षाः सकिंनर
महोरगाः कोटिशः कोटिशः कृत्वा वृंदं चिन्होपलक्षितं विश्वावयंतस्त्वां कीर्तिं बंदिवृंदैः पुरः
सरैः चतुर्दैत्यवधेद्दत्ता नानावर्णायुधध्वजः शतक्रतोरमरनिकायपालिताः पताकिनी
रमरनिनादनादिता सीतोन्नतध्वजपटकोटिमंडिता बभूव सादितिसुतशोककर्दनी आ
यांतीमवलोक्याथ सुरसेनां गजासुरः गजरूपी महांश्चैव संहारांभोधिविक्रमः सपरश्चायु
धो दैत्यो दनुजेनेष्टकसंपुटः ममर्द शरणे देवांश्चिक्षेपान्यान्करेण च परान्परशुराजघ्ने दैत्ये ७३
द्रोरोद्रविक्रमः तस्यैवनिघ्नतः क्रुद्धा देवगंधर्वकिंनराः मुमुचुः संहताः सर्वे चित्रशस्त्रास्त्र

संहितं परश्वधांश्चक्राणि भिंडिमान समुद्गरान् कुंतान्प्रासानसीस्तीक्ष्णान्मुद्गरांश्चापि दुः
सहान् तान्सर्वान्सोग्रसद्दैत्यो यूथपः कवलानिव कोपस्फुरतदंष्ट्राग्रः करस्फोटनेनोदयन् सुरा
निघ्नंश्चाराजेो दुःप्रेक्ष्यः सोथ दानवः यस्मिन्यस्मिन्निपतति सुरवृंदे गजासुरः तस्मिंस्तस्मिन्महा
शब्दो हाहाकारस्तजायत अथविद्रवमानं तद्बलं प्रेक्ष्य समंततः रुद्राः परस्परं प्रोचुरहंकारोद्धि
तामर्षाः भोभोगृह्णत दैत्येंद्रं भिंदतैनं महाबलाः कर्षतैनं घ्नतेतः शूलैर्भजंतैनं हि मर्मसु कपाली
वाक्यमाकर्ण्य शूलं नितशितं मुखं संमार्ज्य वामहस्तेन संरंभाद्वितेक्षणः प्रोत्फुल्लारुणनिलो
बुसंहते सर्वतो दिशः अथागद्रकुटीवक्रो दैत्येंद्राभिमुखो रणे दृढनमुष्टिबंधेन शूलं निष्टम्य
निर्मलं जघानकुंभदेशे तु कपाली गजदानवं ततोद्रश्चापिते रुद्रा निर्मलायोमये रणे जघ्नुः
शूलैस्तु दैत्येंद्रं शैलवर्माणमाहवे शुक्षावशोणितं पश्चात्सब श्रोतसुतस्यैव शूलरक्तेन रुद्र
स्य शुभ्रभगजदानवः प्रोत्फुल्लामलनीलाब्जशारदीवामलं शारः भस्मशुभ्रतनुच्छायैरुद्रैर्हसै
रिवावृतं क्रुद्धं कपालिनं दैत्यः प्रचलत्कर्णपल्लवः कथं चदंतैर्विभिदे नाभिदेशे गजासुरः दृ

स्कं॰पु॰२ ष्ठानुरक्तं रुद्राभ्यां नवरुद्रास्ततोद्रुतं ततस्तु विशिखैः शूलैः शरीरममरद्विषः ततः कपालिनस्तस्याक्रा
थं चासुरपुंगवः वेगेन कुपितो दैत्यो नवरुद्रानुपाद्रवत् ममर्द चरणाघातैर्दंतैश्चापि करेण च ततोसौ
७४ शूलयुक्तेन श्रममापादितो यथा तदा कपाली जग्राह करमस्यामरद्विषः भ्रामयामास वातीव वेगे
न च गजासुरं दृष्ट्वा श्रमातुरं दैत्यं किंचिच्छेषितजीवितं निरुत्साहं रणे तस्मिन् गतयुद्धोत्सवो भवत्
ततो श्रमत एवास्य चर्म उत्कृत्य भैरवं अवस्त्रैर्वा गरक्तौघं चकारांबरमात्मनः तुष्टुवुस्तं तदा देवा ब्रह्म
द्याश्च ऋषिभिस्तवैः जघुश्चैनं च योहन्यात् सम्प्रियेत ततस्त्वसौ दृष्ट्वा कपालिना रूपं गजचर्माम्बरावृतं चि
त्रैस्तु द्वर्दुवुर्जग्मुर्निपेतुश्च सहस्रशः एवं विलुपिते तस्मिन् दानवेंद्रे महाबले गजे मत्तमथारुह्य
तं दुंदुभिनादितं निमिरभ्यपतत् तूर्णं सुरसैन्यानि लोडयन् यां यां निमिगजो याति दिशं तां तां सवाह
नाः दुद्रुवुश्च त्रुश्चुर्देवा भयेनाकंपिता मुहुः गंधेन सुरमातंगा दुद्रुवुस्तस्य हस्तिनः पलायमानैः सैन्य
षु सुराणां पाकशासनः तस्थौ दिक्पालकाः सार्धमष्टभिः केशवेन च संप्राप्तस्तस्य मातंगो यावच्छक्रग ७४
जं प्रति तावच्छक्रगजो भीतो मुक्त्वा नादं सुभैरवं ध्रियमाणोपि यत्नेन चकार इव तिष्ठति पलायति गजे

तस्मिन्नारूढः पाकशासनः विपरीतमुखं युद्धं दानवेंद्रेण सोकरोत् शतक्रतुस्तु शूलेन निमिवक्ष्यस्य
ताडयत् गदया दंतिनं तस्य गल्लदेशे हनत् भृशं तं प्रहारमचिंत्यैवं निमिर्निर्भयपौरुषः ऐरावतं तदैंद्रे
ण मुद्गरेणाभताडयत् सहतो मुद्गरेणाथ शक्रकुंजरमाहवे जगाम पश्चात् सड्यांच पृथिवीं भूधराकृतिः
लाघवाक्षिप्रमुत्थायते लोमरमहागजः शरात्पसर्प्याथभिषितो निमिहस्तिना ततो वायुर्वेगो रुद्धो ब
ज्ञार्करपी शुलः सन्मुखो निमिमातंग कपनो चलकंपनः श्रुतरक्तो बभौ शैलो धनधातुह्रदो यथा देवे
न्द्रापि गदां गुर्वीं तस्य दानवहस्तिनः मुमोच वेगान्यपतत्सा गदा तस्य मूर्धनि गजो गदानिपातेन सतेनप
रिमूर्छितः दंतैर्भित्त्वा धरां वेगात् सपाताचलसन्निभः पतिते च गजे तस्मिन् सिंहनादो महानभूत् सर्वतः
सुरसैन्यानां गजबृंहितबृंहितं हेषारवेण चाश्वानां रणास्फोटितश्च धन्विनां गजं विनिहितं दृष्ट्वा निमिश्चापि
पराङ्मुखं सुराणां सिंहनादं च संनादितदिगंतरं जंभो जज्वाल कोपेन संदीप्त इव पावकः ततः सकोपरक्ता
क्षो धनुष्यारोप्य सायकं तिष्ठ तिष्ठाब्रवीत्तारं सारथिं चाप्यनोदयत् तमायांतमभिप्रेक्ष्य धनुष्याहितसायकं
शतक्रतुरदीनात्मा दृढमादत्त कार्मुकं बाणं चैतेऽधोतापमर्धचंद्रमजिह्मगं तेनास्य सशरं चापं चिच्छेद

स्कं·पु·२ बलवृत्रहा अपास्यतस्य तु च्छिन्नं जंभो दानवनंदनः अन्यत्कार्मुकमादाय वेगावद्भारसाधनं
शरांश्चाशीविषाकारांस्तैलधौतानजिह्मगान् शक्रं विव्याध दशभिर्जत्रुदेशेच पत्रिभिः हृदये
७५ च त्रिभिश्चैव द्वाभ्यां वा स्कंधयोर्द्वयोः शक्रोपि दानवेंद्राय बाणजालमभीरयन् अप्राप्तान् दानवें
द्रस्तु शरान् शक्रभुजेरितान् चिच्छेद शतधा कोपात् शरैरग्निशिखोपमैः ततश्च शरजालेन देवं
दानवेश्वरं आच्छादयत यत्नेन वर्षास्विव घनैर्नभः दैत्योपि बाणजालेन विव्याध सायकैः शि
तैः यथा वायुर्घनाटोपं यदवार्यं दिशामुखे शक्रोथ क्रोधसंभारनिर्विशेषं यदा दानवेंद्रत
दा चक्रे गंधर्वास्त्रं महाद्भुतं ततोस्य तेजसा व्याप्तमभूद्गगनगोचरं गंधर्वनगरैश्चापि नानाप्रा
कारतोरणैः मुंचद्भिरद्भुताकारैरस्त्रवृष्टिं समंततः तयास्त्रवृष्ट्या दैत्यानां हन्यमानां महाचमूः
जंभं शरणमागच्छत् अहि त्राहीति भारत ततो जंभो महावीर्यो विनद्य प्रहसन्मुहुः स्मरन्स्वायु
धमाचारं दैत्यानामभयं ददौ ततोस्त्रं मौशलं नाम मुमोच सुमहाभयं ततो यमुशलैः सर्वम ७५
भवत्स्फारितं जगत् तैश्च भग्नानि सर्वाणि गंधर्वनगराणि च अथाग्नेयप्रकारेण रथमश्वं गजं सुरं चू

र्णयामास तत्क्षिप्रं शतशोथ सहस्रशः ततः सुराधिपः शक्रस्त्वाष्ट्रमस्त्रमुदीरयन् संध्यमाने
ततस्तस्मिन्निश्चेरुः पावकार्चिषः ततो यंत्रमया दिव्याः प्रादुरासन् सहस्रशः तैर्यंत्रैरभवद्युद्धं मंत
रिक्षं वितारकं तैर्यंत्रैर्मौशलं भग्नं हंन्यंते चासुरास्ततः शैलास्त्रं मुमुचे जंभो यंत्रसंघातचूर्णनं
व्योमप्रमाणरूपलैस्ततो वर्षं प्रवर्तते त्वाष्ट्रेण निर्मितान्याशु यानि यंत्राणि भारत तेनोपलनिपा
तेन गतानि तिलशस्ततः ततः शिरस्सु देवानां शिलापेतुर्महाजवाः दारयंत्यश्च वसुधां चतुरं
गबलं च तत् ततो वज्रास्त्रमकरोत्सहस्राक्षः पुरंदरः ततोपलमहावर्षं व्यशीर्यत समंत
तः ततः प्रशांते शैलास्त्रे जंभो भूधरसंनिभः ऐषीकमस्त्रमकरोत्त्वरितातिपराक्रमः ऐषी
केनाग्नमन्वास्त्रं वज्रास्त्रं गिरिदारणं विजृंभ्य सथ्यैकषीके परमास्त्रे विदारुणे जज्वालुर्देवसै
न्यानि सस्यंदनगराणि च दह्यमानेष्वनीकेषु तेजसा स्त्रस्य सर्वतः आग्नेयमस्त्रमकरोद्ब
लहा पाकशासनः तेनास्त्रेण च तत्वाशमैषीकमगमत्तदा तस्मिन्प्रतिहते चास्त्रे पावकास्त्रं वि
जृंभत जज्वाल सेना जंभस्य रथः सारथिरेव च ततः प्रतिहतास्त्रोसौ दैत्येंद्रः प्रतिभानवान् वारु

स्कं॰ पु॰ २ णास्त्रं मुमोचाथ समनं पावकार्चिषां ततो जलधरैर्व्योम स्फुरद्विद्युल्लताकुलैः गंभीरारावसमाधरैश्चाभ्यप-
र्यतमेदिनी करींद्रकरतुल्याभिर्धाराभिः पूरितं जगत् शांतमाग्नेयमस्त्रं च विलोक्येंद्रश्चकार ह वाय
७८ व्यमस्त्रमतुलं तेन मेघा ययुः क्षयं वायव्यास्त्रबलेनाथ निर्धूते मेघमंडले बभ्रवानाविव्योमनीलो
त्पलदलप्रभं वायुनात्यातिरूपेण कंपिताश्चैव दानवाः नैशेकुस्तत्र ते स्थातुं रणेपि बलिनेपिये जंभ
स्ततोभवच्छैलो द्वात्रायोजनविस्तृतः मारुतप्रतिघातार्थं दानवानां बलाधिपः नानाश्चर्यसमायुक्तो ना
नाद्रुमलतावृतः ततः प्रशामितवायौ दैत्येंद्रे पर्वताकृतौ महाशनीं वज्रमयीं मुमोचाशु शतक्रतुः त
याशन्यापातितया दैत्यस्याचलरूपिणः कंदराणि व्यशीर्यंत समं तानिर्झराणि च ततः स दानवेंद्रस्य शै
लमाया न्यवर्तत निवृत्ते शैलमायोथ दानवेंद्रो मदोत्कटः बभूव कुंजरो भीमो महाशैलमयाकृतिः
ममर्द च सुरानीकं दंतैश्चाभ्यहनत्सुरान् बभंज पृष्ठतः कांश्चित्करेणाकृष्य दानवः ततः क्षपयतस्तस्य
सुरसैन्यानि वृत्रहा अस्त्रं त्रैलोक्यदुर्धर्षं नारसिंहं मुमोच ह ततः सिंहसहस्राणि निश्चेरुर्मंततेजसा ७८
दृष्टदंष्ट्रादृहासानि क्रकचाभनखानि च तैर्विपाटितगात्रोसौ गजमाया व्यपोहयत् ततश्चाशीविषो घोरो

भवत्प्राणसमाकुलः विषनिःश्वासनिर्दग्धसुरसैन्यमहारथः ततोस्त्रं गारुडं चक्रे शक्रः सम्प्रहसन्नर
णा ततो गरुत्मंतस्तस्मात्सहस्राणि विनिर्ययुः तैर्गरुत्मद्भिरासाद्य जंभं भुजगरूपिणं कृतस्तु खंडशो दै
त्यः सास्य माया प्रनश्यत मायायां च प्रनष्टायां ततो जंभो महासुरः चकार रूपमतुलं चंद्रादित्यपथानुगं
विवृत्ततनयाग्रस्तुमियेष सुरपुंगवान् ततोस्य प्राविशन्वक्त्रं समहारथकुंजरा सुरसेना विद्रुमं पाता
लोत्तालतालुकं सैन्येषु ग्रस्यमानेषु दानवेन बलीयसा शक्रो दीनत्वमापन्नः श्रांतवाहनवाहनः
कर्तव्यतां नाध्यगच्छत्सोवोचेदं जनार्दनं किमनंतरमेवास्ति कर्तव्यस्याविशेषतः तदादिशाद्य दामास्य
दानवस्यायुत्स्ततः ततो हरिरुवाचेदं वज्रायुधमुदारधीः न सांप्रतं रणं त्याज्यं शक्र कातरभैरवं माग
क्षमोहमागच्छ क्षिप्रमस्त्रं स्मर प्रभो नारायणास्त्रं प्रयतः श्रुत्वेत्थं च मुमोच सः एतस्मिन्नंतरे दैत्यो विवृ
तास्यो ग्रसत्क्षणात् त्रीणि त्रीणि च रक्षाणि किंनरोरगराक्षसा ततो नारायणास्त्रं च निपपात स्य वक्षसि
महास्त्रभिन्नहृदयः सुस्राव रुधिरं वसः तदस्त्रतेजसा रूपं तस्य दैत्यस्य राक्षितं ततश्चांतर्दधे दैत्यः कृ
त्वाट्टहासं महोत्कटं गगनस्थः स दैत्येंद्रः शस्त्रवृष्टिमतींद्रियं मुमोच सुरसैन्यानां संहारकरणीं परां

स्कं॰पु॰२ तथा परस्वधांश्चक्रवराबाणान्समुद्गरान् कुंतानृवज्रान्भिंदिमालान् योमुरवमुद्गरांस्तथा वव
र्ष दानवो रोषाद्दव्यानक्षयानपि तैरस्त्रैर्दानवान्मुक्तैर्देवानीकेषु भीषणैः बाहुभिर्धरणीपू
७७ र्णा शिरोभिश्च सकुंडलैः ऊरुभीर्गजहस्ताभैः कर्णाद्रैश्चाचलोपमैः भग्नेषुदंड्यचक्राक्षैरथैश्च
रथिभिः सह दुःसंचाराभवत्पृथ्वी मांसशोणितकर्दमा रुधिरौघहृदावार्तागजदेहशिलोच्च
या कबंधनृत्यबकुला महासुरप्रवाहिनी शृंगालगृध्रध्वांक्षाणां परमानंदकारिणी पिशा
चजातिभिः कीर्णपीत्वामिषसुशोणितं असंभ्रमाभिर्मार्याभिः सह नृत्यद्भिरुद्धतां काचित्त
न्वी प्रकुपिता गजकुंभांतमौक्तिकैः पिशाचोपत्रचात्थानां खुरान्वैमत्वमिः कृतान् कर्णपूर
षुमादंतेपश्यत्यन्यासरोषतः प्रसादयंति बहुधा महाकर्णार्थकोविदाः केचिद्वदंति भो दत्याः
भो दैत्याः प्रार्थयामहे आकल्पमेवया ख्यमस्माकं तृप्तिहेतवे केचिद्रूचुरयं दैत्यो देवायम
तिमांसलः म्रियते यदि संग्रामे तुध्रौ दृष्णोपयाचितं केचिद्धध्यन्त्सु वीरेषु सृक्किणी सलिलं ७७
तिच एतेन पयसा विदुर्जनं सुजनो यथा केचिद्रक्तनदीनां तु तीरे चास्तिकबुध्यः पितृन्दे

वांस्तर्पयंति शोणितैश्चामिषैः शुभैः केचिदामिषराशिस्था दृष्ट्वान्यस्यकरामिषं देहि देहीति
वासंतो धनिनः कृपणा यथा केचित्स्वयंप्रदृप्ताश्च दृष्ट्वा वैरवादृतैः परैः सरोषमोष्ठौ निर्मृज्य
पश्यंतिचानुसूयतः केचित्स्वमुदरं क्रुधा निदंति ताडयंति च सर्वभक्ष्यमभीप्संतो ह्यन्नस्ता
निधनं यथा केचिदाकुरद्ध्र एवश्लाघ्यास्त्वष्टिस्तु वधसः सुप्रभातं सुनक्षत्रं पूर्वमासीद्यथैव त
त् एवं बहुविधालापपलादानां ततस्ततः अदृश्यः समरे जंभो देवान्शास्त्रैरचूर्णयत् ततः
शक्रो धनेशश्च वरुणपवनोनलः यमोथ निर्ऋतिश्चापि दिव्यास्त्राणि महाबलाः आकाशामु
मुचुः सर्वे दानवायाभिसंध्यतु व्यर्थतां जग्मुरस्त्राणि देवानां दानवं प्रति यथातिक्रूरचित्ता
यां नार्यां कृतशतान्यपि गतिं न विविदुश्चापि श्रांता दैत्यस्य देवताः दैत्यास्त्रभिन्नसर्वांगा गावः
शीतार्दिता इव परस्परं विलीयंत हाहा किंभावि वादिनः तावदस्थाहरिर्दृष्ट्वा देवानुचक्रमु
वाचह अघोरमंत्रं स्मर देवराज अस्त्रं हि यत्पाशुपतप्रभावं रुद्रेण तुष्टेन तव प्रदत्तम
व्याहतं वीरवराभिघाति एवं स शक्रो हरिबोधितस्तु प्रणम्य देवं वृषकेतुमीश्वरं समाददे

स्कं॰पु॰ बाणममित्रघातनं संपूजितं देववरेणार्धचंद्रं धनुर्ध्वजज्ये विनियोज्य बुद्धिमान्ययोजयत्तत्र अघोरमंत्रं ततो
वधाय शुंभोचतस्य विकृष्य कर्णांतमुकुंद दीधितिं अथासुरः प्रेक्ष्य महास्त्रपतद्दिसृज्यमायां सहसाप्यवस्थि
७८ तः प्रेर्यमानेन मुखेन युञ्जता चेलनगाणेत्रेश्च संभ्रमाकुलः ततस्तु तस्यास्त्रवराभिमंत्रितः शरोर्धचंद्रः प्र
सभं महारणे पुरंदरस्य प्रसनप्रमुक्तो मध्यार्कबिंबं वपुषा विडंबयन् किरीटकूटस्फुरकांतिसंकुलं सुगंधना
नाकुसुमाधिवासितं प्रकीर्णधूमज्वलनाममूर्धजं निपातयज्जंभशिरः सकुंडलं तस्मिन्निहते जंभे प्रहृष्टा
सः सुराबभूवुः वासुदेवोपि भगवान् साधुसाध्विति चाब्रवीत् ततो जंभं हतं दृष्ट्वा दानवेंद्रा ससुराः सर्वे तत्र
संकल्प्याद्भुतं तारकं प्रति तांश्च त्रस्तान् समालोक्य स्तुतास्तु रोहतान् सारथिं प्रेरयामास याहीदं लघु
संगरे तथेत्युक्त्वा स च प्रायात् तारके रथमास्थिते सावलेपं च सक्रोधं सगर्वं च पराक्रमं साविस्कारं मधिको
रं प्रयातो दानवेश्वरः स युक्तं रथमास्थाय सहस्रेण गरुत्मतां सर्वायुधपरिस्कारं सर्वास्त्रपरिरक्षितं त्रैलो
क्याकृधिसंपन्नां कल्पांतांतकनादितं सैन्येन महता युक्तो नानायुधविदिग्गाद्भिः सहस्राक्षश्च तं दृष्ट्वा सहस्रा
वाहनं दंतिनं रथं मातलिना युक्तं तप्तहेमपरिष्कृतं गंधर्वकिंनरोद्गीतमप्सरोनृत्यसंकुलं सर्वायुधमहा

Dr. Bhau Daji Memorial

बाधं महारत्नसमाचितं तं रथं देवराजस्य परिवार्य समंततः देविता लोकपालाश्च तस्थुः सगरुडध्वजाः
ततश्चचाल वसुधा ववौ रूक्षो मरुद्गणः चेलुश्च सागराः सप्त तथा नष्टैव द्विवेः प्रभा ततो जज्वलुरस्त्राणि त
ताकंपंत वाहनाः ततः समस्तमुद्भूतं ततो दृष्यत तारकः एकतस्तारको दैत्यः सुरसंघास्तथैकतः लोकाव
सादमेकत्र लोकोद्धरणमेकतः चराचराणि भूतानि भयविस्मयवंति च प्रहारासुः सुरासार्थ तदतस्मिं
त्समागमे अस्त्राणि तेजांसि धनानि धैर्यं शोभाबलं विरूप राक्रमाश्च सत्वोजसाम्यंगबभूवुरेषां देवासु
राणांतपसः परंतुनः अथाभिमुखमायांतं देवावितनपर्वभिः बाणैरनलपर्वाग्रैर्विव्यधुस्तारकं प्रति
सतानिविंत्वा दैत्येंद्रो दशबाणदितान् हृदि बाणैर्व्योम दिशः पृथ्वीं पूरयामास दानवः पुंखानुपुंखैः क
र्णांतमाकृष्टैर्नगभेदिभिः ततः शतेन बाणानां शक्रं विव्याध दानवः नारायणं च सप्तत्या नवत्या चहुताश
नं दशभिर्मारुतं मूर्ध्नि यमं दशभिरेव च धनदं चैव सप्तत्या वरुणं च तथाष्टभिः विंशत्या निर्ऋतं दैत्यः पुन
श्चाष्टभिरेव च विव्याध पुनरेकैकं दशभिर्मर्मवेदिभिः तथा च मातलिं दैत्यो विव्याध त्रिभिराशुगैः गरुडं
दशभिश्चैव महिषं नवभिस्तथा पुनर्दैत्योथ देवानां तिलशो नतपर्वभिः चकार वर्मजालानि चिच्छेद च धनूं

स्कं.पु. षिच ततो विकचचोदया विधनुस्काः प्रविडिताः चापान्यन्यानि संगृह्य यावन्मुंचति सायकान्
तावद्बाणं समादाय कालानलसमप्रभं ताडयामास शक्रं स हृदि सोपि मुमोच ह ततोंतरिक्षमा
७९ लोक्य दृष्ट्वा स्कंदं सुराकृती तार्क्ष्यविष्णुसमालेभ्र शराभ्यां ताव मुचतां प्रेतनाथस्य वन्हेश्च वरुण
स्यशितैः शरैः निर्ऋतेश्चाकरोत्कायं भितभीतं विमोहयत् निरुध्यासं समाहत्य चैकैर्बाणैः स
मीरणं ततः प्राप्य हरिसंज्ञां प्रोत्साह्य स दिशांपतिन् बाणेन सारथेः कायाच्छिरोहार्षीत्सकुंडलं
धूमकेतुर्ध्वजं क्रुद्धस्तस्यच्छित्वान्यपातयत् दैत्यराजकिरीटं च चिच्छेद वासवस्ततः धनेशश्च
धनुः क्रुद्धो बिभेद बकुधाशरैः वायुश्चक्रे च तिलशो रथं चाक्षाणि कूबरं निर्ऋतिस्तिलशो वर्म
चक्रे बाणैस्तथा रणे कृते तदतुलं कर्म तिष्ठतिष्ठति प्राब्रवीत् लिहंतः रुक्मिणीदेवा वासुदेवा
दयस्तथा दृष्ट्वा तत्कर्म देवानां तारको तुलविक्रमः मुमोच मुद्गरं भीमं सहस्राक्षाय संगरे दृ
ष्ट्वा मुद्गरमायांतमनिवार्यं रणाजिरे रथादाप्लुत्य धरणीमगमत्पाकशासनः मुद्गरोपि रथोप ७९
स्थेपपात पक्षस्वनः सरथं चूर्णयामास न ममार च मातलिः गृहीत्वा पादौ दैत्यो जघानारासिके

शवं स्कंधे गुरुत्मकः सोपि निषसाद विचेतनः खड्गेन राक्षसेंद्रश्च भीत्वाभ्रमावपातयत् यमं च पा
तयामास भूमौ दैत्यो मुरवंडिना वन्हिं च भिंडिमालेन चक्रे हत्वा विचेतनं वायुं पदा तदाक्षिप्य
पातयामास भूतले धनेशं तु ततः क्रोधाकुद्दयामास कोपनः ततो देवनिकायानामेकैकं क्षण
मात्रतः तेषामवजघानासौ शस्त्रैर्बालान्यथागुरुः लब्धसंज्ञस्ततो विष्णुश्चक्रं जग्राह दुर्धरं
दानवेंद्रं वसामेदोरुधिरेणाभिरंजितं मुमोच दानवेंद्रस्य दृढं वक्षसि केशवः पपात चक्रं दै
त्यस्य पतितं भास्करद्युति व्यशीर्यताथ कायस्य नीलोत्पलमिवाश्मनि ततो वज्रं महेंद्रोपि प्र
मुमोचार्चितं चिरं तस्मिन् जयाशा शक्रस्य दानवेंद्राय संयुगे तारकस्य वपुः प्राप्य शरीरं शो
र्यशालिनः विशीर्यत विकीर्णार्चिः शतधा खंडशो गतं ततो वायुरदीनात्मा वेगेन महतान्वित
स्खलितकलनाभासमं कुशं प्रमुमोच ह विशीर्णा तस्य तत्त्वांगे दृष्ट्वा वायुर्महारुषा ततः शैलें
द्रमुत्पाट्य पुष्पितद्रुमकंदरं चिक्षेप दानवेंद्राय दशयोजनविस्तृतं महीधरं तमायांतं स
स्मितं दैत्यपुंगवः जग्राह वामहस्तेन बालः कंदुकलीलया ततस्तेनैव वाहस्य पातयामास चांत

 कं दंडं ततः समुद्यम्य कृतांतः क्रोधमूर्छितः दैत्येंद्रमूर्ध्नि चिक्षेप भ्राम्य वेगेन दुर्जयं सोसुरस्य पतन्मूर्ध्नि
दैत्यस्तं जग्रहे स्मयन् कल्पांतलोकदहनोज्ज्वालेनाशेषसंकुलम् शक्तिं चिक्षेप दुर्धर्षो दानवेंद्राय संयु
८० गे ततः सशीर्षमालेव सास्य वक्षस्यराजत ततः खड्गं समाकृष्य कोशाद्दानादाकाशनिर्मलं द्युतिभासितत्रै
लोक्यं लोकपालोपि निर्ऋतिः चिक्षेप दानवेंद्राय तस्य मूर्ध्नि पपात च पतितश्चागमः खड्गः सशीघ्रं शत
खंडतां जगाम च ततः क्रोधान्महाभैरवरूपिणं मुमोच पाशं दैत्येंद्रभुजबंधाभिलाषुकः स दैत्यभुजमासा
द्य पाशः सद्यो व्यपाद्यत स्फुरितक्रव्यक्रूरदशनालीरहीश्वरः ततोश्विनौ सचंद्रार्कौ साध्याश्च वसवश्च
ये यक्षराक्षसगंधर्वाः सर्पाश्चास्त्रैः पृथग्विधैः जघ्नुर्दैत्येश्वरं सर्वभूतयस्ते महाबलाः न चास्त्राण्यस्य स
ज्जंत गात्रे वज्राचलोपमे ततो देवानवप्लुत्य तारको दानवाधिपः जघान कोटिशः क्रोधान्मुष्टिपार्ष्णिभिरे
व च तथाविधं तस्य वीर्यमालोक्य भगवान् हरिः पलायध्वमहो देवा वदन् नेता हितो भवत् शक्रादयस्त
तो देवाः पलायनकृतादरा कालनेमिमुखैर्दैत्यैः रूपरूक्षामदालकैः मुष्टिभिः पादघातैश्च केशाक ८०
र्षैस्तैर्मुदा ताडिताः शुष्कसरितं देवमार्गा गताः दर्शिताः बहुधा चाप्यकृष्यंत लोकपाला महासुरैः ततोनि

नादः संजज्ञे दैत्यानां बलशालिनां कंपयन् पृथिवीं द्यां च पातालानि च भारत जयेति मुदिता दैत्या तुष्टुवुस्ता
रकं तदा शंखांश्च पूरयामासुर्दुंदुभीन् सहस्रशः धनुर्बाणरवांश्चोग्रान् क्ष्वेडाघातांश्च चक्रिरे मत्तां ह
र्षान्विता दैत्या ननृतुश्च ननृतुर्मुहुः ततो देवासुराः कृत्वा पशुपाल पशूनिव दैत्येंद्रो रथमास्थाय जगाम
सहितोसुरैः महीसागरकूलस्थं स तारकपुरं बली योजनद्वादशायामं ताम्रप्राकारशोभितं प्रासादैर्बहु
भिः कीर्णं दिव्याश्चर्योपशोभितं यत्र शब्दास्त्रयो नैव जीर्यंते चानिशं पुरे गीतघोषश्च ज्याघोषा भुज्यंतां वि
षयास्विति तत्प्रविश्य पुरं राजा जगाम स्वकमालयं महोत्सवेन महता पुरस्त्रीप्रतिनंदितं तत्र दिव्यां
सभां राजा प्राप्य सिंहासनस्थितः स्तूयमानो दितेः सुतैः अप्सरोभिश्च वंदितः दिव्यासनस्थैर्दैत्येंद्रैर्वृतः
सिंहोरिव प्रभुः एतस्मिन्नंतरे काचित् दिव्यस्त्री तत्पुराभवत् विस्मितैस्तैर्वृता दैत्यैः प्रावोचेदं स्मयंतीव
रूपेणानुपमा यार्थनानाभरणभूषिता तां दृष्ट्वा तारको राजा भृशं वै विस्मितोभवत् कासि देवि मम ब्रूहि म
या मम सुंदरि त्वत्समा योषितं नैव दृष्टवंतः पुरा वयं स्त्रीउवाच अहं त्रैलोक्यलक्ष्मीति विद्धि मां दैत्यसत्तम अर्जि
तातपसा यास्मि त्वया वीर्येण चाभिभो वीर्यवंतं बलवंतं तपस्विनमकातरं दातारं चापि भोक्तारं युक्तं सेवा

स्कं·पु·२ भितंनरं भीरुनिर्विघ्नमत्यर्थं साध्वीपीडाकरंनरं सर्वातिरिक्तंकिंनंस्याद्यस्वजामिदितिनंदन महेंद्रेण
चमातातेयदासाध्व्यपमानिता तदेवस्तत्प्राप्तासाविदानीलयिसंवेस तारकश्चततः प्राहपर
८३ मंत्रेतितोतदा सान्त्वयित्वेनातं देवीत्रिजगत्पूजितारमा ततोदैत्याधिपंनार्या दानवानांविभूषि
ताः विरक्तांस्यमुपादायवर्धयांचक्रिरेमुदा देवाश्चद्वारतिष्ठंतिबध्यादैत्यैर्भृत्यातुराः उपहस्यमा
नानारीदैत्यरन्यैश्चनागरैः एतस्मिन्नंतरेविष्णुदैत्यरूपंसमास्थितः उपहासकमध्यस्थोगाथेदं
प्राहबुद्धिमान् इदमल्पतरंनामयदमीषांचदृश्यते मातरक्रोधंस्मरन्राजा किंकियन्नकरिष्य
ति बलियांसंसमासाद्यनमेतयोनचास्तिसः मर्कवद्धतकाकीयैरुपायैस्तोषयतांसुराः उपहा
समुखेनाथउपदेशंहरेर्मुखात् समाकर्ण्यततोदेवामार्करूपेणसंस्थिताः नत्यंतस्तेचबद्धधौदे
त्यांश्चासुरयाचिताः भर्शंविनोदयामासुर्मुदाभोत्यानितदुः विष्णुर्दैत्यप्रतीहारंततःप्रोवाचबु
द्धिमान् विनोदायमहाराज्ञोमर्कानेतान्प्रकीर्तय प्रतीहारस्ततोहृष्टः सभामध्यंविवेशसः जा ८३
नुभ्यांधरणींगत्वाबध्वाचकरसंपुटं उवाचानाखिलंवाक्यमल्पाक्षरपरिस्फुटं दैत्येंद्रकर्मेद्वदानि।द्वा

रितिष्ठंतितेप्रभो भर्शंविनोदकारािणिस्पृहाचेंद्द्रष्टुमर्हसि तन्निशम्याब्रवीद्राजा किंचिरंक्रियते
त्वया क्षन्तायेतिवचःश्रुत्वाकालनेमींतदाब्रवीत् मर्कानेतान्महाराजोद्रष्टुमिच्छतिशीघ्रतः रक्षपा
लसहैर्भिस्त्वंराजानमनुकूलय कालमेनिरूपादायमर्कान्यातान्नृपं ततः मर्कमध्येविष्णुमर्को
यानस्यक्राचदैत्यतां ततस्तरकदैत्यस्यपुरतेनन्तुर्भृशं मर्कादैत्यकरोत्तालेर्हर्षनादविनोदितैः
ततोतिमुदितोराजातेषांन्रत्येनसोब्रवात् अभयंवोमर्कदेवास्तुप्रायच्छाम्यहंसिदं मद्गृहेस्थिय
तामेवंनचकार्यंभयंहृदि इतिश्रुत्वाविष्णुमर्कःप्रन्त्यंनमुमब्रवीत् राजन्विज्ञातुमिच्छामस्त्वयेग
हावधिंवयं एवमुक्तेप्रहस्याहतारकोदैत्यसत्तमः त्रिभूमिकंगृहमेगेहमिदंषड्वनत्रयं हारम
र्कस्ततःप्राहयद्येवंत्वंवचस्मर त्रैलोक्यंविचरंत्वेतमर्काराजन्सुनिर्भया अश्वमेधशतस्यापिस
त्वंराज्ञन्विश्राव्यते धर्ममेनंस्मरन्सत्यंवचनंकुरुदैत्यप ततःसुविस्मितोदैत्यः प्राहेदंवचनंतदा
मर्कत्वाहोप्रबुद्धोसिसत्वंब्रूहिचकोमवान् श्रीभगवानुवाच अहंनारायणोनामयदिश्चात्रमुपा
गतः देवानांरक्षणार्थायमर्करूपमुपाश्रितः तच्चेन्मान्यतेमाधर्मस्त्वयतद्वचनंस्वकं परिपाल

स्कं॰पु॰२ यतेगहंविचरंतुसुवास्त्वमी अवलेपश्चराजेंद्र नकर्तव्यस्त्वयाहृदि विरोहमितिसंविसपत्नयतोकालजंबलं

८२ पर्यायेहन्यमानानामभिहंतानविद्यते मोद्यमेतत्तुयद्दृष्टाकर्ताहमितिमन्यते ऋषिंश्चदेवांश्चमहासुरांश्च

त्रैविद्यवृद्धांश्चवनेमुनींश्च कनापदोनोपनमंतिकाले कालस्यवीर्येनतुकर्तुरेतत् नमंत्रबलवीर्येणप्रज्ञ

यापौरुषेणवा अलभ्यंलभ्यतेकालेकाले सुखोपिवंदिति नमातृपितृशुश्रूषानचदैवतपूजनं नान्योगुण

समाचारः पुरुषस्यसुखावह नविद्यानतपोदानं नमित्राणिनबांधवाः शक्रुवंतिपरित्रातुंनरकाले

नपीडितं नागामिगमनार्थंहि प्रतिघातशतैरपि शक्रुवंतिप्रतिव्यूढमृतेकालबलंनराः देहवस्तु

न्यकर्माणि जीवंवकालउच्यते द्वयोःसमागमोदैत्यः कार्याणांसिद्धिरिष्यते अहोदैत्यलाद्धिशिष्टादै

त्यानांकोटयःपुरा शाल्मेलस्तुलवक्षिप्ताः कालवातेनदुर्देशा इदंतुलब्ध्वालंस्थानमात्मानंबहुमन्यसे

सर्वभूतभवंदेयंअसाणमिवशाश्वतं नचेदमचलंस्थानमनंतंचापिकस्यचित् त्वंतुबालिशयाबुध्या ८२

ममेदमितिमन्यसे अविश्वास्येविश्वासिषिमन्यसेचाध्रुवंध्रुवं ममेदमितिमोहात्वंत्रिलोकीप्रियमीप्स्य

सि नेयंतवनचास्माकंनचान्येषांस्थिरामता अतिक्रम्यबहूनन्यांस्त्वयितावदियंस्थिता कंचित्कालमयंस्थि

त्वात्वयितारकचंचला पुंश्चलीवालितिचपलापुनरन्यंगमिष्यति सर्वलोषधिसंपन्नससरित्सर्वतारकं

तानीदानींनपश्यामियैर्भुक्तंभुवनत्रयं हिरण्यकशिपूर्वीरोहिरण्याक्षश्चपुर्जयः प्रह्लादानमुचिर्वीरो

विप्रचित्तिर्विरोचनः कीर्तिस्वरश्चवीरश्चवातापिरिल्वलस्तथा अश्वग्रीवःशंबरश्चपुलोमामधुकैटभौ

विश्वजित्प्रमुखाश्चान्येदानवेंद्रामहाबलाः कालेनाभिहताःसर्वेकालोहिबलवत्तरः सर्वैर्वर्षायुतंतप्तं

नत्वमेकोमहातपाः सर्वेसत्यव्रतपराः सर्वेचासन्बहुश्रुताः सर्वेयथार्हदातारः सर्वेदाक्षायणीसुताः

कृतकर्मांतपंतश्चकालेनप्रतिसंहृताः मुंचेनकामभोगेषुमुंचेमंश्रीभवंमदं एवंसराज्यनाशेत्वांशोकः

संपीडयिष्यति शोककालेशुचोमात्वंहर्षकालेचमाहृषः अतीतानागतेहित्वाप्रत्युत्पन्नेनवर्तय इं

द्रंचेदागतःकालःसदायुक्तमतंद्रितं क्षिमस्वनचिराद्दैत्यत्वामप्युपगमिष्यति कोहिस्थातुमलंलोके

ममक्रुद्धस्यसंयुगे कालस्तुबलवान्प्राप्तस्तेनतिष्ठसितारक त्वमेववेत्सिमांदैत्ययोहंयादृक्पराक्रमः

कल्पकल्पेमहादैत्याःकोटिशोर्बुदशोहताः योषांत्वंकोटिभागोपिपरिपूर्णोनतारकः कल्पेकल्पेस्वजामि

दंब्रह्मादिसकलंजगत् इच्छसंजीवयाम्येतदनिच्छनाशयेक्षणात्सहितानांसहेहंतुसर्वदैत्यसमायुतं

स्कं॰पु॰२ अंगुल्यग्रेण देवेंद्र पुनर्धर्मं न लोपयेत् यद्यहं प्रवरो भूत्वा धर्मं ब्रह्मपरात्मकं लोपयामि त
तः किंच धर्मोयं शरणं व्रजेत् अहं कर्तेति मानस्त्वं कर्ता यस्तु सदा प्रभुः सोयं कालः पचाद्भुश्वं
८३ वृक्षे फलमिवागतं येरेव कर्मभिः प्राप्नोति पुरुषो देहं पत्रयकालस्य चित्रतां सर्वकालव
शाद्देवं बाधव्यंधियुतैर्नरैः स्वकर्मपरिपाकस्य फलदं तं विदुर्बुधाः तस्मात्कर्म शुभं कार्यं पु का
ण्यापुण्यात्मकं जगत् पुण्येन तसैत्र स्यस्यात् दुःखं पापेन निश्चितं इति संचिंत्य देवेंद्र त्वं
वचः पापालयम् उक्तं वचनं सर्वं यदित्सेतुमिहार्हसि तारक उ॰ मामत्र संस्थितं दृष्ट्वा काल
नामपुरोर्युतं कस्य हन व्यथे बुधिम त्वारपि जिघांसतः सा तेन व्यथेत बुधिरचलात त्वदर्शि
नी ब्रवीषि यद्यत्वं वाक्यं तत्तथैव न संशयः कोहि विश्वासमर्थेषु शशेरे राशभत् कर्तुमु
त्सहेत लोके दृष्ट्वा संप्रस्थितं जगत् अहमप्येवमेवेनं लोकं जानाम्यशाश्वतं कालग्रावाहि
तं घोरे गुह्ये सतते गह्वरे इदमद्य करिष्यामि श्वः कर्तास्मीति वादिनः कालो हरति संप्राप्तान ८३
दवगदवात् उपान् इदानीं तावदेवासो मया दृष्टः कथं मृतः कालेन ह्रीयमाणानां पलायः श्रूय

तन्रणां ईर्ष्याभिमानलोभेषु कामक्रोधमयेषु च स्पृहामोहातिवादेषु लोकसक्तो न बुध्यते
गुरुं प्राप्य गुरुं वापि कृत्वा कृत्यं च केशवः जानामि त्वामहं विष्णुं सर्वभूतचरं प्रभुं किं कुर्मः स्व
स्वभावेन बलिना त्वां नमन्महे किंचित्भजंति त्वां भक्त्या वैरेण हेलयापरे सर्वे नुकंप्यास्ते तुभ्य
मंतरात्मासि देहिनां पुराणः शाश्वतो धर्मः सर्वप्राणभृतां समः तमालं ब्यमया मुक्त्वा यातिस
र्वदिवौकसः पुनमर्क स्वस्वरूपेण भ्रांतव्यं भुवनत्रये स्पृहापियत्तभागानां न कार्या समयास्त्व
यं एवमुक्ते तारकेण देवा हर्षप्रपेदिरे मुच्यते हृत लोमापि मेघोलोभो हि सोनिकान् श्री
भगवानु॰ देवेंद्र भवता त्वं ज्ञो विज्ञो ध्यानतपान्वितः कालं पश्यासि सुव्यक्तं पापावामलकं यथा
कालचारित्रतत्वज्ञः शिवभक्त महामते वत्तांगसुत धन्योसि स्पृहणीयोसि धीमत्तां यावत्तेत
पसो वीर्यं तावद्रुक्षा जगत्रयं येतेन समये नैते चरिष्यंति सुरां जगत् इत्युक्त्वा मर्क यूथेन व
तो नारायणः प्रभुः स्थानादस्मादपाक्रम्य मेरुप्रति यर्ययौ तदा ततो मेरुसमागम्य प्रोवाच व
चनं हरिः भवंतो यांतु ब्रह्माणं स धास्यति च यो हितं अप्रमत्तैः सदा भाव्यपाल्यश्च समयस्तथा

इत्युक्त्वा भगवान्विष्णुस्तत्रैवांतरधीयत प्रणतः संस्तुतो देवैर्ब्रह्माणं च सुरा ययुः देवोत्तमैस्तत्रगतैरभिष्टु
तो विदीप्तते ज्ञाभुवनत्रयेपि वत्सांगपुत्रोपि मुमोद वी शिवप्रसादेन महर्द्धिमाप्य स्वयमिंद्रो निमिर्वन्हिः
कालनेमिर्यमोपि च स्तंभश्च निर्ऋतिस्थाने महिषो वरुणस्तथा मेघो माताध्रीकारीच कुजंभो धनदोभवत्
अन्येषां चाधिकारांश्च दैत्यानां तारको ददौ इति श्री स्कंदपुराणे कुमारिकाखंडे तारकविजयः एकविंशो
ध्यायः श्रीनारद उ॰ एवंविधकृता देवा महेंद्रसहितास्तदा ययुः स्वायंभुवं धाम मर्करूपमुपाश्रिताः त
तश्च विस्मितो ब्रह्मा प्राह तान्सुरपुंगवान् स्वरूपेण हि तिष्ठध्वं नात्र वस्तारकाद्भयं ततो देवाः स्वरूपस्था स्तु
ष्टुवुः प्रणताः सर्वे पितरं पुत्रका यथा नमो जगत्प्रसूतेहेतवे पालकाय च संहर्त्रे च नमस्तुभ्यं तिस्रो व
स्थास्तव प्रभो त्वमापः प्रथमं सृष्ट्वा तासु वीर्यमवासृजः तदंडमभवद्धैमं यस्मिँल्लोकाश्चराचराः वेदेषा
ऊर्विराड्रूपं त्वामेकं रूपमीदृशं पातालं पादमूलं च पार्ष्णिपादौ रसातलं महातलं चास्य गुल्फौ जंघे चा
पि तलातलं सुतलं जानुनी चास्य ऊरू च वितलातले महीतलं च जघनं नाभिश्चास्य नभस्तलं ज्योतिः
पदमुरस्थानं स्वर्लोको बाहुरुच्यते ग्रीवा महश्च वदनं जनो लोकः प्रकीर्त्यते ललाटं च तपो लोकः शीर्ष

सत्यमुद्दिष्टं चंद्रसूर्यौ नयने दिशः श्रोत्रे नासिकाश्विनौ आत्मानं ब्रह्मरंध्रस्थमाहुस्त्वां वेदवादिनः एवं त्वामति
विराड्रूपं संस्मरंत उपासते जन्मबंधविनिर्मुक्ता यांति त्वां परमं पदं एवं स्थूलं प्राणिमध्ये च सूक्ष्मं भाव
भावे भाविनं त्वां गृणंति सर्वत्रस्थं त्वामतः प्राहुर्वेदास्तस्मै तुभ्यं प्रपन्ना हृद्विधेमः एवं स्तुतो विरिंचिस्तु
कृपयाभिपरिप्लुतः आनंनपितदा प्राह तेषामाश्वासहेतवे सर्वे भवंतो दुःखार्ताः परिम्लानखांबुजाः
भ्रष्टायुधास्तथा कस्मात्भ्रष्टाभरणवाससः सेमे वेषं कृतिर्देवा भवंतो यद्विडंबना यद्विराट्शरीरे
मे भवंतो बाहुसंज्ञकाः यथाद्य भूतिमत्त्वं धार्मिकं वार्जितं महत् तंनाम्नाह्वाउनान्मोमे बाहुस्थाने च
तमम तन्नूनं मम भग्नौ च बाहू तेन दुरात्मना येन वोपहृतं देवास्तन्मामाख्यातुमर्हथ देवा ऊचुः यो
सौ वज्रांगतनयस्त्वया दत्तवरः प्रभो भृशं विप्रकृतास्तेन स त्वं जानासि तत्त्वतः यत्तन्महीसमुद्रस्य तटं
सार्विकं तीर्थकं तदाक्रम्य कृतं तेन मरुभूमिसमं प्रभो ऋद्धयः सर्वदेवानां गृहीतास्तेन सर्वतः महा
भूतस्वरूपेण स एव च जगत्स्थितिः चंद्रसूर्यौ ग्रहास्तारा ये चान्ये देवपक्षतः तच्च सर्वं निराकृत्य स्थापि
तो दैत्यपक्षतः वयं च विध्वस्तास्तेन बहुरूपहसितास्तथा विष्णोः प्रसादान्मुक्ताश्च कथंचिदिव कष्टतः

DR. BHAU DAJI MEMORIAL

स्कं॰पु॰२ तद्वयंशरणंप्राप्ताः पीडिताः क्षुद्दशार्दिताः धर्मरक्षाकराश्चेति संचिंत्यत्रातुमर्हसि इत्युक्तः स्वात्मभूर्देवः
८५ सुरैर्दैत्यविचेष्टितं सुरानुवाचभगवान् अतः संचिंत्य तत्वतः अवध्यस्तारको दैत्यः सर्वैरपि सुरासुरैः
यस्यवध्यश्चनाद्यापि सजातो भगवान् पुमान् यमाचवरदानेनछंदयित्वानिवारितः तपसासाहसाद्दैत्योभ
त्रैलोक्यदहनात्मकः सचवव्रेवधं दैत्यः शिशुतः सप्तवासरात् सचसप्तदिनैर्बालाः शंकराद्योभविष्यति
सतीनामातुयादेवी विनष्टदक्षहेलया साभविष्यतिकल्याणि हिमशैलशरीरजा शंकरस्यचतस्याश्च प
लेः कार्यः समागमे अहमप्यस्यकार्यस्यशेषंकर्तानसंशयः इत्युक्तास्त्रिदशास्तेन साक्षात्कमलयो
निना जग्मुर्मेरुप्रणम्याथ शंकर्मरूपेणसंवृतः ततागतेषुदेवेषु ब्रह्मालोकपितामहः निशास्मारभग
वान्स्वांतनुंपूर्वसंभवां ततोभगवतिरात्रीरूपरस्थेपितामहं तांविविक्तसमालोक्यतथोवाचविभाव
रीं विभावरिमहत्कार्यंविबुधानामुपस्थितं तत्कर्तव्यंत्वयादेवीशृणुकार्यस्यनिश्चयं तारकोनामदैत्यें
द्रः सुरकेतुरनिर्जितः तस्याभावयभगवान्जनयिष्यतिचेश्वरः सुतः सभवितातस्यतारकस्यांतकार ८५
कः अहंचादापंजातस्तदापश्यंपुरस्थितं अर्धनारीश्वरंदेवंव्याप्यविश्वमवस्थितं श्रुत्वातमब्रुवंदेवंभ

जस्वेवभक्तितः ततोनारीपृथग्जातापुरुषश्चतथापृथक् तस्याश्चैवांशजाः सर्वाः स्त्रियस्त्रिभुवनेस्मृताः
एकादशाचरुद्राश्चपुरुषास्तस्यचांशजाः तांनारीमहमालोक्यपुत्रंदक्षमथाब्रुवं भजस्वपुत्रींजगती
ममापिचतवापिच पुंदुःखनरकात्त्रात्रीपुत्रीतिभाविनीत्वियं एवमुक्तोमयादक्षः पुत्रीत्वेपरिकल्प्यतां
रुद्रायदत्तवान्भक्त्यानामदत्वासतीतियत् ततः कालेनकस्मिंश्चिद्दैवमन्वेषतांपिता मुमूर्षुःपापसंकल्पो
दुरात्माकुलकज्जलः योरुद्रंनैवमन्यंतेतेस्युःकुलकज्जलाः पितरस्तेचादुरात्मानोभवंतिब्रह्मराक्षसाः
अवमानेनतस्यापियथोदयौजहौतनुं यथायज्ञःसचध्वंस्तोभवेनविदितंहितत् अधुनाहिमशैलस्यभ
वित्रीदुहिताचसा महेश्वरंपतिंसाचपुनः प्राप्स्यतिनिश्चितं तदिदंचत्वयाकार्यंमेनागर्भप्रविश्यच त
स्याश्छविकुरुकृष्णांयथाकालीभवेतसा यदारुद्रोपसहितातपस्तप्स्यतिसामहत् समाप्तनियमादेवी
यदाचामाभविष्यति स्वमेवचयदारूपंसुगौरंप्रतिपत्स्यते विरहेणहरश्चास्यामत्वाशून्यंजगत्त्रयं त
स्यैवहिमशैलस्यकंदरेसिद्धसेविते प्रतीक्षमाणस्तांदेविमुग्रसंतप्स्यतेतपः तयोःसुतस्ततपसोभ
वितायामहाव्रतः भविष्यतिसदैत्यस्यतारकस्यनिवारकः तपसोहिविनानास्तिसिद्धिःकुत्रापिशोभिते

स्कं॰ पु॰ २ सर्वासां कर्मसिद्धीनां मूलं हि तदुपच्यते त्वयापि दानवा देवी देहनिर्गतया सदा चंडमुंडपुरोगाश्च
हंतव्या लोकदुर्जयाः यस्माच्चंडं च मुंडं च देवि निहनिष्यसि चामुंडेति ततो लोके ख्याता देवी भ
८६ विष्यसि ततस्त्वां वरदे देवी लोकः संपूजयिष्यति भेदैर्बहुविधाकारैः सर्वगां कामसाधनीं
ॐकारवक्त्रां गायत्रीं त्वामर्चंति द्विजोत्तमैः ऊर्जितां बलदां चापि राजानः सुमहाबलाः वैश्याश्च भ-
क्तिमित्येव नित्यां शूद्रास्तथा शुभे क्षांतिर्मुनीनामक्षोभ्या दया नियमनामपि त्वं महोपायसंदोहा
नीतिर्नयविसर्पिणां परिच्छितिस्त्वमार्थानां त्वं महाप्राणिकामिता त्वं युक्तिः सर्वभूतानां त्वं ग
तिः सर्वदेहिनां रतिस्त्वं रतिचित्तानां प्रीतिस्त्वं हृद्यदर्शिनां त्वं कांतिः शुभरूपाणां त्वं शांतिः शुभ
कर्मिणां त्वं भ्रांतिर्मूढचित्तानां त्वं फलं क्रतुयाजिनां जलधीनां महावेला त्वं च लीलाविलासि
नां संभूतिस्त्वं पदार्थानां स्थितिस्त्वं लोकपालिनी त्वं कालरात्रिर्निःशेषभुवनावलिनाशिनी प्रि
यकंठग्रहानंददायिनी त्वं विभावरी प्रसादप्रणतानस्मान्सौम्यदृष्ट्या विलोकय इति स्तुवंतो ८६
ये देवि पूजयिष्यंति त्वां शुभे ते सर्वकामानप्स्यंति नियतं नात्र संशयः इत्युक्ता तु निशा देवि तथे

सत्कृतांजलिः जगाम त्वरिता तूर्णं गिरिं हिमगिरेर्महत् तत्रासीनां महाहर्म्ये रत्नभित्तिसमाश्र
ये ददर्श मेनामापांडुच्छविवक्त्रसरोरुहां किंचिच्छ्याममुखोदग्रस्तनभारावनामितां महौषधि
गणाबद्धमंत्रराजनिषेवितां ततः किंचित्समिलिते मेनानेत्रांबुजद्वये आविवेशासुरखारात्रिर्ब्र
ह्मणो वचनात्तदा जन्मदाया जगन्मातुः क्रमेण जठरांतरं अरंजयच्छवि देव्या गुहमातुर्विभाव
री ततो जलन्मांगल्यदां मेना हिमगिरेः प्रिया ब्राह्ममुहूर्ते सुभगे प्रसूयत शुभाननां तस्यां तु जा
यमानायां जंतवस्थाणुजंगमाः अभवन्सुखिनः सर्वे सर्वलोकनिवासिनः अभवत्क्रूरसत्वा
नांचितः शांतं च देहिनां ज्योतिषामपि तेजस्त्व समभवत्सुतरां तदा घनाश्रिताश्चौषधयः स्वादुवंति
फलानि च गंधवंति च माल्यानि विमलं च नभोऽभवत् मारुतं च सुखस्पर्शो दिशाश्च सुमनोहराः
विस्मितानि च रुतस्त्राणि प्राभ्रोदुर्वं प्रपेदिरे प्रभावस्तीर्थमुख्यानां तदा पुण्यतमोऽभवत् सत्से द
म्याध्ययने यज्ञदाने तपस्यपि सर्वेषामभवच्छ्रद्धा जन्मकाले गुहारिणे अंतरिक्षे मराश्चापि प्रहर्षोत्फुल्ल
लोचनाः हरिब्रह्ममहेंद्रार्कवायुर्वह्निपुरोगमाः पुष्पवृष्टिं प्रमुमुचुः तस्मिन्मेनागृहे शुभे मेरुप्रभृतयश्चा

स्कं॰पु॰२ पिमूर्तिमंतोमहानगाः तस्मिन्महोत्सवे प्राप्ताविरंच्याद्याः सुशोभिताः सागराः सरितश्चैव समाजग्मुश्च सर्व
८७ शः हिमशैलोभवल्लोके नदार्वीश्चराचरे सेव्यश्चाप्य अभिगम्यश्च पूजनीयश्च भारत अनुमंत्र्यात्तवंते च ज
ग्मुस्वानालयांस्तदा इति श्रीस्कंदपुराणे कुमारिकाखंडे पार्वतीजन्मद्वाविंशोध्यायः ततश्च शैलजा दे
वी चिक्रीड सुभगा तदा देवगंधर्वकन्याभिः शैलजा तु सुभगा तदा मुनीनां चापि या कन्यास्ताभिः सार्धं च शो
भना कदाचिदथमेरुस्थो वासवः पांडुनंदनः सस्मार मां ययौ चाहं संस्मृतो वासवं तदा मां दृष्ट्वा च सहस्राक्षः स
मुत्थायातिहर्षितः पूजयामास तां पूजां प्रतिगृह्याहमब्रुवं महासुरमहोन्मादकालानलदिवस्पते कुश
लं विद्यते कच्चित्तव कच्चिन्नंदसि पृष्टस्त्वेवं मया शक्रः प्रोवाच वचनं स्मयन् कुशलस्यांकुरास्तावत्सं
भृते भुवनत्रये तत्फलोदय संपत्तौ तद्वानू संस्मृतो मुने मे चास्ति सर्वमतलं वे तथापितु दृश्यते अस्य
धीतां प्रयोगव्यथितः परितोदकः निवृत्तिं परमां याति निवेद्यार्थं सुहृज्जने तद्रूपां नु शैलजां देवीं शैलेंद्रं
शैलवल्लभां हरं संश्रावय यथा वरं यत्नान्यं रोचयेदिति तदा तद्वाक्यमाकर्ण्य गतोहं शैलसत्तमं ओषधिप्रस्थ ८७
निलयं साक्षाद्दिवं दिवस्पतिं तत्र हेमस्वयं तेन महाभक्त्या निवेदिते महासने पूजितोहमुपविष्टो महासु

रः गृहीतार्थततो मां च पप्रच्छ श्लक्ष्णया गिरा कुशलं तपसः शैलः शनैः कुलानां जंबुजः अहमप्यस्य त
थोच्य प्रसवोत्वगिरीश्वरं त्वया शैलेंद्र पूर्वा वाप्यपरा च दिशां तथा अवगाह्य स्थिता वता क्षिप्यते प्राणपाल
ना अहो धन्योसि विप्रेंद्राः साहाय्येन तवाचल तपोजपव्रतस्नानैः साधयंत्यात्मनः परं यज्ञांगसाधनैः कं
श्चित्कंदकादिफलदानतः त्वं च मुद्गरसीविप्रान् किमतः प्रोच्यते तव अन्येपि जीवा बहुधा त्वामुपाश्रि
त्य भूधर मुदिता प्रतिवर्तते गृहस्थमिव पाणिनः शीतमातपवर्षांश्च क्लेशान्नानाविधान्सहान् अ
पाकरोषि जंतूनां येवंरूपा हि साधवः किमतः प्रोच्यते तुभ्यं धन्यस्त्वं प्रतिभूधर कंदरं यस्य चाध्यास्ते स्व
यं तस्य महेश्वरः इत्युक्तवति वाक्यं च यथार्थमतिफाल्गुन हिमशैलस्य महिषी मेना गाद्दिदृक्षया
अनुयाता दुहित्रा च स्वल्पापि परिचारिका लज्जावनतसर्वांगी प्रविवेशा सदो महत् ततो मां शैलमहि
षी ववंदे प्रणिपत्य सा वस्त्रनिर्गूढवदना पाणिपद्मकृतांजलिः तामहं सत्यरूपाभिराशीभिस्समवर्धयं
पतिव्रता शुभाचारा सुभगा विरसः शुभे सदा वीरवती चापि भव वंशोन्नतिप्रदे ततो हं विस्मिताक्षीं च
हिमवद्गिरिपुत्रिकां मद्वाण्यां प्रत्यवोचं मे हि बालम मोति के ततो देवी जगन्माता बालभावं स्वकं मयि

स्कं॰पु॰२ दर्शयंतिस्वपितरं कंठग्राह्यांकमाविशत् उवाचवाचतां मंदं मुनिर्वदयपुत्रिके मुनेः प्रसादतो
वश्यं पतिमास्यसि संमतं इत्युक्ता सा ततो बाला वस्त्रांतपिहितानना किंचित्सलज्जं कृतोत्कंपं प्रोच्य
८८ नोवाच किंचन ततो विस्मितचित्तः स मुपचारविदांवरः प्रत्यवोचं पुनर्देवीमेहि दास्यामि ते शु
भे रत्नक्रीडनकं रम्यं स्थापितं सुचिरं मया इत्युक्ता सा तदागत्य पितुरंकात्सवेगतः वंदमा
नाचमे पादौ मयानीतां कमात्मनः मन्यतां तां जगत्सृज्या मुक्तं बालोत्तवोचितं नतत्सन्दयामि
यत्तुभ्यं पत्प्राशीः कांतेवाच्चिता इत्युक्ते मात्रवाक्छिल्याष्छिलेंद्रमहिषीतदा भगवन्वेत्सिसर्वं त
मतीतानागतं प्रभो तदहं ज्ञातुमिच्छामि कीदृशोऽस्याः पतिर्भवेत् श्रुत्वेति स स्मितमुखः प्रा
वोचं नर्मवल्लभः न ज्ञातोऽस्याः पतिर्भद्रे वर्ततेच कुलक्षणः नग्नोऽतिनिर्धनः क्रोधी वृतः क्रूरः
श्वसर्वदा श्रुत्वेति संभ्रमाविष्टो ध्वस्तवीर्यो हिमाचलः मां तदा प्रत्युवाचेदं साश्रुकंठो महागि
रिः अहो विचित्रः संसारे दुर्विद्यो महतामपि सुखवस्त्वपि शक्याया नरेषु नक्रपायेत यत्नेनम ८८
हतातावत् पुण्यैर्बहुविधैरपि साध्यस्तात्मनो लोके मानुष्यमतिदुर्लभं अध्रुवं ततु ध्रुवं तत्र

कथंचित्सांसारिकः स्यते तत्रापि दुर्लभा नाम समानव्रतचारिणी साध्वी महाकुलेत्पन्ना भार्या या स्या
त्पतिव्रता तत्रापि दुर्लभं यच्च तया धर्मनिषेवणं सहवेदपुराणोक्तं जगत्त्रयहितावहं एतत्सुदु
र्लभं यच्च तस्यां चैव प्रजायते तदपत्यमपत्यार्थं संसारे किल नारद एतेषां दुर्लभानीह किंचित्प्रा
प्नोति पुण्यवान् सर्वमेतदमाप्नोति सकोऽपि यदि वानवा किंचित्केनापि हि स्यूनं संसारके कृतेन
रं अथ संसारिको दोषः स्वकृतं यत्र भुज्यते गार्हस्थ्यं च प्रशंसंति वेदाः सर्वेऽपि नारद नेति
किंचित्तत्र पुनः कथं ते यदि नग्रहि अतो धात्रा च शास्त्रेषु सुतलाभ प्रशंसितः पुनश्च सृष्टि
वृध्यर्थं नरकत्राणनाय च तत्र स्त्रीणां समुत्पत्तिं विना सृष्टिर्न जायते सा च जातिप्रकृत्यैव कृ
पणा दैन्यभागिनी तासामुपरि मावज्ञा भवेदिति चैव वेधसा शास्त्रेषूक्तमसंदिग्धं वाक्यमे
तन्महत्फलं दशपुत्रसमा कन्या दशपुत्रान्प्रवर्धयन् यत्फलं लभते मर्त्यस्तल्लभ्यं कन्ययै
कया तस्मात्कन्यापितुः शोच्या सदा दुःखविवर्धिनी यापि स्यात्पूर्णसर्वार्था पतिपुत्रधनान्वि
ता तयात्कं च कृते त्वस्यास्तद्वाक्यं मम शोकदं केन दोषेण मे पुत्री न योग्या आशिषां मता

स्कं॰पु॰ नजातास्या पतिः कस्माद्वर्ततेविकुलक्षणः निर्द्धनश्च मुनेः कस्मात्तेषांसर्वदः कुतः इतिदुर्घटवा
क्यंते मनोमोहयतीवमे इतितत्पुत्रिवात्सल्यात्सभार्यश्शोकसंप्लुतं अहमाश्वासयंवाग्भिस्ताभिपांडु
८८ नंदन माशुचः शैलराजत्वं हर्षस्थानेतिपुण्यभाक् शृणुतद्वचनं मह्यं यन्मयोक्तं हितार्थवत् जगन्मातालि
यंबाला पुत्रिते सर्वसिद्धिदा पुराभवेभवङ्गार्या सतीनाम्नाभवस्वया तदस्याः किमहंदद्रिखंदूपमिवा
ल्पकः संचिंतयति महादेवानाशिषंदत्तवानहं नजातास्या पतिश्चेति वर्ततेच मयोहिसः नसजातोमहा
देवोभूतभव्यभवोद्भवः शरण्यश्शाश्वतः शास्ता शंकरः परमेश्वरः सर्ववेदायसद्मामनंति दैवैश्चासु
रैरपियो नलभ्यः ब्रह्मादिविश्वं नतुयस्य शैल बालस्यवाक्रीडनमामनंति सचामंगल्यशीलोपि मं
गलायतनोहरः निर्धनः सर्वदाश्चासोन्वेदस्वंस्वयमेवसः सचदेवोजस्थाणुमहादेवोजरोहरः भ
विष्यतिपतिः सौम्यास्तत्किमर्थंतुशोचसि इतिश्रीस्कंदपुराणे कुमारिकाखंडे कुमारेशमहात्म्ये हि
मवदाश्वासनं तृतीयविंशोध्यायः नारद उ॰ एवंश्रुत्वासभार्यः सप्रमोदप्लुतमानसः प्रणम्यमामि
तिप्राह यद्येवंपुण्यवानहं पुनःकिंचित्तवक्ष्यामि पुत्र्यामेदक्षिणेकरः उत्तानः कारणंकिंतच्छ्रोतुमिच्छामि

Dr. BHAU DAJI MEMORIAL

नारद इति पृष्टोस्मि शैलेन प्रावोचंकारणंतदा सर्वदेवकरोह्यस्याः सर्वेषांप्राणिनांप्रति अभयस्य
प्रदातासावुत्तानस्तुकरस्ततः यषांभार्या जगद्भर्तुर्यषांकस्यमहीधर जननीसर्वलोकस्यभाविनीभूत
भाविनी तद्यथा शीघ्रमेवैषा योगंयातुपिनाकिना त्वयाविधेयंविधिवत् तथाशैलेंद्रसत्तम अस्त्यत्रसु
महत्कार्यं देवानां हिमभूधर इतिप्रोक्त्वा तमापृच्छ्य प्रावोचंवासवायतत् ममभूयस्तुकर्तव्यंतन्मयाकृ
तमेवहि किंतुपंचशरः प्रेर्य कार्यशेषत्रवासव इत्यादिश्यगतश्चाहं तारकंप्रतिफाल्गुनः कल्पयन्वा
तस्यैनंमर्थंकथयितुंस्फुटं हिमाद्रिरपिमेवाक्यप्रेरितः पार्वतीप्रति भवस्याराधनंकर्तुं ससमादिशत्त
दा सातंपरिचचारेरं तस्यादृष्ट्वासुशीलतां पुष्पतोयफलाद्यानि नियुक्तापार्वतीव्यधात् महेंद्रोपिच
तद्वाक्यात्स्मरंसस्मारभारत सचतत्स्मरणंज्ञात्वा वसंतऋतुसंयुतः चूतांकुरा[illegible]स्त्रः सहसाप्रादुरा
सान्मनोभवः तमाहचवचोधामान् स्मयन्निवचसंस्पृशन् उपदेशेनबहुना किंत्वांप्रतिरतिप्रिया चित्ते
वसति तेनत्वंवेत्सिभूतमनागतं तथापित्वांवदिष्यामि स्वकार्यपरतांस्मरन् ममैकंसुमहत्कार्यंकर्तु
मर्हसिमन्मथ महेश्वरंकृपानार्थं सतीभार्यावियोजितं संयोजयपुनर्देव्याहिमाद्रिगृहजातया देवि

स्कं·पु·२ देवश्चतुष्टोते करिष्यत मेहेप्सितं मदनउवाच० अलीकमेतद्देवेंद्र सहि देवस्तेयारतिः नाल्पासि
दयितद्यानि तेजांसि मनुरब्रवीत् वेदोतश्च चमाविप्रागर्हयंतिपुनः पुनः महाशनो महापाप्मा
१० कामोयमनलो महनू आवृतं ज्ञानमेतेन ज्ञानिनोनित्यवैरिणा तस्माद्यं सत्याज्यः कामोहिरि
वसत्तमा एवंशीलस्यमेकस्मात्तुष्यति महेश्वरः मद्यस्येवपापस्य वासुदेवो जगद्गुरुः इं
द्रउ० मैवंब्रूहि महाभाग त्वांविना कः पुमान् भुवि धर्ममर्थं तथा कामं मोक्षंवा प्राप्तुमीश्वरः यत्
किंचित्साध्यते लोके मूलं तस्य कामना कथं कामं विनं दंति तस्मात्ते मोक्षसार्धकः सत्वंचापि
श्रुते वाक्यं तवरूपं त्रिधागतं तामसं राजसं चैव सात्विकं चापि मन्मथ अमुक्तितः कामनाया
रूपं तत्तामसं तव सुखबुध्यास्पृहा यान्वरूपं तद्राजसं तव केवलं मावधार्थार्थं तद्रूपं सात्विकं
तव तत्ते रूपत्रयमिदं ब्रूहि नापासं तद्धिकः त्वंसाक्षात्परमं सूक्ष्मः कुरु कार्यमिदं हि नः अथ
वापी तान्दृष्ट्वा सामान्यानपि पंडितः स्वप्राणैरपि त्रायंति परमेतन्महत्फलं इति संचिंत्य कार्यं १०
त्वं सर्वथा कुरु तत्स्फुटं इत्याकर्ण्य तथेत्युक्त्वा वसंतऋतुसंयुतः विकादिसैन्यसंपन्नो हिमाद्रौ

प्रययौ स्मरः तत्रापश्यत शोभोसपुण्यमाश्रममंडलं नानावृक्षसमाकीर्णं शांतसत्वसमाकु
लं तत्रापश्यत् त्रिनेत्रस्य वीरकं नाम द्वारपं यथा साक्षान्महेशानं गणाश्चायुतसोऽस्य च दद
र्श च महेशानं नासाग्रकृतलोचनं देवदारुद्रुमच्छायावेदिकामध्यमाश्रितं समकायसुखा
सीनं समाधिस्थं महेश्वरं निस्तरंगं विनिर्गृह्य स्थितमिंद्रियगोचरान् आत्मानमात्मा देवं प्र
विष्टं तपसो निधिं तं तथाविधमालोक्य सागर्भे द्वायपत्नचात् भ्रमरध्वनिव्याजेन विवेश
मदनो मनः एतस्मिन्नंतरे देवो विकासितविलोचनः सस्मार नगराजस्य तनयां रक्तमान
सः निवेदिता वीरकेण विवेशोच गिरेः सुता यस्मिन्काले महाभागा सद्यायद्दृष्टिपातिसा
ततस्तस्यां मनस्त्रियमनुरक्तमवेक्ष्य च निगृह्य लीलया देवः स्वकं पृष्ठमवेक्षत तावदा
पूर्णधनुषमपश्यत रतिप्रियं तन्नाशाकपया देवो नानास्थानेषु सोगमत् तावत्पश्यति
पृष्ठस्थमाकर्णधनुषः शरं सनदीपर्वतांश्चैव आश्रमान्सरसीस्तथा परिक्रम्य महादेवः
पृष्ठस्थं तमवेक्षत जगत्त्रयं परिभ्रम्य पुनरायात्स्वमाश्रमं पृष्ठस्थमेव तं वीक्ष्य निश्वासं मुमुचे

स्कं॰पु॰२ हरः ततस्तृतीयनेत्रोत्थवन्हिना नाकवासिनां ऋण्वतां गमितः कामो भस्मत्वं पांडुनंदन सतु तं भस्मसात्कृत्वा
हरनेत्राद्भवोनलः व्यजृंभत जगद्दग्धुं ज्वालापूरितदिङ्मुखः ततो भवो जगद्धेतोर्व्यभजज्जातवेदसं साहंकारेज
९३ नेचंद्रे सुमनःसु च गीतके भृंगेषु कोकिलास्येषु विशेषु स्मरानलं तत्राभोत्स्निहसयुक्तं कामिनां हृदयं
किल द्वालयसनिशं साग्निदुश्चिकित्स्यासुखावहः विलोक्य हरनिश्वासद्वालभस्मीकृतं स्मरं विललाप र
तीदीना माधुना बंधुना सह विलपंती सुबहुशो मधुना परिसांत्विता एतत्प्रलापमाकर्ण्य देवदेवो वृषध्व
जः कृपया परया प्राह कामपत्नीं निरीक्ष्य च अमूर्तोपि ह्ययं भद्रे कार्यं सर्वं पतिस्तव रतिकाले ध्रुवं बाले करि
ष्यति न संशयः यदि विष्णुश्च भविता वसुदेवात्मजो विभुः तदा सुतोयं स्यात्तत्पतितस्ते भविष्यति सा प्र
णम्य ततो रुद्रमिति प्रोक्ता रतिस्ततः जगाम स्वेच्छया गत्वा वसंतादिभिरन्विताः इति श्रीस्कंदपुराणे कुमारि
काखंडे कामदहनोनाम चतुर्थविंशोध्यायः अर्जुन उ॰ देवर्षे वर्ण्यते चेयं कथा पीयूषसोदरा पुनरे
तन्मुने ब्रूहि यदा वेत्ति महेश्वरः भगवान्स्वां सती भार्यां विधार्थं चापि तारकं सत्याश्च विरहातप्यन् ददाह कि ९३
मसौ स्मरन् त्वयि वा कः स विरहात्तस्यास्तप्यति वै तपः हिमाद्रिमास्थितो देवस्तस्याः संगमवांछया श्रीनारद उ॰

सत्यमेतत्पुनः पार्थ भवत्स्येदं मनीषितं अतप्ततपसा योगो न कर्तव्यो मयानया तेपा विनाशुक्षोदेहं न कथं
च न जायते अशुक्षो देहन समं संयोगो नैव देहिकः महत्कर्माणि यानीह तेषां मूलं सदा तपः नातप्तत
पसां सिद्ध्यं महत्कर्माणि यांतवे एतस्मात्कारणाद्देवो दर्पितं तदा दहत् ततो दग्धे स्मरे चापि पार्वतीमपि
पीडितां विहायसगणो देवः कैलाशः समपद्यत देवी च परमोद्विग्ना प्रस्खलंती पदे पदे जीवितं स्वं
विनिंदंति बभ्राम तत्र तत्र सा हिमाद्रिरपि स्वशृंगे रुदंतीं दृष्टवान् रतिं कासि कस्यासि कल्याणि कि
मर्थं चापि रोदिषि पृष्टा सा च रतिः सर्वं यथावृत्तं न्यवेदयत् निवेदितं तथा रत्या शोकसंभ्रांतमानसः
प्राप्य सांतनयां पाणावादाय गात्स्वकं पुरं सा तत्र पितरौ प्राह सखीनां वदनेन च दुर्भगेन शरीरेण किम
माननकारणं देहयासं परिसक्ष्ये पाप्स्याभिमतं प्रति असाध्यं चाप्यभीष्टं च कथं प्राप्यत थो विना निय
मैर्विविधैस्तस्माच्छोषयिष्ये कलेवरं अनुजानीत मां तत्र यदि वः करुणा मयि श्रुत्वेति वचनं माता पिता च
प्राहतां शुभां उमेति चपलं पुत्री नक्षयं तावकं वपुः सोढुं क्लेशान्स्वरूपस्य तपसः सौम्यदर्शने भाविन्य
प्यनिवार्याणि वस्तूनि च सदैव तु भाविनोर्थाभवं त्येव नरस्यानिच्छतोपि हि तस्मान्न तपसा तत्ते बाले किं

स्कं.पु.२ चिरंयोजनं श्रीदेव्युवाच यदिदं भवतो वाक्यं न सम्यगिति मे मतिः केवलं न हि दैवेन सामर्थ्योहि
शक्यते किंचिद्देवस्य तु किंचित्किंचिद्देव स्वभावतः पुरुषः फलमाप्नोति चतुर्थं नात्र कारणं
९२ ब्रह्मणा वापि ब्रह्मत्वं प्राप्तं किल तपोबलात् अन्यैरपि च यल्लब्धं तेन संख्यातुमुत्सहे अध्रुवेण
शरीरेण यद्यभीष्टं न साध्यते पश्चात्स शोच्यते मंदः पतिते तस्मिन् शरीरके यस्यं देहस्य धर्मोयं
कश्चिज्जायेत्कश्चिन्म्रियेत क्वचिद्गर्भगतं नश्येत् जातमात्रं कश्चित्तथा बाल्ये च यौवने वापि वार्ध
केपि विनश्यति तेन चंचलदेहेन कोर्थः स्वार्थो न चेद्भवेत् इत्युक्त्वा स्वसखीयुक्तापि तन्भ्यां साश्रु
विक्षिता शृंगं हिमवतः पुण्यं नानाश्चर्यं जगाम सा तत्रांबराणि संत्यज्य भूषणानि च शैलजा
संवीता वल्कलैर्दिव्यैस्तपात्यन्त संयुता ईश्वरं हृदि संस्थाप्य प्रणवाभ्यसनादृता मुनीनाम
प्यभन्मान्या तदानीं पार्थिपार्वती त्रिस्नाता पाटलीपत्रभक्षकाभूत्तांतं समाः शातं च बिल्वपत्रेण ९२
शीर्णेन कृतभोजना जलभक्षा शतं चाभूच्छतं वैवायुभोजनाः ततो जगत्समालोक्य तदीयतप
सार्जितं हरस्तत्रा ययौ साक्षात् ब्रह्मचारी वपुर्द्धरः वसनो वल्कलं दिव्यं रौरवाजीनसंवृतः सुल

क्षणाषाढधरः सद्वृतः प्रतिभानवान् तस्तस्तं पूजयामासुस्तत्सख्यो बहुमानतः वक्तुमिच्छुस्तौ
लपुत्रीं सखीभिरिति प्रोचितः अलं नियं महाभागा गृहीतनियमा शुभा मुहूर्तपंचमात्रेण निय
मोस्याः समाप्यते तत्प्रतीक्षस्व संकालं पश्चाद स्मत्सखीसमं नानाविधा धर्मवार्ताः प्रकरिष्यसि
ब्राह्मण इत्युक्त्वा विजयाद्यास्तां देवीचरितवर्णनैः अश्रुमुख्याद्द्विजस्याग्रे निन्युः कालं च तदोत
ततः कालं किंचिदूने ब्रह्मचारी महामतिः विलोकनमिषेणागाद् आश्रमापस्थितं ह्रदं निपपात
च तत्रासौ चुक्रोशार्ततरां ततः अहमत्र निमज्जामि कापि मामुद्धर प्रभो इति स्वरेण क्रान्तं तं श्रु
त्वा तं विजयादिकाः आजग्मुस्त्वरयायुक्ता ददौ तस्मै करं यताः स चुक्रोशधततोगाद् दूरं दूरं पुनः पु
नः नाहं प्रसह्य संस्पृष्टुं म्रियमानान्न तेलिदं ततः समाप्तनियमा पार्वती स्वयमाययौ सव्यं करं द
दावस्य तं चासौ नाभ्यनंदत भद्रे यच्छुचितेवस्या मथैवा न तत्याकृतं स दोषेण कृतं यच्च तदा दद्या
न कर्हिचित् सव्यं वाश्युचितहस्तं नाव लंबामि कर्हिचित् इत्युक्ता पार्वती प्राह नादं दत्तं च दक्षिणं
ददामि कस्यचिद्धि प्रदेवंदेवाय कल्पितं दक्षिणं मे करं देवो गृहीता भावएव च शीर्यते वाश्चतप

स्कं॰पु॰२ साससखीमेतन्मयोदितं विप्र उ॰ विद्धि वमवेलपस्ते गमनं कथं वायते तथा तव प्रतिज्ञेयं ममापीयं तथाचला
रुद्रस्यापि वयं मान्या कीदृशं ततयोवद विषमस्थं यत्र विप्रं म्रियमाणमुपेक्षसि अवजानासि विप्रांस्त्वं
९३ तच्छीघ्रं व्रज दर्शनात् यदि वा मन्यसे पूज्यां ततो मुध्धरनान्यथा ततो विचार्य बहुधा इति चेति च सा शु
भा विप्रस्योद्धरणं सर्वधर्मेभ्यो मन्यथाधिकं ततः सा दक्षिणं दत्वा करं तं प्रोज्जहार च नरं नारिप्रोद्धर
ति मज्जंतं भवभाब्धौ एतत्संदर्शनार्थाय यथा चक्रे भवोद्भवः प्रोक्तश्च ततस्तां सा बध्वा योगासनस्थि
ता ब्रह्मचारी ततः प्राह प्रहसन् किमिदं शुभे कर्तुकामासि तन्वंगि दृढयोगासनास्थिता देवी प्राह दग्धा
लयिष्ये शरीरं योगवह्निना महादेवकृतमतिः रुच्छिष्टा इयं ततो भवं ब्रह्मचारी ततः प्राह काचिद्ब्राह्मण
कन्यया कृत्वा वार्तां ततस्त्वीयमभीष्टं कुरु पार्वती नोपहन्याकदाचिद्धि साधुभिर्विप्रकामना धर्ममे
नं मन्यसे च मुहूर्तं ब्रूहि पार्वती देवि प्राह ब्रूहि विप्र मुहूर्तं संस्थितास्म्यहं ततस्स यज्ञवी प्राह देवीं तां स्व
सखीयुतां किमर्थं मतिरंभोरु नवे वयसि दुश्चरं ततस्त्वया समाध्धं नानुरूपं विभाभिमे दुर्लभप्राप्य ९३
मानुष्यं गिरिराजगृहेधुना भोगांश्च दुर्लभान्देवी सत्यक्त्वा किं क्लिश्यते वपुः अतीवहृद्यकौशलासुकुमार

तराकृतिः अत्युग्रतपसा कृष्यपद्मिनीव हिमार्दिता इदं चान्यत वशुभे शिरसो रोगदं मम यदेहं स
कुकामात्वं प्रबुद्धा नासि बालके वामः कामो मनुष्येषु सत्यमेतद्वचो यतः स्पृहणीया तिसर्वेषामेवं पी
ड्यसे वपुः अविज्ञातान्वयो नग्नः शूली भूतगणाधिपः श्मशाननिलयो भस्मोद्धूलनो वृषवाहनः ग
जाजिनी द्विजिह्वाद्यालंकृतांगो जटाधरः विरूपाक्षः कथंकारं निर्गुणस्याप्त्वया न्वितः गुणा ये कुलशीला
द्याचराणामुदिता बुधैः तेषामेकोपि नो वास्ति अस्मिंस्तेनान्वितः सति शोचनीयतमा पूर्वमासीत्सार्वति
कौमुदि त्वं संवृत्ता द्वितीयासि तस्या स्तत्संगमाशया तपोधनाः सर्वसमावयं यद्यपि पार्वती दुनोत्स वत
वारं भः शीलयायाश्चधसाक्रिया वृषभारोहणं वासः श्मशाने पाणिसंग्रहः सव्यलुपाणिना क्षौमगजल
रबंधनः कथं जनहास्यकरं सर्वं त्वया रब्धं असांप्रतं स्त्रीभावाद्वृति संपर्कः कथं चाभिमतस्तव निवर्तय म
नस्तस्मादस्मात्सर्वविरोधिनः मृगाक्षि मदनारातेर्मर्कटाक्षस्य प्रार्थय विरुद्धं वदनं चैव ब्रह्मचारिणमी
श्वरं निशाम्य कुपिता देवी प्राह वाचा सगद्गदं मा मा ब्राह्मण भाषिष्ठा विरुद्धमिति शंकरे महत्त्वोज्ज
याति पुमान्देवदेवस्य नंदया न सम्यगवजानासि तस्य देवस्य चेष्टितं शृणु ब्राह्मण त्वो पापाद्यथास्मा

स्कं.पु.२ त्सरिमुच्यते आदिसर्वजगतां कोस्यवेदान्वयं ततः सर्वजगद्यस्य रूपं दिग्वासा कीर्त्यते तत गुणा
९४ त्रयमयं शूलं शूली यस्माद्बिभर्ति सः अबद्धा सर्वतो मुक्ता मोक्षदानां चतस्तति: श्मशानं चापि संसा
रस्तद्दासी रूपधारिणां भूतयः कथिता भूति स्तां बिभर्ति स भूतिभृत् वृषो धर्म इति प्रोक्तस्तमा
रूढस्ततो वृषी सर्पाश्च दोषाः क्रोधाद्यास्तान्बिभर्ति जगन्मयः नानाविधा कर्मयोगा जटारूपा
बिभर्ति सः वेदत्रयी त्रिनेत्राणि त्रिपुरं त्रिगुणं वपुः भस्मीकरोति तद्देव स्त्रिपुरघ्नस्ततः स्मृतः
एवंविधं महादेवं विदुर्ये सूक्ष्मदर्शिनः कथंकारं हितेनाम भजं तेनैव ते हरं अथवा भीत सं
सारः सर्वो विमृश्यते जनः सर्वो विमृश्य कुरुते विमृश्यैतन्मयादृतं शुभं वाप्यशुभं वास्तु त्वम
प्येवं प्रपूजय इति ब्रुवन्तं तस्यां तु किंचित्स्फुरिताधरं विज्ञाय तां सखीमाह कमप्येष विवि
क्षुकः वार्यतामालि विप्रोयं महद्दूषणभाषकः न केवल पापभाजी श्रोतावेस्यान्न संशयः
अथवा किं च नः कार्यं वादेन सह ब्राह्मणेः कर्णौ पिधाय स्यांयामो यथा यस्यात्तथास्तु भः इत्यु ९४
क्त्वा यगच्छत्सा पिधाय श्रवणावुभौ स्वरूपं समुपाश्रित्य जग्राहे वसनं हरः ततो निरीक्ष्य तं देवं

संभ्रांता परमेश्वरी प्रणिपत्य महेशानं तुष्टावावनता उमा प्राह तां च महादेवो दासोस्मि त
व शोभने तपोद्रव्येण क्रीतश्च समादिश यथेप्सितं श्रीदेव्यु० मनसस्त्वं प्रभुः शंभो दत्तं तच्च म
या तव वपुषः पितरावीशौ सन्मानयितुमर्हसि श्रीमहादेव उ० पित्राहितेपरिज्ञातं दृष्ट्वा
त्वां रूपशालिनीं बालां स्वयंवरे पुत्री मह दास्यामि नान्यथा तत्तस्य सर्वमेवास्तु वचनं त्वं हि
माचलं स्वयंवरार्थं सुश्रोणि प्रार्थयस्वारणोत ततः इत्युक्त्वांतर्महादेवः शुचिः शुचिषदां वि
भुः जगामेष्टं तदादेशं स्वपुरं प्रययौ च सा दृष्ट्वा देवीं तदा हृष्टो मनसा सहिताचलः आलिंग्या
घ्राय पप्रच्छ सर्वं सा चान्यवेदयत् दुहितुर्देवदेवेन अकृतं तु हिमाचलः स्वयंवरं प्रमुदितः
सर्वलोके व्यघोषयत् अश्विनौ द्वादशादित्या गंधर्वा गरुडोरगाः यक्षाः सिद्धास्तथा साध्या
दैत्याः किंपुरुषा नगाः समुद्राद्याश्च ये केचित्त्रैलोक्यप्रवराश्च ये त्रयस्त्रिंशत्सहस्राणि त्रय
स्त्रिंशच्छतानि च त्रयस्त्रिंशच्च ये देवास्त्रयस्त्रिंशच्च कोटयः जग्मुर्गिरींद्रपुत्र्यास्तु स्वयंवरम
नुत्तमं आमंत्रितस्तथा विष्णुर्मेरुमाह सहसन्निव मातास्माकं च सा देवी मे रोगच्छन मामितं अ

स्कं० पु० २ थंत्रैलोक्यसुंदरी देवी हेममारुह्य शोभनं विमानं सर्वतोभद्रं सर्वरत्नैरलंकृतं अप्सरोभिः प्रनृत्यद्भिः सर्वाभर
णभूषिता गंधर्वसंघैर्विविधैः किंनरैश्च सुशोभनैः बंदिभिस्तूयमाना च वीरकोऽस्य धरास्थिता सिता
९५ तपत्रां रत्नांशुमिश्रितं चावहत्तदा मालिनी नाम पार्श्वस्थाः संध्यापूर्णेंदुमंडले चमारासक्तहस्ताभिः स्त्रि
भिश्च संवृता मालां प्रगृह्य सा तस्थौ सुरद्रुमसमुद्भवां एवं तस्यां स्थितायां तु स्थिते लोकत्रये तदा शि
शुर्भूत्वा महादेवः क्रीडार्थं वृषभध्वजः उत्संगतलसंसुप्तो भूत्वा च भगवान्भवः जयेति यत्तदं ख्यातं त
स्य सत्यार्थमीश्वरः अथ दृष्ट्वा शिशुं देवास्तस्या उत्संगवर्तिनं काऽयमत्रेति संमन्य चुक्रुशुर्भृशरोषिताः
वज्रमाहारयत्तस्य बाहुमुद्यम्य वृत्रहा स बाहुरुद्यतस्तस्य तथैव समतिष्ठत स्तंभितः शिशुरूपेण देव
देवेन लीलया वह्निस्तु पुनः शक्तिं तां बाहुं चालयितुं तदा वह्निः शक्तिं तदाक्षेप्तुं न शशाक तथास्थितः
यमोऽपि दंडमुद्यम्य च निर्ऋतिस्तं शिशुं प्रति पाशं च वरुणो राजा ध्वजयष्टिं समीरणः सोमोऽगुडं धनेशश्च ग
दां सुमहतीं दृढां नानायुधान्यथादित्या मुशलं च वसवस्तथा महाघोराणि शस्त्राणि स्तारकाद्याश्च दान ९५
वाः स्तंभिता देवदेवेन तथान्ये भुवनेषु ये एषां दंतान्दशन्दंति बालमैक्षत मोहितः तस्यापि दशनाः पेतुर्द

MEMORIAL

ष्टमात्रस्य शंभुना भगस्य नेत्रे विकृते चकार स्फुटिते च के बलं तेजश्च योगश्च सर्वेषां जगृहे प्रभुः अथ ते
षु स्थितेष्वेवं मन्युमत्सु सुरेष्वपि ब्रह्मा ध्यानमुपाश्रित्य बुद्ध्वा देहरचेष्टितं सोऽभिगम्य महादेवं तुष्टाव
प्रयतो विधिः पौराणैः सामगीतैर्वैदिकैर्नामगुह्यैर्भिः नमस्तुभ्यं महादेव महादेव्यै नमो नमः प्रसादा
त्तव बुध्यादि जगदेतत्प्रवर्तते मूढाश्च देवताः सर्वा नैनं बुध्यंत शंकर महादेवमिहायातं सर्वदेवनम
स्कृतं गच्छध्वं शरणं शीघ्रं यदि जीवितुमिच्छथ ततः संभ्रमसंपन्नास्तुष्टुवुः प्रणताः सुराः नमो नमो महा
देव पाहि पाहि जगत्पते दुराचारा भवानस्मान्नात्मद्रोहपरायणान् अहो पश्यत मोहं जानंतस्त्वभाविनी
मार्यामुमां महादेवीं तथाप्यत्र समागताः युक्तमेतद्यदस्माकं राज्यं गृह्यत चासुरैः येषामेवं हि धीबुधि
रस्माभिः किं कृतं त्विदं अथवा नो न दोषोऽस्ति परीवाहि वयं यतः तथैव पतिना सर्वे प्रेरिताः कूर्म हे विभो
ईश्वरः सर्वभूतानां पतिस्त्वं परमेश्वरः आमयस्य निखिलं विश्वं यत्रारूढं स्वमायया येन विभ्रमिता मूढाः
समायाताः स्वयंवरं तस्मै पशूनां पतये नमस्तुभ्यं प्रसीद नः अथ तेषां प्रसन्नोऽभूद्देवदेवस्त्रियंबकः य
थापूर्वं चकार तान् संस्तवाद्ब्राह्मणः प्रभुः तारकप्रमुखा दैत्याः सक्रुद्धास्तत्र प्राब्रुवन् कोऽयमंग महादेवो नम

स्कं·पु·२ न्यामो वयंचतं ततः प्रहस्यबालोसौ ॐकारंलीलयाभ्यधात् ॐकारेणचतेदेव्याः स्वमेवनगंग
ताः विस्मृतंसकलंतेषांस्वयंवरमुखंचतत् महादेवप्रभावेनदेव्यानांघोरकर्मणा एवंन्य
९६ स्यप्रभावोहिदेवदेवेषुफाल्गुन कथमीश्वरवाक्यार्थस्तस्मादन्यात्रमुच्यते असंन्नायंविमृ
ष्टास्तपश्चात्तापः पुरामहामहान् ईश्वरंभुवनस्यास्यश्रेभजंतेनत्र्यंबकं ततःसंस्तूयमानः
स सुरैः पद्मभुवादिभिः वपुश्चाकारदेवेशो त्र्यंबकः परमाद्भुतं तेजसातस्यदेवास्तेसेंद्रचंद्रदि
वाकराः सब्रह्मकाःससाध्याश्च वसुविश्वेचदेवताः सयमाश्चसरुद्राश्चचक्षुरप्रार्थयन्
विभुं तेभ्यःपरंतच्चेरेक्षुः स्ववपुर्दृष्टिशक्तिमत् ददावंबापतिशोवीभवान्याश्चचलस्यच ल
ब्धरुद्रप्रसादेनदिव्यंचक्षुरनुत्तमं सब्रह्मकास्तदादेवास्तमपश्यन्महेश्वरं ततोजग्मुश्च
मुनयःपुष्पवृष्टिश्चखेचराः मुमुचुश्चतदानेदुर्देवदुंदुभयोभृशं जग्मुर्गंधर्वमुख्याश्च
ननृतुश्चाप्सरोगणाः मुमुचुर्गणपाःसर्वेमुमोदांबाचपार्वती ब्रह्माद्योमनिरेपूर्णाभवा ९६
नींचगिरीश्वरे तस्यदेवीततोदृष्ट्वासमक्षंत्रिदिवौकसां पादयोस्थापयामासमालांदिव्यां

सुगंधिनीं साधुसाध्विति संप्रोच्या तयातंतत्रचार्चितं सहदेवानमश्चक्रुःशिरोभिर्भूत
लाश्रितैः सर्वेसब्रह्मकादेवाजयेतिचमुदाजगुः इतिश्रीस्कंदपुराणेकुमारिकाखंडेश्री
महादेववावाहिकेपंचविंशोध्यायः नारद० अथब्रह्मामहादेवमभिवाद्यकृतांजलिः
उद्वाहःक्रियतांदेवमभिवाद्यकृतांजलिः इत्युक्त्वाचमहेश्वरं तस्यातद्वचनंश्रुत्वाप्राहेदंभगवा
न्हरः पराधीनावयंब्रह्मन्हिमाद्रेस्तववापियत् यद्युक्तंक्रियतांतद्धिवयंयुष्मद्वशोधुना
ततोब्रह्मस्वयंदिव्यंपुरंरत्नमयंशुभं उद्वाहार्थमहेशस्यतत्क्षणात्समकल्पयत् शतयोज
नविस्तीर्णंप्रासादशतशोभितं पुरेतस्मिन्महादेवस्वयमेवव्यतिष्ठत ततःसप्तमुनीन्
देवश्चिंतिताभ्यागतान्पुरः प्राहिणोदंबिकायाश्चस्थिरपत्रार्थमीश्वरः सारुंधतीकास्तत
त्रल्हादयंतोहिमाचलं समार्यमीश्वरगुणैःस्थिरपत्राणिचादधुः ततःसंपूजितास्तेनपुन
रागम्यतेचतत् न्यवेदयन्स्मशंकायसचतानभ्यनंदनं उद्वाहार्थंततोदेवोविश्वंसर्वन्यमंत्र
यत् समागतंचतत्सर्वंविनादेवेर्दुरात्मभिः स्थावरंजगमंचैवविश्वंविष्णुपुरोगमं सब्रह्म

स्कं·पु·२ कंपुराराते महिमागमवर्धयत् तस्तैतेविधिरादेहं गंधमादनपर्वते पुरेस्थितेविवाहस्यदेवकाल
प्रवर्तते ततस्तस्यजटाजूटे चंद्रखंडंपितामहः बबंधप्रयोदाराविस्फारितविलोचनः कपर्देशोभनं
९७ विष्णुः स्वयंचक्रेस्यहर्षितः कपालमालांविपुलांचामुंडाम्मूर्ध्निबंधतः उवाचचापिगिरिशंपुत्रंजनयशोक
र योदेत्यंद्रकुलंहत्वामारकेस्तर्पयिष्यति सूर्योस्फुलत्किरणरत्नभाभासितजगत्त्रयं बबंधदेवदेव
स्यस्वयमेवप्रमोदतः शेषवासुकिमुख्याश्चकुलंतस्तेजसाशुभाः आस्मानभूषणास्थानेस्वयंचेतकु
टीश्वरे वायवश्चततस्तीक्ष्णशृंगंहिमगिरिप्रभं विषंविभूषयामासुर्नानाभिरूपपत्तिभिः शोकाग
जाजिनंगृह्यस्वयमेवव्यवस्थितः चिताभस्मसमादाय कपोलेरजतप्रभे मनुजास्थिमयींमालां
प्रेतनाथश्चचंदनं वन्हिस्तेजोमयंदिव्यमजिनंप्रददोस्थितः एवंविभूषितःसर्वैर्भक्तैशेषा बभौम्ह
शो ततोहिमाद्रेःपुरुषावरकंप्रोचिरेवच माभूत्कालात्ययःशीघ्रंभवस्येतन्निवेद्यतां ततोदेवंप्र
णम्याहवीरकःकरसंपुटी त्वरयंतिमहेशानंहिमाद्रेःपुरुषास्त्वमी इतिश्रुत्वावचोदेवःस्वरूपंसज ९७
गन्मयं ततोबध्वांजलिधीमान्स्थाणुप्रावाच्यकेशवः देवदेवमहादेवत्रिपुरांतकशंकर शोभसे

नेनरूपेणजगदानंददायिना महेश्वरयथासाक्षादपरस्त्वंमहेश्वरः ततस्स्मयंमहादेवोजयेतिभव
नस्तुतः करमालंब्यविष्णोश्चवृषभंरुरुहेशनैः ततश्चवसवोदेवाःशूलंतस्यन्यवेदयन् धनदोभि
धिभिर्युक्तःसमीपस्थस्ततोभवत् सशूलपाणिर्विश्वात्मासंचचालततोहरः देवदुंदुभिनादैश्चपुष्पा
सारैश्चगीतकैः नृत्यद्भिरप्सरोर्यभिश्चजयेतिचमहास्वनैः सव्यदक्षिणसंस्थानेब्रह्मविष्णुश्चजग्म
तुः हंसंचगरुडंचैवसमारुह्यमहाप्रभो अथादितिर्दितिःसाचदनुःकद्रूःसुपर्णजाः पौलोमीसुरसा
चैवसिंहिकासुरभिर्मुनिः सिद्धिर्मायाक्षमादुर्गादेवीस्वाहासुधास्वधा सावित्रीचैवगायत्रीलक्ष्मीसाद
क्षिणाद्युतिः स्पृहामतिर्धृतिर्बुद्धिर्थिऋद्धिःसरस्वती राकाकुहूःसिनीवालीदेवीमानुमतीतथा ध
रणीधारणीवेलारात्रीवापिचरोहिणी इत्येताश्चान्यदेवानांमातरःपत्नयस्तथा उद्वाहंदेवदेवस्यज
ग्मुसर्वामुदान्विता उरगागरुडायक्षागंधर्वाकिनरानराः सागरागिरयोमेघामासासंवत्सरस्तथा
वेदामंत्रास्तथायज्ञाश्रौताधर्माश्चसर्वशः ॐकाराप्रणवाश्चैवइतिहासासहस्रशः कोटिशश्चत
थादेवामहेंद्राद्यास्ववाहनाः अनुजग्मुर्महादेवंकोटिशोर्बुदशश्चहि गणाश्चएघंतोजग्मुःशंखवर्णा

स्कं·पु·२ श्चकोटिशः दशभिः केकराख्यश्च विद्युतोऽष्टाभिरेव च चतुःषष्ट्या विशाखश्च नवभिः पारियात्रकः
षड्भिः सर्वान्तपतिः श्रीमान् तथैव विकृताननः ज्वालाकेशो द्वादशभिः कोटिभिः संवृतो ययौ
९८ सप्तभिः समदः श्रीमान्दुंदुभोऽष्टाभिरेव च पंचभिश्च कपालीशः षड्भिः संह्रादकः शुभः कोटिकोटिभि
रेवैकः कुंडकः कुंभकस्तथा विष्टंभोऽष्टाभिरेवेह गणपः सर्वसत्तमः पिप्पलश्च सहस्रेण सन्नादश्च
तथा बली आवेशनस्तथाष्टाभिः सप्तभिश्चंद्रतापनः महाकेशः सहस्रेण तं डिड्डीरशभिस्तथा
भगः कालः करालश्च महाकालः शतेन च अग्निकः शतकोट्या वै कोट्याग्निमुख एव च आदित्यमूर्धा
कोट्या च कोट्या चैव धनावह संनागश्च शतेनैव कुमुदः कोटिभिस्त्रिभिः अमोघः कोकिलश्चैव को
टिकोट्या सुमंत्रतः काकपादस्तथा षष्ट्या षष्ट्या संतानकोगणः महाबलश्च नवभिर्मधुपिंगश्च
पिंगलः नलो नवत्या सप्तत्या चतुर्वक्रश्च पूर्वपात् वीरभद्रश्चतुःषष्ट्या करणो बालकस्तथा पंचा
क्षः शतमन्युश्च मेघमन्युश्च विंशति काष्ठकोटिश्चतुःषष्ट्या सुकेशो वृषभस्तथा विश्वरूपस्तारके ९८
तुः पंचाशच्च शताननः ईशानो वृद्धदेवश्च दीप्तात्मा मृत्युहा तथा विषादो यमहा चैव गणा भृंगिरि

टिस्तथा अशनी हासकश्चैव चतुःषष्ट्या सहस्रपात् एते चान्ये च गणपा असंख्याता महाबलाः
सर्वे सहस्रहस्ताश्च जटामुकुटधारिणः चंद्रलेखावतंसाश्च नीलकंठास्त्रिलोचना हारकुंडलके
यूरमुकुटाद्यैरलंकृताः अणिमादिगुणायुक्ताः शक्ताः शापप्रसादयोः सूर्यकोटिप्रतीकाशास्त
त्राजग्मुर्गणेश्वराः पातालांबरभूमिस्थाः सर्वलोकनिवासिनः तुंबरुर्नारदो हाहा हूहूश्चैव तु सा
मगाः तंत्रीमादाय वाद्यांश्च वादयन्शंकरालये ऋषयः कृत्स्नशश्चैव वेदगीतास्तपोधनाः पुण्या
न्वैवाहिकान्मंत्रान्जपुः संहृष्टमानसाः एवं प्रवृत्तो गिरिशो वीज्यमानश्च गंगया तथा यमुनया चा
यांपतिनाधृतच्छत्रकः स्त्रीभिर्नानाविधालापैर्लीलाभिश्चानुमोदितः महोत्सवेन देवेशो गिरिस्था
नं विवेश सः प्रभासः स्वर्णकलशास्तोरणानां शतैर्युतं वैडूर्यबद्धभूमिस्कं रत्नजैश्च गृहैर्युतं सत्स्व
विश्य स्तूयमानो द्वारमभ्यास्व सादह ततो हिमाचलस्तत्र दृश्यते व्याकुलाकुलः आदिशद्दासभृत्या
नां महादेवे उपस्थिते ततो ब्रह्माणमचलो गुरुत्वे प्रार्थयत्तदा कन्यानां सर्वभारेषु यासु देवं च बुद्धिमा
न् प्रत्याह च विवाहेऽस्मिन्कुमारीश्चातरं विना भविष्यति कथं विश्वो लाजाहोमादिकर्मसु सुतो हि मम

स्कं॰पु॰२ मेनाकः सम्प्रति तीर्णवस्थितः इति चिंताविषण्णं तं विष्णुराह महामतिः अत्र चिंता न कर्तव्या गिरिराज कथंच
न अहं भ्राता जगन्मातुरेतद्वचनान्यथा ततः प्रमुदितः शैलः पार्वतीं च स्वलंकृतं सखीभिः कोटिसंख्या
९९ भिर्वृतां प्रोचेत्रायत्तदा ततो नीलमयस्तंभं कलकांचनकुट्टिमं मुक्ताजालपरिस्कारं ज्वलितौषधिदीपितं
सत्नासनसहस्राढ्यं शतयोजनविस्तृतं विवाहमंडपं शैलो विवेशानुचरावृतः ततः शैलः सपत्नीकः पाक्षा
प्रक्षाल्य हर्षितः भवस्यतेन तोयेन सिषिचे स्वजगत्तथा पाद्यमाचमनं दत्वा मधुपर्कं च गां तथा प्रदानस्य
प्रयोगं च संचिंतयति ब्राह्मणा दौहित्र्यं कन्यकानां दक्षिपुत्रि स्वकामहं इत्युक्तात स्थिवान् शैलो न
जानाति हरस्य सः ततः सर्वान्पृच्छत्स कोपि वेद न चास्य तत् ततो विष्णुरिदं प्राह पृच्छ्यतेन्यः किमर्थतः अ
ज्ञातकुलतातस्य पृच्छ्यतामयमेव च अहिरेव अमे पादान्विति नान्यो हिमाचल स्वगोत्रं यदि न ब्रूते नदेया
भगिनी मम ततो हास्यसमुद्भूतं सर्वेषां सुमहास्वनः निवृत्तश्च क्षणाद्भूयः किं वक्ष्यति हरस्त्विति ततो वि
मृश्य बहुधा किंचित्स्मितभीतानना यथा लज्जान्वितः स्मितं चक्रे तत्र पार्थ स्तुवक्ष्ये ततो वसिष्ठं ब्रुवति शीघ्रं ९९
कालातिवर्तते हरिः प्राह महेशानं बिभ्यं नाविश्ममहं तव मातामहं च पितरं प्रयोगं शृणु भूधर आत्मपुत्रायते

श्रीमो आत्मदौहित्रकाय ते इत्युक्ते विष्णुना सर्वे साधु साध्विति ते जगुः देवाः पुष्पा हेर्वृष्टिं सर्वेभ्योप्यधिकांव
रां ततः शैलस्तथा वाक्या दात्वा देवींच सादकां आत्मानं चापि देवाय प्रददौ सादकं नगः ततः सर्वे तुष्टुवुस्तं
विवाहं विस्मयान्विताः दाता महीभृतां नाथो होता देवश्चतुर्मुखः वरः पशुपतिः साक्षात्कन्या विश्वारणीस्तथा
न दत्तु देव तूर्येषु करं जग्राह त्र्यंबकः देवो देवीं समालोक्य सलज्जां हेमशैलजां न तृप्यति न चाल्हादि सा
चेदेवं वृषध्वजं तत्र ब्राह्मादिमुनयो देवीमद्भुतरूपिणीं पश्यंतन्नारणं जग्मुर्मनसा परमेश्वरं मामुह्या
मः पार्वतीं चयथा नारदपर्वतौ ततस्तथैव तच्चक्रे सर्वेषामीप्सितं भवः ततो देवैश्च मुनिभिः निसंस्तुतः प
रमेश्वरः प्रविवेशाशु भावेदीं मूर्तिमत्वलनाश्रितां वेधाश्रुतीरितैर्मंत्रैर्मे मद्धिरूपस्थितैः मूर्तिमग्नि
जुहावृत्तिः परिक्रम्य चतं हरः लाजाहोमेऽ माध्ना ताप्राह तं सास्मितं हरिः बहवो मिलिताः संति लोकाः संम
र्दईश्वरः सावधानेन रक्ष्याणि भूषणानि त्वया हरः ततो हरस्तदा प्राह स्वजनेमा विगोपय किंचित्स्वार्थं
यदास्यामि प्राह विष्णुस्ततो नतः त्वयि भक्तिर्दृढा मेस्तु स च ततु दुर्लभं ददौ ददतुः सृष्टिसंरक्षां ब्राह्मणा
मुभौ अग्नेय यज्ञभागश्च प्रीतो हरजनार्दनौ भृग्वादीनां ततो दत्वा श्रुतिरक्षण दक्षिणं ततो गीतैश्च न

स्कं॰पु॰२ सेश्च भोजनेश्च यथेप्सितैः महोत्सवे रंजकैश्च विस्मयं समपद्यत वेदिकायां समागतः शंक
१०० रो लोकशंकरः उमया सहितो धीमान् ब्रह्माद्यैर्मुनिभिः स्तुतः तत्र मेनासमं श्रीमान् धनं प्राद
न हिमाचलः रत्नौघं विविधं दिव्यं वस्त्राण्याभरणानि च दासदासीसहस्राश्च अर्बुदं सर्वसंख्य
या असंख्यातं तथा दानं दत्तो हर्षसमन्वितः कांसारं शंकरे प्रादात् मेनामानसमन्विता भवा
नी शंकराग्रासं करेण मुखमादधे संदिग्धमनसा देवी पंचवक्त्रे निरीक्ष्य सा शंकरेण ततो दे
वीं करेण च सकंकणे पंचमे वदने देवः सद्योजाताख्यसंभवे उपहासं तदा चक्रे पार्वती सखि
संयुता सा जगज्जननी देवी विश्वनाथो जगद्गुरुः उभे लोकोपदेशार्थं क्रीडां चक्रे च दंपती
उमाभद्रात्मकं विश्वं पश्यंती परमार्थिनः चतुर्थीकर्मसंसिद्धौ ब्रह्मा प्राह हिमाचलं कन्याद
नमसंख्यातं महिमानमहाद्भुतं विमृश्य मेनया सार्धं पुण्यं कस्मै प्रदास्यति हिमाचल उवा॰
भवतामप्यनुज्ञातो दास्यहं कन्यजं फलं विष्णुः प्राह हिमाद्रिं तं हर्षव्याकुललोचनः धन्योसि १००
कृतकृत्योसि संप्राप्तं जन्मनः फलं उमाभ्यां यस्य सोयं कन्याकुलविभूषणं रुद्रमात्मनि संचि

त्य दानपात्रे महीधरे महादेवमये लोके सर्वसंपूर्णतां व्रजेत् तथेत्युक्तो भगवता सर्वं चक्रे यथा
विधिः परमानंदसंयुक्तः ख्यातिं प्राप्तो जगत्त्रये ततो भगवते पूज्ञा ब्रह्मणे वेदमूर्तये इंद्रादी
नां च देवानां ब्रह्मर्षीणां पृथक् स्तुतः भोजनाच्छादनैर्दिव्यै रुच्यैर्विविधिस्तथा दिविदुंदुभयो ने
दुः पुष्पवृष्टिं प्रचक्रिरे कराभ्यां शंकरेणाथ पार्वती प्रतिगृह्य च हिमाद्रेः संनिधौ मुक्ता मंगलो
र्थं महेश्वरः ततो वह्निप्रदक्षिणं कृत्वा कालिकाद्याः सुरांगना ब्रह्माद्या मुनयः सर्वे मंत्रोच्चारं प्रचक्रिरे
ब्रह्मघोषेण महता नादितं भुवनत्रयं मंगलानि विचित्राणि देव्यश्चक्रुः सुहर्षिताः विसृज्य लो
कं तं सर्वं किमिच्छादानकैर्भवः सरस्वत्या च पितरौ देव्या ह्याश्वस्य तु ःखितौ आमंत्र्य हिमशैलेंद्र
ब्रह्माणं च सकेशवं जगाम मंदरगिरिं गिरिणा सानुगोर्चितः ततो गते भगवति नीललोहिते स
हो मया गिरिममर्त्य हिमभूधरः स बांधवो रुरोदेति हि कस्य नो मनो विसंस्थुलं जगति हि कन्यका
पितुः इमं विवाहं गिरिराजपुत्र्याः श‍ृणोति चाध्येति च सो नरः शुचिः विवेकतश्चापि विवाहमंग
लेसमंगलं वृद्धिमवाप्नुते चिरं इति श्री स्कंदपुराणे कु॰ खंडे कुमारिकामहात्म्ये हरगौरीविवाहो २५ ध्यः

स्कं.पु.२ श्रीनारद उ॰ ततो निरुपमं दिव्यं सर्वरत्नमयं शुभं ईशाननिर्मितं साक्षात्सह देव्या विशाङ्कहं तत्रासौ मं
३०३ दिरगिरौ सह देव्या भगाक्षहा प्रासादे तत्र चोद्याने रमे संहृष्टमानसः एतस्मिन्नंतरे देवास्तारकेणाभि
पीडिताः प्रोत्साहितेन चात्यर्थं मया किलिचिकीर्षुणा आसाद्य तेभवं देवं तुष्टुवुर्बहुधा स्तवैः एतस्मि
न्नंतरे देवी प्रोद्वर्तयत गात्रकं उद्वर्तनमलेनाथ नलं चक्रे गजाननं देवानां संस्तवैः पुण्यैः कृपयाभिपरि
प्लुता पुत्रेत्युवाच तं देवी ततः संहृष्टमानसा एतस्मिन्नंतरे शर्वस्तत्रागत्य वचोब्रवीत् पुत्रस्तवायं
गिरिजे शृणु यादृग्भविष्यति विक्रमेणाथ वीर्येण रूपया सदृशो मया यथाहं तादृशश्चासौ पुत्रस्ते
भविता गुणैः ये च पापा दुराचारा वेदान्धर्मान्द्विषंति ये तेषामामरणांतानि विघ्नान्येष करिष्यति ये च
मां नैव मन्यंते विष्णुवापि जगद्गुरुः विघ्निता विघ्नराजेन तेयास्यंति महत्तमः येषां गृहेषु कलहः सदा
नैवोपशाम्यति पुत्रस्य तव विघ्नेन समूलं तस्य नश्यति येषां न पूज्यपूजा चा क्रोधाः सत्यपराश्च ये कृपा ३०३
लवोगत क्रोधास्तेषां विघ्नं हरिष्यति सर्वधर्माश्च कर्माणि तथा नानाविधानि च सविघ्नमथ रौद्रसा
हसिका ये च तेषां विघ्नं करिष्यति श्रुतिधमानुत्तान धर्मान्मानयंति गुरूंश्च ये x ष्यंति पूजयास्य विना शुभे

एवं श्रुत्वा उमा प्राह एवमस्त्विति शंकर ततो बृहत्तनूसोभूत्तेजसा द्योतयन्दिशः ततो गणैः शमं सर्वैः
सुरर्णां प्रददौ चतं यावत्तारकहंतारो भावेतावदयं प्रभुः ततो विघ्नपति दैवैः संस्तुतः प्रणतार्तिहा
चकार तेषां कृत्यानि विघ्नानि दितिजन्मनां पार्वती च पुनर्देवी पुत्रत्वपरिकल्प्य च अशोकस्यांकुरं नी
रैरवर्धयत साहितैः सप्तर्षिनथचाहूय संस्कारं मंगलं तदा कारयामास नन्वंगी ततस्तां मुनयोब्रुवत
त्वयेव दर्शितमार्ये मर्यादां कर्तुमर्हसि किंफलं भविता देवी कल्पितैस्तरुपुत्रकैः श्रीदेव्युवाच यो वै नि
रुदके ग्रामे कूपं कारयते बुधः यावत्तोयं भवेत्कूपे तावत्स्वर्गेषु मोदते दशकूपसमा वापि दशवापी समं स
रः दशसरः समा कन्या दश कन्यासमः क्रतु दश क्रतुसमः पुत्रो दशपुत्रसमो द्रुमः एषैव मनुमर्यादा
नियता लोकभाविनी जीर्णोद्धारे कृतं चापि फलं तद्द्विगुणं मतं सतः कदाचिद्भगवानुमया सह मंदरे मं
दिरे हर्षजननेकलधौतमये शुभे प्रकीर्णकुसुमादेमो महालिकुलकूजिते किंनरोद्गीतसंगीत मतिशा
ब्दितमध्यके क्रीडामयूरैर्हंसैश्च शुकैश्चैवाभिनादिते मौक्तिकैर्विविधै रत्नैर्वैनिर्मितगवाक्षके ततः पु
ण्यकथाभिश्च क्रीडते रुभयास्तयोः प्रादुर्भवन्महाञ्शब्दः पूरितांबरगोचरः तं श्रुत्वा कौतुमादेवी किम

Dr. BHAU DAJI MEMORIAL

स्कं॰पु॰२ तदिति शंकरं पर्यपृच्छच्छुभतनु हरं विस्मयपूर्वकं तामाह देवी गिरिजा दृष्टपूर्वास्त्विमे त्वया एते
१०२ गणा मे कीर्तिता शैलेस्मिंस्त्वप्रिये शुभे तपसा ब्रह्मचर्येण कुरुक्षेत्रसाधनैः येरहं तोषितः पृथ्वी
तपं ते मनुजोत्तमाः मत्समीपमनुप्राप्ता ममलोकवरानने चराचरस्य जगतः सृष्टिसंहरणक्षमा
विनेतानेयमे प्रीतिर्नेभिर्वर्तते हितारमे एते अहमहं चैते तान्येतान्यस्य पार्वती इत्युक्ता विस्मि
ता देवी ददर्श तान् गवाक्षके स्थिता पद्मपलाशाक्षी महादेवेन भाषिताः केचित्कृशा ह्रस्वदीर्घा
केचित्स्थूलमहोदराः व्याघ्रभामेषाजमुखा नानाप्राणिमहामुखाः व्याघ्रचर्मपरीधाना नानाव्या
लामुखापरे गोकर्णगजकर्णाश्च बहुपादमुखेक्षणाः विचित्रवाहनाश्चैव नानायुधधरास्तथा गी
तवादित्रतत्त्वज्ञाः सत्वगीतरसप्रियाः तान्दृष्ट्वा पार्वती प्राह कतीसंख्याभिधास्त्वमी श्रीशंकर उ॰
असंख्यातास्त्वमी देवी असंख्याभिधास्तथा जगतापूरितं सर्वमेतेर्भीमैर्महाबलैः सिद्धाः क्षेत्रे
षु रथ्यासु जीर्णोद्यानेषु वेश्मसु दानवानां शरीरेषु बालेषून्मत्तकेषु च एते विशंति मुदिता नाना १०२
हारविहारिणा ऊष्मपाः फेनपाश्चैव धूमाग्रमधुपायिनः मेदाहाराः सर्वभक्ष्यास्तथान्ये चाप्यभो

जना गीतनृत्योपहाराश्च नानावाद्यरवप्रियाः अनंतत्वादमीषां च यवक्तुं शक्या न वै गुणाः श्रीदे
व्यु॰ मनःशिलनकल्केन य एष च्छुरिताननः तेजसा भास्कराकारो रूपेण सदृशस्तव आकर्ण्या
कर्ण्यते देवगुणागीतान्महागुणान् मुहुर्नृत्यति हास्यं च विदधाति मुहुर्मुहुः सदाशिवेशोये
त्येवं विह्वलो वक्ति यो मुहुः धन्योयमीदृशी यस्य भक्तिस्त्वयि महेश्वरः एवं विज्ञातुमिच्छामि किं
नामा सो गणास्तव श्रीशंकर उ॰ स एष वीरको देवी सदाद्रिसुते प्रियः नानाश्चर्यगुणाधारः
प्रतीहारो मम अंबिके श्रीदेव्यु॰ ईदृशस्य सुतस्यापि मामोत्कंठा पुरांतकः कदाहमीदृशं पुत्रं ल
प्स्याम्यानंददायकं शर्व उ॰ एष एव सुत स्तेस्तु यावदीदृक्परो भवेत् इत्युक्ता विजया प्रा
ह शीघ्रमानय वीरकं विजया च ततो गत्वा वीरकं वाक्यमब्रवीत् एहि वीरक ते देवी गिरिजा तो
षिता शुभा त्वामाह्वयति सा देवी भवस्यानुमते स्वयं इत्युक्तः संभ्रमयुतो मुखं संमार्ज्य पाणि
ना देव्याः समीपमागच्छ जयानुगतः शनैः तं दृष्ट्वा गिरिजा प्राह गिरा मधुरवर्णया एह्येहि पु
त्र दत्तस्त्वं भवेन मम पुत्रक इत्युक्तो दंडवद्देवीं प्रणम्यावस्थितो नरः माता ततस्तमालिंग्य क

सं.पु.२ तेलंगे च वीरकं चुचुंब च कंधयोः गात्राणि च प्रमार्जयत् भूषयामास दिव्यैस्तं स्वयं नानाविभूषणैः एवं सं
कल्प्य तं पुत्रं लालयित्वा मोदिता चिरं उवाच पुत्र क्रीड त्वं गच्छ सार्धं गणैरिति ततश्च क्रीडमध्ये स गणानां पार्व
३०२ तीसुतः मुहुर्मुहुः स्वमनसि स्तुवन् भक्तिनम्रो करौ प्रणम्य सर्वभूतानि प्रार्थयाम्यस्म दुष्करं भक्त्या
भजध्वमीशानं यस्य भक्तेरिदं फलं क्रीडति वीरके . . यात ततो देवी च पार्वती नानापथाभिश्च क्री
डमुनेरेव जयाभूता ततो गिरिसुतां कंठे क्षिप्य बाहुं महेश्वरः तपस्त्वं विप्रेषार्थं नर्मदेवीं किलाब्रवीत्
सहि गौरतनुः शर्वो विना ताभ्यां शिलाभ्यां भितः रंधिता च विभावर्या देवी नीलोत्पलछविः शर्व उ॰ शरीरे मम
तन्वंगी सीते भास्यतितद्युतिः भुजंगी वासिताभ्रे संश्लिष्टा चंदने तरौ चंद्रज्योत्स्नाभिसंपृक्ता तामसी रज
नीयथा रजनि वासितपक्षे दृष्टिदोषं ददासि मे इत्युक्ता गिरिजातेन कंठे शार्वादिमुच्यसा उवाच कोपरक्ताक्षी
भ्रुकुटीविकृतानना स्वकृतेन जनः सर्वो जनेन परिभूयते अवश्यमर्थी प्राप्नोति खंडनां शशिशेखर तद्भवेत् त
पोभिर्दीप्तपरिते यत्त्वां प्रार्थितवत्यहं तस्यायमनियमः स्वैष मवमानः पदेपदे नैवाहं कुटिला शर्व विषमा न ३०३
च धूर्जटे स्वदोषे स्वं गतः क्षांतिं तथा दोषाकराश्रयः नाहं मुह्यामि तथा नेनेत्रहता भवाभव भगस्तनेत्रविद्गा

नातितथैवेदं जगत्त्रयं मर्द्धि शूलं जनयसे स्वैर्दोषैमामभिक्षिपन् यत्त्वमामाह कृष्णाति महाकालोसि वि
श्रुतः यास्याम्यहं परित्यक्तुमात्मानं तपसी गिरि जीवंत्यानास्ति मे कृत्यं धूर्तेन परिभूयता निशम्य तस्या
वचनं कोपितीक्ष्णाक्षरं भवः उवाचावस्तसंभ्रांतो दुर्ज्ञेयचरितो हरः न तत्त्वमसि गिरिजे नाहं निंदापर
स्तव चाटुकृद् बुध्या कृतवांस्त्वाहं नर्मकीर्तनं विकल्पस्त्व स्वचित्तेति गिरिजे षाममप्रिया प्रायेण भूषणभू
तलिस्ता मन्यथा चिंतिता हृदि अस्मादृशानां कष्टां गीप्रवर्तते न्यथा गिरः यदेवं कुपिता भीरु नैतवक्ष्याम्य
हं पुनः नर्मवादी भविष्यामि जहि कोपं शुचिस्मिते शिरसा प्रणतस्तेहं रचितस्ते मयांजलिः हीनेनाप्यप
मानेन नेदिता नैमि विक्रियां वरमस्मि विनम्रो पि मलं देवि गुणान्विता इत्यनेकैश्चाटु वाक्यैः सूक्तैर्देवेन बो
धिता कोपं तीव्रं न तत्याज सती मर्माणि घट्टिता अवष्टब्धा च वथ शिक्षा पादौ तौ कर पाणिना विपर्यस्तालका
वगाढं तु मेध्य तत्र त्रैलजा तस्यां व्रजंत्यां कोपेन पुनराह पुरांतकः सर्वं सर्वैरवयवै स्तुतेति सदृशी पितु हि
माचलस्य शृंगैस्त्वं नेभ्यावकुधागतं कुटिलत्वं बकुभ्यस्त्वे दुःसेव्यत्वं हिमादपि संक्रांतं सर्वमेवेतत्तव देवि
हिमाचलात् इत्युक्ता सा पुनः प्राह गिरिशं शैलजा तदा कोपकंपितधूम्रास्या प्रस्फुरदशनच्छदा मात्रार्थ

स्कं०पु० त्सोपमानेन निंदत्वं गुणिनो जनान् तथापि दुष्टसंपर्कात्संक्रांतं सर्वमेव हि व्यालैर्ध्यानेन कंजिव्हत्वं भ
स्मनः स्नेहवंध्यता हृत्कालुष्यं शशांकात धर्मो हि सर्वदुर्बोधः अथवा वक्रुनोक्तेन अलं वाचां श्र
१०४ मेण मे श्मशानवासाच्चाभीस्त्वं नग्नत्वान्न तव त्रपा निर्घृणत्वं कपालित्वाद्दयं करा कृपा तव
इति श्रीस्कंदपुराणे कुमारिकाखंडे पार्वतीप्रकोपः सप्तविंशोध्यायः इत्युक्त्वा मंदिरात्तस्मा
न्निर्जगाम हिमाद्रिजा तस्यां व्रजंत्यां च कुश्च गणाः किलकिलध्वनिं क्व मातर्गच्छसीत्युक्त्वा रुदं
तो धाविताः पुरः विष्टभ्य चरणौ देव्या वीरकोऽ बाष्पगद्गदं प्रोवाच मातः किमेतत्क्वा यासि
कुपिता त्वरा अहं त्वामनुयास्यामि मातरं स्नेहवत्सलां नाहं सहिष्ये परुषं गिरिशस्य त्वया जितः
पुत्रः पारुष्यपात्रं हि भवेन्मात्रा विभाषितुः उन्नाम्य वदनं पश्चाद्दक्षिणेन तु पाणिना उवाच वी
रकं माता मातृशोकं पुत्र भावय नोल्लंघ्यास्ति तुं नैव न्याय्यं गंतुं मया सह साहं तपः करिष्यामि
यथा गौरत्वमाप्नुयां गौरीं गौरं पटोद्वेष यातायं मयनंतरं द्वाररक्षा त्वया कार्या नित्यं रंध्रान्व १०४
·वेक्षिणा यथा न काचित्प्रविशेत्तु योषिदत्र हरांतिके दृष्ट्वा परां स्त्रियं चात्र वदेथा मम पुत्रक

शीघ्रमेव करिष्यामि ततो युक्तमनंतरं एवमस्त्विति देवीं स वीरकः प्राह सांप्रतं मातुराज्ञासुता
ल्हादप्लाविताङ्गो गतज्वरः जगाम त्र्यक्षं स दृष्ट्वा प्रणिपत्य च मातरं गजवक्त्रं ततः प्राह प्रणम्य स
म वस्थितं साश्रुकं वं प्रयावंतं नयमामिति पार्वती तदागच्छ मया सार्धं यागतिमेत चापि सा
पराभवाद्धि धर्तीनां मरणं साधु पुत्रकः एवमुक्त्वा तमादाय हिमाद्रिं प्रति सा ययौ इति श्रीस्कं
दपुराणे कुमारिकाखंडे अष्टविंशोध्यायः २८ व्रजंती गिरिजा पश्यत्सखीं मातुर्महाप्रभां
कुसुमोमोदिनीं नाम तस्य शैलस्य देवतां सापि दृष्ट्वा गिरिसुतां स्नेहविप्लुतमानसा क्व पुनर्ग
च्छसीत्युच्चैरालिंग्योवाच देवता साचास्यै सर्वमाचख्यौ शंकरात्कोपकारणं पुनश्चोवाच गिरि
जा देवतां मातृसंमतां नित्यं शैलाधिराजस्य देवता त्वमनिंदिते सर्वत्र संनिधानं च मायी चा
तीव वत्सला तदहं संप्रवक्ष्यामि यद्विधेयं तवाधुना अथान्यस्त्री प्रविशेत्तु समीपे च पिनाकि
नः त्वया ख्येयं मम शुभे युक्तं पश्चात्करोम्यहं तथेत्युक्ते तया देव्या ययौ देवी गिरिं प्रति रम्यं त
त्र महाशृंगे नानाश्चर्योपशोभिते विभूषणादि संन्यस्य वृक्षवल्कलधारिणी तपस्तेपे गिरिसु

स्कं॰पु॰२ तापुत्रेणपरिपालिता ग्रीष्मेपंचाग्निसंतप्ता वर्षासुचजलोषिता स्थंडिलस्थाचहेमंतेनिराहारासुतापरा ए
तस्मिन्नंतरे दैत्योंधकस्यसुतोबली ज्ञात्वागतांगिरिसुतांपितुर्वैरमनुस्मरन् आडिर्नामबकभ्राताहर
१०५ स्यांतरप्रेक्षकः जितकिलांधके दैत्ये गिरिशेणामरद्विषि आडिश्चकारविपुलं तपोहरजिगीषया तमा
गत्याब्रुवीत्ब्रह्मातपसापरितोषितः ब्रूहिकिंचासुरश्रेष्ठ तपसाप्राप्तुमिच्छसि दैत्योब्रह्माणमाहूयनिर्मृत्यु
त्वमहंवृणे श्रीब्रह्मोवाच इत्युक्तोदैत्यसिंहस्तुप्रोवाचबुजसंभवं रूपस्यपरिवर्तोमेयदास्यात्सरोज
संभव तदामृत्युर्ममभवेदन्यथात्वमरोस्म्यहं इत्युक्तस्तंतथेत्याह तुष्टः कमलसंभवः इत्युक्तोमरताम
ने दैत्यराजस्थितोसुरः आजगामसचस्थानं तदात्रिपुरघातिनः आगतोददृशेतंचवीरकंद्वार्यव
स्थितं तंचासौवंचयित्वाआडिःसर्पत्वाशरभत् अवारितोवीरकेणप्रविवेशहरांतिके भुजंगरूपंसं
त्यज्यबभूवाथमहासुरः उमारूपीछलयितुंगिरिशंमूढचेतनः कृत्वोमायास्ततोरूपमप्रतर्क्यंम
नोहरं सर्वावयवसंपूर्णंसर्वाभिज्ञानसंवृतं चक्रेभगांतरेदैत्योदंतान्वज्रोपमान्दृढान् तीक्ष्णाग्रान्बु १०५
द्धिमोहेनगिरिशंहंतुमुद्यतः कृत्वोमारूपमेवस्थितोदैत्योहरांतिके तांदृष्ट्वागिरिशस्तुष्टः समालिंग्य
७ नकिंचित्चविनामृत्युंतुरासुरविद्यते यतस्ततोपिदैत्येंद्रमृत्युः प्राप्यः शरीरिणा ॥७

महासुरं मन्यमानोगिरिसुतांसर्वैरवयवांतरैः अपृच्छत्साधुतेभावोगिरिपुत्रिनकृत्रिमः यात्वंमदा
शयंज्ञात्वाप्राप्तेहवरवर्णिनि त्वयावीरहितःशून्यंमन्येस्मिभुवनत्रयं प्राप्ताप्रसन्नायात्वंमांयुक्तमेवंवि
धंत्वयि इत्युक्तेगूहयन्चेष्टामुमारूप्यसुरोब्रवीत् यातास्मितपसश्चर्तुंकालीवाक्याततवातुलं रतिश्च
तत्रमेनाभूत्ततः प्राप्तातवांतिकं इत्युक्तःशंकरःशंकांकिंचित्प्राप्यावधारयन् कुपितामयितन्वंगीप्रत्यक्षा
चदृढव्रता अप्राप्तकामसंप्राप्ताकिमेतत्संशयोमम रहसीतिविचिंत्याथअभिज्ञानंविचारयन् नापश्य
द्वामपार्श्वेतुतस्यंकंपद्मलक्षणं लोम्नामावर्तचरितंततोदेवपिनाकधृक् बुध्वातांदानवींमायांकिं
चित्प्रहसिताननः मेंद्रेरौद्रास्त्रमाधायचक्रेदैत्यमनोरथं स्वरुवन्भैरवन्रावानवसादंगतोसुरः
अबुध्यत्तवीरकोनेतदसुरेंद्रनिषूदनं हतेचमारुतेनाशुगामिनानगदेवता अपरिच्छिन्नतत्वार्थाज्ञो
ऌपुत्र्यान्यवेदयत् श्रुत्वावायुमुखाद्देवीक्रोधरक्तातिलोचना अपश्यद्वीरकंपुत्रंहृदयेनविदूयता
मातरंमांपरित्यज्ययस्मात्त्वंस्नेहविह्वलां विहितावसरःस्त्रीणांशंकरस्यरहोविधौ तस्मात्तेपरुषारु
क्षाजडाहृदयवर्जिता गणेशाक्षरसदृशाशिलामाताभविष्यति एवमुत्सृष्टशापायागिरिपुत्र्यास्त्वनंतरं

स्कं·पु·२ निर्जगाममुखात्क्रोधः सिंहरूपी महाबलः पश्चात्तापं समाश्रित्य तयो देव्या विवर्जितः स तु
सिंहकरालोस्यो महाकेसरकंधरः प्रोद्भूतबललांगूलदंष्ट्रोत्कटमहामुखः व्यावृतास्यो ल
३०६ लज्जिह्वः क्षामकुक्षिश्चिकादिषुः तस्यास्यवर्तितुं देवी व्यवस्यत सती सदा ज्ञात्वा मनोगतं त
स्या भगवांश्चतुराननः आजगामाश्रमपदं संपदामाश्रमं ततः आगम्योवाच तां ब्रह्मा गि
रिजां मष्टया गिरा किं देवी प्राप्तुकामासि किमलभ्यं ददामि ते तच्छ्रुत्वोवाच गिरिजा गुरुगौ
रवगर्भितं तपसा दुष्करेणाप्तः पतित्वे शंकरो मया समांश्यामलवर्णेति बहुशः प्रोक्तवान् भ
वः स्यामहं कांचनाकारा बाल्यभ्यनच संयुता भर्तुर्भूतपतेरंगे एकतां निर्विशंकिता तस्यास्त
द्भाषितं श्रुत्वा प्रोवाच जलजासनः एवं भवतु भूयस्त्वं भर्तुर्देहार्धधारिणी ततस्तस्याः शरी
रात्तु स्त्री सुनीलांबुजत्वचा निर्गता सा भवद्भीमा घंटाहस्ता त्रिलोचना नानाभरणपूर्णांगी पी
तकौशेयवासिनी तामब्रवीत्ततो ब्रह्मा देवीं नीलांबुजत्विषां अस्माद्भूधरजादेहात्संपर्का १०६
त्वं ममाज्ञया संप्राप्ता कृतकृत्यत्वमेकानंशा पुराकृतिः य एष सिंहः प्रकृतो देव्याः क्रोधाद्वरानने

स तेस्तु वाहनो देवी केतौ चास्तु महाबलः गच्छ विंध्याचले तत्र सुरकार्यं करिष्यसि अत्र शुंभनिशुं
भौ च हत्वा तारकसैन्यपौ पांचालो नाम यक्षोयं पक्षलक्षपदानुगः दत्तस्ते किंकरो देवी तथेत्या
हपिता महं निर्गतायां च कौशिक्यां ज्ञात्वा स्वैरं श्रिता गुणैः सर्वैः पूर्वभवोपात्तैस्तदा स्वयमुपस्थि
तः उमापि प्राप्तसंकल्पा पश्चात्तापपरायणा मुहुः स्वं परिनिंदंती जगाम गिरिशांतिकं विप्र
यांतीं च तां द्वारि अपवार्य समाहितः रुरोध वीरको देवीं हेमवेत्रलताधरः तामुवाच च कोपेन
तिष्ठ तिष्ठ क्व यासि च प्रयोजनं न ते स्त्रीह गच्छ यावन्न मर्त्स्यसे देव्या रूपधरो दैत्यो देवं वंचयि
तुमिह प्रविष्टो न च दृष्टोसौ स च देवेन घातितः घातिते चाहमाक्षिप्तो नीलकंठेन धीमता का
पि स्त्री नापि मोक्तव्या त्वया पुत्रेति सादरं तस्मात्त्वमत्र द्वारस्था वर्षपूगाननेकशः भविष्यति
न चाप्यंच प्रवेशं लप्स्यसे व्रज एकाम प्रविश्य दत्र माता या स्नेहवत्सला नगाधिराजतनया
पार्वती रुद्रवल्लभा इत्युक्तानुगतो देवी चिंतयामास चेतसा न सा नारी तु दैत्योसौ वायोर्निवा
यभासत पृथ्वी वीरकः शास्ता मया क्रोधपरीतया अकार्यं क्रियते मूढैः प्रायः क्रोधसमन्वितैः

स्कं॰पु॰२ क्रोधेननश्यतेकीर्तिःक्रोधोहंतिस्थिरांश्रियं अपरिछिंनसर्वार्थापुत्रंप्रापितवत्यहं धीपरितार्थवोद्धी
र्णांसुलभोविपदोद्यः संविसैवमुवाचेदंवीरकंप्रतिशैलजा अधोऽज्ञाविकारेण वदनेनांबुजत्विषा
१०७ अहंवीरकतेमातामातेस्तुमनसोभ्रमः शंकस्यास्मिदयितासुतातुहिमभूभृतः ममगात्रस्थितिर्भा
सामाशंकांपुत्रभावय तुष्टेनगौरतादत्तामम्येयंपद्मयोनिना मयाशप्तोस्यविदितेवृत्तांतेदैवनिर्मिते
शैलानारीप्रवेशेतु शंकरेरहसंस्थिते ननिवर्तयितुंशक्यः शापःकिंतुब्रवीमिते मानुष्यांतुशिलायांतु
शिलादासन्भविष्यसि पुण्येवाप्यर्बुदारण्ये स्वर्गमोक्षप्रदेनृणां अचरेश्वरलिंगंतुवर्ततेयत्रवीरके वा
राणस्यांविश्वनाथसमंतत्फलदंनृणां प्रभासस्यचयात्राभिदृशाभिर्यत्फलंनृणां तदेकयात्रयाप्रोक्त
मर्बुदस्यमहागिरेः यत्रतस्मात्ततोमर्त्यादेहधर्तेन्विहायच संसारेनपुनर्भूयान्महेश्वरवचोयथा अ
र्बुदेयदिलभ्येतसेवितुंजन्मदुःखितैः वाराणसीचकेदारंकिंस्मरंतितरेथवेते तत्राराध्यभवंदेवंभवा
नंदितिनामभृत् शीघ्रमेवसिवात्रैवप्रतिहारत्वमास्यसी एवमुक्तेहृष्टरोमाविरकः प्रणिपत्यतां स्तुत्वा १०७
यविविधैर्वाक्यैर्मातरंसमभाषतः धन्योहंदेविशोऽस्यमानुष्यमतिदुर्लभं शापानुग्रहरूपोयंविशे

Dr. BHAU DAJI MEMORIAL

षादर्बुदाचले समीपेयस्यपुण्योस्तिमहीसागरसंगमः ऊर्ध्वःपृथिव्योदेशोयंयोगिरश्चार्णवांतरे त
त्रगत्वामहत्पुण्यमवाप्यभवभक्तितः पुनरेष्यामिभोमातारित्युक्ताभुप्लिलासुतः देवीचप्रविवेशाथभ
वनंशशिमौलिनः ततोदृष्ट्वाचतांप्राहधिग्नार्यइतित्र्यंबकः साचप्रणम्यतंमाहसत्यमेतन्निमिथ्यया ज
डःप्रकृतिभावोयंनार्यश्चाहितितिनिंदता पुरुषाणांप्रसादेनमुच्यंतेभवसागरात् ततःप्रहृष्टस्तामाहह
रोयोग्याधुनाशुभे पुत्रंदास्यामितेयेनत्वंख्यातिमाप्स्यसिशोभने ततोबभूवदेव्यासनानाश्चर्योऽयाहरः
ततोवर्षसहस्रेषुदेवास्त्वरितमानसाः ज्वलनंनोदयामासुर्ज्ञातुंशंकरचेष्टितं द्वारिस्थितंप्रतीहारंवंचयित्वाथ
पावकः पारापतस्यरूपेणप्रविवेशहरांतिकं ददर्शतंचदेवेशोविनतोप्रेक्ष्यपार्वती ततस्तंज्वलनंप्रा
हनेतद्यार्ग्यंत्वयाकृतं यदिदंक्षुभितंस्थानाममतेजोह्यनुत्तमं गृहाणत्वंसुदुर्बुद्धेनोवाधक्ष्यामित्वांरु
षा भीतस्ततोसौजग्राहसर्वदेवमुखंचसः तेनतेवन्हिसहिताविह्वलाश्चसुराकृताः विपाघजठराण्य
थावीर्यंमाहेश्वरंततः निःक्षांतंतत्सराजातंपारदंशातयोजनं वन्हिश्चव्याकुलीभूतागंगायांमुमुचेसकृत्
दह्यमानाचसादेवीतरंगैर्बहिरुत्सृत जातस्त्रिभुवनख्यातस्तेनविश्वेतपर्वतः एतस्मिन्नंतरेवन्हिराकुल

स्कं॰पु॰२ श्च हिमाचले सप्तर्षिभिर्वन्हिर्होमं कुर्वद्भिर्मंत्रवीर्यतः आगत्य तत्र जग्राह वन्हिर्भागं च तं कृतं ग
तवांस्तस्मिंश्च तत्रस्थः पत्नीस्तेषामपश्यत सुवर्णकदलीस्तंभनिभास्ताश्चंद्रलेखया पश्यमान
३०८ मफुल्लाक्षो वन्हिः कामवशं गतः सम्भ्रमश्चिंतयामास तन्यायां क्षुभितात्मियत साध्वीः पत्नीर्द्वि
जेंद्राणां मकामा कमयाम्यहं पापमेतत्कर्म चाग्रं न श्यामि न्यवत स्फुटं कृत्वे तं न त्रयेत कीर्तिया
वदार्च द्रतारकं एवं संचिंत्य बहुधा गत्वा चैव वनांतरं तारकानुचरस्यादेत्यस्य वन्हिपदच्यान
ततः स कामतंतप्तो मूर्छितः समपद्यते ततः स्वाहा च भार्यास्य बुबुधे तद्विचेष्टितं ज्ञात्वा चिं
तयामास प्रहृष्टा मनसि स्वयं सा भार्यामेषमेषमोत्यक्ताबहुवासादवज्ञया भार्याकामयेतऽ
नं सप्तर्षीणां महात्मनां तदासां रूपमाश्रित्य रमिष्येतेन चाप्यहं ततस्त्वंगिरसो भार्या शिवा ना
मेति शोभना तस्या रूपं समाधाय पावकं प्राप्य साब्रवीत् मामग्ने काम संतप्तां त्वं कामयितुमर्ह ३०८
सि न चेत्करिष्यसे देव मृतां मामुपधाय अहमंगिरसो भार्या शिवा नाम कृतात्मन सर्वाभिः स
हिता प्राप्ता तोश्चायास्यं त्वनुक्रमात् अस्माकं त्वं प्रियोऽसि त्वं लयितात्मेतदान्तर ततः स कामसंतप्तः

संबभूव तया सह प्रीतप्रीता च सा देवी निर्जगाम वनांतरात् चिंतयंति मम ते दृष्ट्वे दूरं परश्यंतिका
नेन ते ब्राह्मणीनामनृतं दोषं वक्ष्यंति पावकात् तस्मादेतद्रक्ष्यमाणा गरुडी संभवाम्यहं सु
पर्णी सा ततो भूत्वा ददृशे श्वेतपर्वतं शरस्तंबैः सुरं पत्रं रक्षोभिश्च पिशाचकैः सा तत्र सहसा ग
त्वा शैलपृष्ठं सुदुर्गमं प्राक्षिप्य कांचने कुंडे शुक्रं तथा रणेक्षना शिष्टानामपि देवीनां सप्तर्षीणां
महात्मनां पत्नीसरूपतां कृत्वा कामयामास पावकं दिव्यं रूपमरुंधत्याः कर्तुं न शंकितं तया
तस्यास्तपः प्रभावेन भर्तुः शुश्रूषणेन च षट्कृत्वास्तत्तु निक्षिप्तमग्निरेतः कुरूद्वह कुंडे स्मिंश्चैव
बद्धे ले प्रतिपद्येव स्वाहया ततश्च पावको दुःखाच्छुक्रोऽश्व मुमोचेह आः पापं कृतमित्येवं देहन्या
सकरोन्मति ततस्तं खेचरी वाणी प्राह मा मरणं कुरु भाव्यमेतच्च भाव्यर्था काहि पावक मुच्यते
भाव्यर्थेनापि यत्ते च परदारोपसेवनं कृतं तच्चेत सा तेन चामजीर्णं प्रवेक्ष्यति श्वेतके तो महा
यत्ते घृतधाराभितर्पितं शोकं च त्यज नैताः स्त्रीः स्वाहैवैयं तव प्रिया श्वेतपर्वत कुंडस्थं पुत्रं च द्र
ष्टुमर्हसि ततो वह्निस्तत्र गत्वा ददर्शात्तनयं प्रभुं अर्जुन उ॰ कस्मात्स्वाहाकरोद्रूपं षण्णां तासां महा

स्कं॰पु॰२ मुने यत्ता भर्तृपराः साध्व्यस्तस्विन्याग्निसंनिभाः नबिभेतिच किंताभ्यः षड्भ्यः स्वाहापराधिनी भर्तृभक्त्याज
दृग्धुं यतः शक्ताश्चतामुने श्रीनारदउ॰ सत्यमेवकुरुश्रेष्ठ श्रृणुतंचापिकारणं येनतासांकृतंरूपंनवाशापंद
३०९ दुश्चताः यत्तुतद्वह्निनाक्षिप्तं रुद्रतेजः सकृत्पुरा गंगायांतत्रसंस्नुस्ताः षड्धन्योज्ञानभावतः ततस्ताविह्वली
भूतातेजसास्तेनमोहिताः ऊर्ज्जयाचस्वभर्तॄणांगंगातीरेस्थितास्महः एतदंतरमालोक्यचिकीर्षंतीम
नोषितं स्वाहाशरीरमाविश्यतासांतेजोजहारतत् विरुह्य उवन्हिनाचापियथातेकथितंमया उपकारमिमं
ताभिः स्मरंतीमिश्वभारत नशप्ताः सायतः शापोनदेयश्चोपकारिणी ततः सप्तर्षयोज्ञात्वा ज्ञानेनाशु
चितांगताः तत्सजुःषट् तदापत्नीर्विनादेवीमरुंधतीं विश्वामित्रस्तुभगवान्कुमारंशरणंगतः स्तवंदिव्यं
संप्रचक्रे महासेनस्यचापिसः अष्टोत्तरशतंनाम्नांश्रृणुत्वंतानिफाल्गुन जपेनयेषांपापानियांतिज्ञानम
वाप्नुयात् त्वंब्रह्मवादीत्वंब्रह्मा ब्रह्मब्राह्मणवत्सलः ब्रह्मण्योब्रह्मदेवश्च ब्रह्मदोब्रह्मसंग्रहः त्वंपरंपरमं ३०९
तेजोमंगलानांचमंगलं अप्रमेयगुणश्चैवमंत्राणांमंत्रगोभवान् त्वंसावित्रीमयोदेवसर्वत्रैवापराजि
तः मंत्रशर्वात्मकोदेवः षडक्षरवतांवरः मालीमौलीपताकीचजटीमुंडीशिखंड्यपि कुंडलीलांगलीबा

लः कुमारः प्रवरोवरः गवांपुत्रसुरारिघ्नः संभवोभवभावनः पिनाकीशत्रुहश्चैतोगूढस्कंदः करोग्रणी
द्वादशेशोभूर्भुवोभावीभुवःपुत्रोनमस्कृतः नागराजस्तुधर्मात्मानाकपृष्ठः सनातनः त्वंभर्तासर्वभूतात्मा
त्वंत्राता त्वंसुखावहः शरदक्षसरवीतेजाषड्वक्त्रोभयनाशनः हेमगर्भोमहागर्भोजयश्चविजयेश्वरः त्वंक
र्ता त्वंविधाताचनित्योनित्यारिमर्दनः महासेनोमहातेजावीरसेनश्चभूपतिः सिद्धासनः सुराध्यक्षोभीम
सेनोनिरामयः शौरिपदुर्महोतेजावीर्यवान्सत्यविक्रमः तेजोगर्भोसुररिपुः सुरमूर्तिसुरोर्जितः कृतज्ञो
वरदः सत्यः शरण्यसाधुवत्सलः सुव्रतः सूर्यसंकाशोवन्हिगर्भोरणोत्सुकः पिप्पलीशीघ्रगोरौद्रीगांगेयोरि
पुदारुणः कार्तिकेयः प्रभुःक्षांतानीलदंष्ट्रोमहामनाः निग्रहोनिग्रहाणांचनेतात्वंसुरनंदनः प्रग्रहः परमा
नंदः क्रोधघ्नस्तारउच्छ्रितः कुक्कुटीबहुलीदिव्यः कामदोभूरिवर्धनः अमोघोमृतदोह्यग्निशत्रुघ्नः स
र्वमोदनः अव्ययोह्यमरोश्रीमानुन्नतोह्यग्निसंभवः पिशाचराजः सूर्याभः शिवात्माशिवनंदनः अपार
पारोदुर्ज्ञेयः सर्वभूतहितेरतः अग्राह्यकारणंकर्तापरमेष्ठीपरंपदं अचिंत्यः सर्वभूतात्मासर्वात्मात्वं
सनातनः एवंससर्वभूतानांसंस्तुतः परमेश्वरः नाम्नामष्टशतेनार्यविश्वामित्रमहर्षिणा प्रसन्ना

स्कं॰पु॰२ मूर्तिराहेदं मुनींद्रं व्रियतामिति मम त्वया द्विजश्रेष्ठ स्तुतिरेषा निरूपिता भविष्यति मनो
भीष्टं प्राप्तये प्राणिनां भुवि विवर्धितकुल लक्ष्मीस्तस्य यः प्रपठेदिमं न राक्षसा पिशाचा वा
३३० न भूतानि न चापदः विघ्नकारीणि तानि हि यत्रैवं संस्तुवंति मां दुःस्वप्नं च न पश्येत्स बद्धो मुच्येत
बंधनात् स्तवस्यास्य प्रभावेन दिव्यभावः पुमान्भवेत् त्वं च मां श्रुतिसंस्कारैः सर्वैः संस्कर्तुम
र्हसि संस्काररहितं जन्म यतश्च पशुवत्स्मृतं त्वं च मद्वरदानेन ब्रह्मर्षिश्च भविष्यसि ततामु
निस्तस्य चक्रे जातकर्मादिकाः क्रियाः पौरोहित्यं तथा भेजे स्कंदस्यैवाज्ञया प्रभुः ततस्तं वन्हि
रभ्यागाद्दर्शयन्सुतं गुहं षट्शीर्षं द्विगुणश्रोत्रं द्वादशाक्षिभुजक्रमं एवं श्रीवैचैककार्यं कुमा
रं सव्यलोकयत् कलिलं प्रथमे चान्हि द्वितीये व्यक्तितां गतं तृतीयायां शिशुर्जातश्चतुर्थे पूर्ण
एव च पंचम्यां संस्कृतः सोभूत्पावकं चाप्यपश्यत ततस्तं पाकः पार्थ आलिलिंग चुचुंबच को
टिसूर्यप्रतीकाशं वन्हिज्वालासमाकुलं सोमकांतप्रभाभिश्च ज्वलंतमिव तेजसा अणिमा ३३०
दिगुणोपेतं दानवांतकरं परं तेजसांतरसंस्थं तं बालविग्रहरूपिणं लोकत्रयानंदकरं देवा

नामभयप्रदं जातमात्रं तु तद्बालं ररास मुस्करं तदा सिद्धचारणगंधर्वाः किंनरोरगसंयुताः
समाजग्मुस्ततः शीघ्रं जयशब्दपुरःसराः वादित्राणि विचित्राणि दिवि नेदुः समंगलं पुष्पवृष्टिः
समभवत् गगनान्मूर्ध्नि बालके अप्सरसां गणाः सर्वे ननृतुर्हृष्टमानसाः दानवानां शरीरेषु
उत्पाता बहवोभवन् दिशः प्रसन्ना भवन्वायुः सुखवहो ववौ नक्षत्रग्रहताराश्च दिवि चंद्रादयस्त
था विमलोदयसंप्राप्ता जायमाने तु बालके प्रहर्षोत्फुल्लनयनो हर्षाकुलसमन्वितः जात
वेदास्तदा जातः पुत्रजन्मसुहर्षितः मेने तदात्मनो जन्म चरितार्थं कृतात्मनः याचकेभ्यो वीती
र्णानि दानानि बहुशस्तदा मुदा गानं तदा चक्रुः स्वाहायुक्तः स्वसंभृतं त्रैलोक्ये परमानं
दः समजायत फाल्गुन पुत्रदर्शनमात्रेण हृष्टरोमाभवत्तदा पत्नीफलमिदं संम्यक् सत्पु
त्रदर्शनं भुवि ऋणत्रयात्प्रमुच्येत स्वर्गो भवति शाश्वतः पुन्नाम नरका त्राता तस्मात्पुत्र इ
हाच्यते पुत्रेण लोकान्जयति शाश्वतान्पुत्रवान्नरः तस्मात्पुत्रं प्रशंसंति सदाचारं च स
ज्जनाः गृहस्थस्य फलं ह्येतत्कीर्तिर्लोके प्रगीयते देवाश्चापि प्रवर्तंते तत्पुत्रोत्पादनात्सदा

स्कं॰पु॰२ यज्ञानांच यथा वेद आश्रमाणां गृहाश्रमी वर्णानां ब्राह्मणो यद्वत्तद्वत्पुत्रेण मानवः यस्य सा तपसा वेद-
१११ दानाध्ययनकर्मभिः पितुराधिक्यतां याति स पुत्रो नेतरः क्वचित् तस्माद्वैश्वानरः पुत्रं दृष्ट्वा पूर्णमनोरथः
संजज्ञे जेतुकामो सौ त्रैलोक्यं सचराचरं पुत्रेति चोक्तास्तस्मै सन्नाहस्यमददात्स्वयं स च शक्तिं समादाय नम-
स्कृत्य च पावकं श्वेतशृंगं समारूढो मुखैः पश्यन् दिशो दश अनदद्द्रवनादं त्रासयन्सासुरं जगत् ततः
श्वेतगिरेः शृंगं रक्षःपन्नगसेवितं बिभेद तरसा शक्त्या शतयोजनविस्तृतं तदेकेन प्रहारेण खंडं नापतत्
तं भुवि चूर्णीकृता राक्षसास्ते सततं धर्मबाधकाः ततः प्रव्यथिता भूमिर्व्यशीर्यत समं ततः भीताश्च पर्वताः
सर्वे चकम्पुः प्रलये यथा भूतानि त्रसुर्भयं त्राहि त्राहि इति चोक्रुशुः एवं श्रुत्वा ततो देवा वासवं सहिते ब्रुवन्
येनैकेन नरेण त्रैलोक्यं व्याकुलीकृतं स तु क्षुद्रः क्षणाद्विश्वं संहरिष्यति वासव वयं च पालनार्थाय सृष्टा दे-
वेन वेधसा तच्च त्राणं सदा कार्यं प्राणैः कंठगतैरपि अस्माकं पश्यतामेवं यदि संक्षोभ्यते जगत् धिक्कृतो
नो भवीराणां श्लाघ्यं हि मरणं क्षणात् तदस्माभिः सहैनं त्वं हंतुमर्हसि वासव एवमुक्तस्तथेत्युक्त्वा देवैः सार्धं १११
तमभ्ययात् विदित्वा तु तस्य वीर्यं स शक्रः स्तूर्णतरं तदा उग्रं तं च महादेवं देवानीकं दुरासदं नर्दमानं गुहः

प्रेक्ष्य ननाद जलधिर्यथा तस्य नादेन महता समुद्भूतोदधिप्रभं बभ्राम तत्र तत्रैव देवसैन्यमचेतनं जिघां-
सुनुपसंप्राप्तान् देवान् दृष्ट्वा स पावकिः विससर्ज मुखात्तत्र पवद्धायाव कार्चिषः अदहद्देवसैन्यानि चे-
ष्टमानानि भूतले ते प्रदीप्तशिरोदेहाः प्रदीप्तायुधवाहनाः प्रच्युता जलधरं लक्ष्मात ततः शांतिमुपागताः त्य-
क्तो देवीस्तदा शक्रः स्कंदे वज्रमवासृजत् तद्विसृष्टं जघानाशु पार्श्वं स्कंदस्य दक्षिणं बिभेद च कुरुश्रेष्ठ पा-
र्श्वं तस्य महात्मनः वज्रप्रहारात्स्कंदस्य संजातः पुरुषोऽपरः युवा कांचनसंनाहः शक्तिधृक् दिव्यकुंडलः
शाखवद्यत्राभिविख्यातः सोऽपि नानवताडुतं ततश्चेंद्रः पुनः क्रुद्धो हृदि स्कंदं व्यदारयत् तत्रापि तादृशो जज्ञे
नैगमेय इति श्रुतः ततो विनघ स्कंदाद्याश्च त्वारस्तं तदाभ्ययुः तदेंद्रो वज्रमुत्सृज्य प्रांजलिः शरणं ययौ
तस्याभयं ददौ स्कंदः सहसैन्यस्य सत्तमः ततः प्रहृष्टास्त्रिदशा वादित्राण्यभ्यवादयत् वज्रप्रहारात्कन्याश्च
जज्ञिरे स्य महाबलाः या हरंति शिशून् जातान् गर्भस्थांश्चैव दारुणाः काकी च हिलिमा चैव रुद्रा च वृषभा
तथा आर्या पलाला मित्रा च सप्तैताः शिशुमातरः एतासां वीर्यसंपन्नः शिशुश्चाभूत्सुदारुणः स्कंदप्र-
सादजः पुत्रो लोहिताक्षो भयंकरः एष वीराष्टकः प्रोक्तः स्कंदमातृगणोद्भवः पूजनीयः सदा भक्त्या सर्वा-

स्कं॰पु॰२ पस्मारश्चांतिदः उपातिष्ठंस्ततस्कंदं हिरण्यकवचस्रजं लोहितांबरसंवीतं त्रैलोक्यस्यापि सुप्रभं
युवानं श्रीस्वयं भेजे तं प्रणम्य शरीरिणा श्रियाजुष्टं च तं प्राहुः सर्वे देवाः प्रणम्य वै हिरण्यवर्णभद्रं
३३२ ते लोकानां शंकरो भव भवानिंद्रोस्तु नो नाथ त्रैलोक्यस्य हिताय वै स्कंद उ॰ किमिंद्र सर्वलोकानां
करोतीह सुव्रतमाः कथं देवगणांश्चैव पाति नित्यं सुरेश्वरः देवा ऊचुः इंद्रो दिशति भूतानां बलं
तेजः प्रजाः सुखं प्रसादयच्छति तथा सर्वान् दायान् सुरेश्वरः दुर्वृत्तानां संहरति वृत्तस्थानां प्रयच्छति
अनुशास्ति च भूतानि कार्येषु बलवत्तरः असूर्ये च भवेत्सूर्यः तथा चंद्रे च चंद्रमाः भवत्यग्निश्च वायु
श्च पृथिव्यां जीवकारणं एतदिंद्रेण कर्तव्यमिंद्रो हि विपुलं बलं त्वं चेंद्रो भव नो वीर तारकं जहि ते नमः
इंद्र उ॰ भव त्वं इंद्रो महाबाहो सर्वेषां नः सुखावह प्रणम्य पार्थये स्कंद तारकं जहि रक्षनः स्कंद उ॰
शाधि त्वमेवात्र लोक्यं भवानिंद्रोस्तु सर्वदा करिष्ये चेंद्र कर्माणि न ममेंद्रत्वमीप्सितं त्वमेव राजा म
द्रं ते त्रैलोक्यस्य ममैव च करोमि किं च ते शक्र शासनं ब्रूहि तन्मम इंद्र उ॰ यदि सत्यमिदं वाक्यं नि ३३२
श्चयाद्भाषितं त्वया अभिषिच्यस्व देवानां सेनापत्ये महाबल अहमिंद्रो भविष्यामि तव वाक्याद्यशास्तु

ते स्कंद उ॰ दानवानां विनाशाय देवानामर्थसिद्धये गोब्राह्मणस्य चार्थाय एवमस्तु वचस्तव इ
त्युक्ते सुमहानादः सुराणामभ्यजायत भूतानां चापि सर्वेषां त्रैलोक्याकंपकारकः जयेति तुष्टुवुश्चैनं
चारित्राण भवादयन् ननृतुस्तुष्टुवुश्चैवं करघाताश्च चक्रिरे तेन शब्देन महता विस्मिता नगनं
दिनी शंकरं प्राह को देव नायं शब्दो मतिपर्वते रुद्र उवा॰ अद्य नूनं प्रहृष्टानां सुराणां विविधा गिरः
श्रूयंते च न थादेवी यथाजात सुतस्तव गवां च ब्राह्मणानां च साध्वीनां च दिवौकसां मार्जयिष्यति चा
श्रेणि पुत्रस्ते पुण्यवत्यसि एवं वदति सा देवी द्रष्टुमत्युत्सुका भवत् शंकरश्च महातेजाः पुत्रस्ने
हाधिकायतः वृषभं तत आरुह्य देव्या सह समुत्सुकः सगणो भव आगच्छ सुत्रदर्शनलालसः त
तो ब्रह्मा महासेनं प्रजापतिरथाब्रवीत् अभिगच्छ महादेवं पितरं मातरं प्रभो अनायावीर्यसंयोगा
त्वया लब्धिस्तु प्राप्य मी एवमस्त्विति चाप्युक्त्वा महासेनो महेश्वरं अपूजयद्भेमयाला पितरं मातरं
च सः ततस्तमालिंग्य चिरं चिरं संयोज्य चाशिषः चिरं जहर्ष तुष्टा भो पार्वती परमेश्वरो सिंहसा
रस्यतत्वं च ददौ तुष्टात्स्वशंकरः देवी प्रकृतिमोक्षं च तुष्टा हर्षपरिप्लुता एतस्मिन्नेव काले तु पद्म्य

स्तंसमागमन् ऋषिभिस्तापरित्यक्ता स्तंपुत्रेतिजगुस्तदा पार्वतीचततः प्राह ममपुत्रोनवस्त्वयं स्वाहाम
मेतिचप्राह पावकश्चममेतिच रुद्रोममेतिचप्राह ममदेवनदीतिच चक्रुस्तेकलहंघोरं विवदंतः परस्परं
 पुत्रस्तेहोहिबलवानपृथ्वीःकिंकिंनकारयेत् ततस्तान्प्रहसन्नाहविवादोयुज्यतेनच सर्वेषांवोगुहः पुत्राम
त्तावैप्रियतामिति ततः प्राहुश्चषड्व्य स्वर्गोनोत्यक्षयोभवेत् तथेतितागुहः प्राहशक्रस्तत्रांतरेब्रवीत्
रोहिण्याश्चानुजास्कंद स्पर्धमानानुजाभिजित् दुःखंतीज्येष्ठतांदेवी पृथक्चतपोरथा ततः प्रभृतिमदा
स्मिनतस्तानेस्थापयप्रभो ततस्तथेतिप्रोक्तेतिकृत्तिकास्तादिवंगताः नक्षत्रंसर्पशीर्षाभंभातितद्वन्हि
देवतं अथेनमब्रवीत्स्वाहाप्रियानाहंमहार्चिषः तदग्नेप्रियतोदेवी सहवासंसदेवतांस्कंदउ॰ हव्यंकव्यं
चयत्किंचितद्विजाहोष्यंतिपावके तत्तेनाम्नाप्रदास्यंति नासःसार्धंभवेत्तदा पावकः प्रार्थयामासः यज्ञभा
गानपुनस्तुतान् सचाद्याहाद्यप्रभृति यज्ञभागानवाप्नुहि इतरप्रार्थयामासुःस्वांतेनस्तमुतोभव एव
मेवतितानाहस्कंदस्तद्धिसुदुर्लभं ततस्तंयोगिनःसर्वे संभूयसनकादयः अभ्यषिंचनगिरौतस्मिन्गि
रौतस्मियोगिनामाधिपत्यके योगीश्वरमितिप्राहुःस्ततस्तंयोगिनस्तदा जहर्षुर्देवताश्चैव नानावद्यान्यवा

DR. BHAU DAJI MEMORIAL

दयन् अभिषिक्तेनतेनासौ शुशुभेश्वेतपर्वतः आदित्येनेवांशुमता सुरम्यउदयाचलः ततोदेवाःसगंध
र्वान्नखंसप्सरसस्तथा हृष्टानांसर्वभूतानांशुश्रुवेतेनिनदोमहान् एवंसेंद्रंजगत्सर्वंश्वेतपर्वतसंस्थितं
प्रहृष्टंप्रेक्षतंस्कंदं नचतृप्यतिदर्शनात् इतिश्रीस्कंदपुराणे कुमारिकाखंडे नवविंशोध्यायः नारदउ॰
ततस्कंदसुरैःसार्धंश्वेतपर्वतमस्तकात् उत्तीर्यतारकंहंतुं दक्षिसदिशंययौ ततः सरस्वतीनीरेयानि
भूतानिभारत ग्रहाश्चापग्रहाश्चैव वेतालाडाकिनीगणाः उन्मादायेह्यपस्माराः पलाश्चपिशाचकाः
देवैस्तेषामाधिपत्ये सोभिषिच्यतपावकिः यथातेनेवमर्यादां संत्यजंतिदुराशयाः एतेस्तस्मात्समाक्रां
तःशरण्यंपावकंव्रजेत् अग्रकोणेद्वियंदांतंशुचिनिस्समतंद्विजं आस्तिकंस्कंदभक्तंचवर्जयंतिग्रहादिकाः
महेश्वरंचापभक्ताभक्तानारायणंचये तेषांदर्शनमात्रेण नश्यंतेतेविदूरतः ततःसर्वैःसुरैःसार्धं मही
तीरंययौगुहः तत्रेदेवैःप्रकथितं महीमाहात्म्यमुत्तमं शृण्वन्विशिश्मियेस्कंदः प्रणनामचतांनदीं
ततोमहीदक्षिणतटिरमाश्रित्याधिक्षितं प्रणम्यशक्रप्रमुखागुहवचनमब्रुवन् अभिषिक्तंविनास्कं
दसेनापतिमकल्मषं नशर्मलभतेसेना तस्मात्त्वमभिषेचय महीसागरसंभूतैः पुण्यैश्चापिशिवैर्जलैः

स्कं॰पु॰२ अभिषेक्ष्यामहे लोकं तत्रैनो दृष्टुमर्हसि यथा हस्तिपदे सर्वैः पदांतर्भावयिष्यते सर्वतीर्थांतर
स्नानं तथार्णव महीजले सर्वभूतमयो यद्वत्त्र्यंबकः परिकीर्तितः सर्वतीर्थमयस्तद्वत् महीं
३३५ सागरसंगमः अर्धनारीश्वरं रूपं यथा रुद्रस्य सर्वदं तथा महीसमुद्रस्य स्नानं सर्वफलप्रदं
येनात्र पितरः स्कंद तर्पिता भक्तिभावतः तेन सर्वेषु तीर्थेषु तर्पिता नात्र संशयः न चैतद्धृदि
मंतव्यं क्षारमेतज्जलं हितं यथा हि कुद्रुतिकादिगवां गस्तं हि क्षीरदं येवमेलिदं तोयं पि
तॄणां तृप्तिदायकं एवं ब्रुवन्सुदेवेषु कपिलोपि मुनिर्जगौ सत्यमेतदुमापुत्र सर्वतीर्थमया
मही कार्दमेय स्त्वहमपि त्वत्तीर्थे महागुणान् सर्वा भुवं परित्यज्य कृत्वा ह्याश्रममाश्रितः
ततो महेश्वरः प्राह सत्यमेतत्सुरोदितं ब्रह्माद्यास्तं तथा प्राहुस्तत्र भूयाप्यतो गुह अत्राभिषेकं
ते देवीरकरिष्यामः सदादिशा ततः सुविस्मितस्तत्र स्नात्वा स्कंदो महामना अभिषिंचंतु मां देवा
इतीतान ब्रवीद्वचः ततोभिषेकसंभारान् सर्वान्संभृत्य शास्त्रतः जुहुवुर्मंत्रपूतेग्नौ चत्वारो मुख्य ३३४
ऋत्विजः ब्रह्मा च कपिलो जीवो विश्वामित्रश्च तुर्थकः अन्ये च शतशस्तत्र मुनयो वेदपारगाः तत्र

आहुतमंत्रोत दर्शयामास भारतः यदग्निकुंडमध्यस्थो लिंगमूर्तिर्व्यदृश्यत अहमेवाग्निमध्य
स्थो हविर्गृह्णामि नित्यशः एतत्संदर्शनात्स्वाय लिंगमूर्तिरभूद्द्विजः तल्लिंगमतुलं देवानमश्चक्रु
र्मुदान्विताः सर्वपापहरं पार्थ सर्वकामफलप्रदं तत्र होमावसाने च दत्ते हिमवता शुभे दिव्य
रत्नान्वितस्कंदो निषण्णः परमासने सर्वमंगलसंभारैर्विधिमंत्रपुरस्कृतं अभिषिंचंस्ततो दे
वाः कुमारं शंकरात्मजं इंद्रो विष्णुर्महावीर्यो ब्रह्मा रुद्रौ च फाल्गुन आदित्याद्या ग्रहाः सर्वे तथो
भावनिलानिलौ आदित्या वसवो रुद्रा साध्याश्चैवाश्विनावुभौ विश्वेदेवाश्च मरुतो गंधर्वाप्सरस
स्तथा देवब्रह्मर्षयश्चैव वालखिल्या मरीचिपा विद्याधरा योगसिद्धा पुलस्त्यपुलहादयः
पितरः काश्यपो त्रिश्च मरीचिर्भृगुरंगिराः दक्षोथ मनवो ये च ज्योतींषि क्रतवस्तथा मूर्तिमत्य
श्च सरितो मही प्रभृतिकास्तथा लवणाद्याः समुद्राश्च प्रभासाद्याश्च तीर्थकाः पृथिवी द्यौर्दिशा
श्चैव पादपाः पर्वतास्तथा आदित्याद्या मातरश्च कुर्वत्यो गृहमंगलं वासुकिप्रमुखा नागास्तथाभो
गरुडारुणौ वरुणो धनदश्चैव यमः सानुचरस्तथा राक्षसो निर्ऋतिश्चैव भूतानि चपलाशनाः

स्कं॰पु॰२ धर्मो बृहस्पतिश्चैव कपिलो गाधिनंदनः बहुत्वाच्चैव नोक्ता विविधा देवतागणाः तेऽत्र सर्वे महत्कृत्वा अ
भिषिंचन्मुदा गुहं ततो महास्वना मुख्या देवदेवाद्दिदृर्यहं ददौ पशुपतिस्तस्मै सर्वभूतमहाचमूं विष्णु
११५ र्ददौ वैजयंती मालां बलविवर्धिनी उमा ददौ वारजसी वाससी सूर्यसप्रभे गंगा कमंडलुं दिव्यममृ
तोद्भवमुत्तमं मही महानदी तस्य चाक्षमालां ससागरा ददौ मुदा कुमाराय दंडं चैव बृहस्पतिः गरुडो
दयितं पुत्रं मयूरं चित्रबर्हिणं आरुणस्ताम्रचूडं च प्रददौ चरणायुधं छागं च वारुणो राजा बलवीर्य
समन्वितं कृष्णाजिनं तथा ब्रह्मा ब्रह्मण्याय ददौ जयं चतुरोनुचरांश्चैव महावीर्यबलोत्कटान् नंदि
सेनं लोहिताक्षं घंटाकर्णं च मानसान् ततस्थाणुर्ददौ देवो महापारिषदं क्रतुं सहि देवासुरे युद्धे दैत्या
नाभीमकर्मणां जघान दोर्भ्यां संक्रुद्धः प्रयुतानि चतुर्दश यमः प्रादादनुचरौ यमकालोपमौ तदा उन्मा
थं च प्रमाथं च महावीर्यौ महाद्युती सुभ्राजो भास्करस्यैव यौ सदा चानुपायिनौ तौ सूर्यः कार्तिकेयाय ददौ
पार्थ मुदान्वितः कैलासशृंगसंकाशौ श्वेतमाल्यानुलेपनौ सोमोप्यनुचरौ प्रादान्मणिं सुमणिमेव च ११५
ज्वालाजिह्वं ज्योतिषं च ददावग्निर्महाबलो परिघं च बलं चैव भीमं च सुमहाबलं स्कंदाय त्रीनचतुरानुद

दौ विष्णुरुरुक्रमः उत्क्रोशं पंचजं चैव वज्रदंडधरावुभौ ददौ महेंद्रपुत्राय वासवः परवीरहा तौ हि शत्रू
न्महेंद्रस्य जघ्नतुः समरे बहून् वर्धनं बंधनं चैव आयुर्वेदविदावुभौ स्कंदाय ददतुः प्रीतावश्विनौ भरतर्ष
भ बलं चातिबलं चैव महावक्त्रौ महाबलौ प्रददौ कार्तिकेयाय वायुश्चानुचरावुभौ घसं चातिघसं चैव
वरुणश्च ददौ प्रभुः सुवर्चसं महात्मानं तथैवाप्यतिवर्चसं हिमवान्प्रददौ पार्थ साक्षादहित्रकायवे
कांचनं च ददौ मेरुर्मेघमालिनमेव च उच्छ्रितं चातिशृंगं च महापाषाणयोधितं स्वाहेयाय ददौ प्रीतो सविंध्य
पार्षदं शुभौ संग्रहं विग्रहं चैव समुद्रोपि गदाधरौ प्रददौ पार्षदौ वीरौ महीनाद्यासमन्वितः उन्मादं पुष्प
दंतं च शंकुकर्णं तथैव च प्रददावग्निपुत्राय पार्वती शुभदर्शना जयं महाजयं चैव नागौ ज्वलनसूनवे प्र
ददौ बलिनां श्रेष्ठौ सुवर्णपार्षदावुभौ एवं साध्याश्च रुद्राश्च वसवः पितरस्तथा सर्वे जगति ये मुख्या ददुः स्कं
दाय पार्षदान् नानावीर्यान्महावीर्यान् नानायुधविभूषणान् बहुत्वान्नात्र वक्ष्यंते संख्यातुं तांश्च फाल्गुन मा
तॄश्च ददौ तस्य तदा मातृगणान् प्रभो याभिर्व्याप्तास्त्रयो लोकाः स्वपःकल्याणि भिश्वराचराः प्रभावती विशालाक्षी
गोपाली गोनसा तथा अप्सुजाता बृहद्दंडी कालिका बहुपुत्रिका भयंकरी च चक्रांगा तीर्थनेमीश्च माधवी

स्कं॰पु॰२ गीतप्रीया अलाताक्षी चटुलाप्रालभामुखी विद्युज्जिह्वा रुद्रकाली शतोलूखलमेखला शतघं
टाखिंखिणिका चत्राक्षी च लराळया पूतना रोदना वामा कोटसा मेघवाहिनी ऊर्ध्ववेणीधरा चै
११६ व जरायुर्जरानना वेटखेटीदहद्दहा तथा धमधमा जया वक्रवेणी वक्रश्री वक्रपादा वक्र
स्तनी शतोलूकमुखी रूक्षा कर्णप्रावरणा तथा शृगाल्या धान्यवासा पशुदा धान्यदा सदा
एताश्चान्या बह्व्यश्च मातरो भरतर्षभ बहुत्वादहं तासां न संख्यातुमिहोत्सहे वृक्षचत्वर
वासिन्यश्चतुष्पथनिकेतनाः गुहाश्मशानवासिन्यः शैलप्रस्रवणालयाः नानाभरणवेषास्ता
नानामूर्तिधरास्तथा नानाभाषायुधकराः परिवव्रुस्तदा गुहं ततः स शुशुभे श्रीमान् गुहो गुह
इवापरः सेनापत्येऽभिषिक्तो देवैर्नानामुनीश्वरैः ततः प्रणम्य सर्वांस्तानेकैकेन पावकिः
प्रियतां वरयित्वाह भवब्रह्मपुरोगमान् इति श्रीस्कंदपुराणे कुमारिकाखंडे कार्तिकेयसेनाप
त्येऽभिषेकः त्रिंशोऽध्यायः तेचैनं योअसचारीभिरयाचंत वरं गुहं एष एव वरोऽस्माकं यत्पापं तार ११६
कं जहि एवमस्त्विति तानुक्त्वा योगो योग इति ब्रुवन् तारकारिर्महातेजा मयूरं चाध्यरोहत शक्ति

हस्तो विनद्याथ गुहो देवांस्तदाब्रवीत् यद्यद्य तारकं पापं नाहं हन्मि सुरोत्तमाः गोब्राह्मणावमन्
णां ततो यामि गतिं स्फुटं एवं तेन प्रतिज्ञाते शब्दोऽतिसुमहानभूत् योगो योग इति प्राकुरात्रपाउा
रजन्मनः अरजोवाससी रक्ते वसानः पार्वतीसुतः अथाग्निः सर्वदेवानां स्थितो वीरायुधो मुदा
तस्य केतुरलं भाती चिरणायुधशोभितः चरणाभ्यां गिरिं शक्त्या यो विदारयितुं रणे यो वक्ष
सर्वभूतानां प्रभा शांतिर्बलं यथा योऽस्य मानस्य वीरस्य देहे प्रादुर्भूतः स्वयं धर्मः सत्यः समं मोहा
स्तेजस्कांतलमक्षितः बलमोजः कृपा चैव बध्वाक्ययुगं तथा आदिशाकारिण्यग्रस्य स्वयं त
स्थुर्महात्मनः तमग्रे चापि गच्छंतं पृष्ठतोऽनुययौ हरः रथेनादित्यवर्णेन पार्वत्या सहितः प्रभुः नि
र्मितेन हारेणैव स्वयमीशानलीलया सहस्रं तस्य सिंहानां तस्मिन्युक्तं रथोत्तमे अभीष्टं पुरुषं व्या
घ्रब्रह्माचजयहेस्वयं तेपिबां तद्वाकाशं त्रासयंतश्चराचरं सिंहारथस्य गच्छंतो नदंतश्चारुके
सराः तस्मिन्रथे पशुपतिः स्थितो भात्युमया सह विद्युता मंडितः सूर्यः सेंद्रचापघनो यथा अ
ग्रतस्तस्य भगवान् धनेशो गुह्यकैः सह आस्थाय रुचिरं याति पुष्पकं नरवाहनः ऐरावणसमा

स्कं॰ कु॰ २ सद्धायशक्रश्चापि सुरैः सह पृष्ठतोनुययौ यातं वरदं वृषभध्वजं तस्य दक्षिणतो देवा मरुतश्चित्रयोधिनः
गच्छंति च सुभिः सार्धं रुद्रैश्च सह संगता यमश्च मृत्युना सार्धं सर्वतः परिवारितः घोरैर्व्याधिशतैश्चापि
३३७ संवृतो याति कोपतः यमस्य पृष्ठतश्चापि घोरस्त्रिशिखरः सितः विजयो नाम रुद्रस्य याति शूलस्स्वयंकृतः
तमुग्रपाशो भगवान्वरुणः सलिलेश्वरः परिवार्य शनैर्याति यादोभिर्विविधैर्वृतः पट्टिशं चान्वगात्सार्थ
अर्द्धं पाशुपतं महत् बहुशीर्षं महाघोरमेकपादं बहूदरं पृष्ठतो विजयाश्चापि याति रुद्रस्य पट्टिशः ग
दा मुशलशक्त्याद्यैर्वरप्रहरणैर्वृतः कमंडलुमहत् चान्यन्महर्षिगणसेवितं तस्य दक्षिणतो भाति दं
डोगच्छन् श्रियावृतः भृग्वंगिरोभिः सहितो देवैरप्यभिपूजितः राक्षसाश्चान्ये देवाश्च गंधर्वाभुजगास्तथा
नद्यो नदाः समुद्राश्च मुनयोऽप्सरसां गणाः नक्षत्राणि ग्रहाश्चैव जंगमं स्थावरं तथा मातरश्च महादेव
मनुजग्मुः क्षुधान्विताः सर्वेषां पृष्ठतश्चासीत्तार्क्ष्यस्थो बुद्धिमान् हरिः पालयन्पृतनां सर्वां स्वपरिवारसं
वृतः एवं सैन्यसमोपेत उत्तरं तटमागतः ताम्रप्राकारमाश्रित्य तस्थौ त्र्यंबकनंदनः सतारकपुरस्यापि ३३७
पश्यन्नृद्धिमनुत्तमां विसिस्मये महासेनः प्रशंसंस्तपसश्च स्थितः पश्यन् शुभ्रमयूरस्थो गुहस्तदा

छत्रेणाध्रियमाणेन स्वयं सोमसमत्विषा वीज्यमानश्चामराभ्यां वालनिभ्यां महाद्युतिः मातृभिश्च सुरै
र्देवैः स्वैर्गणैरपि संवृतः ततः प्रणम्य तं शक्रो देवमध्ये वचोऽब्रवीत् पश्यपश्य महासेन दैत्यानां बलशालि
नां यत्नां कालेन जानंति मर्त्या गेहरता इव एतेषां वरहेतूतो यत्सांप्रांसेत ततारकः विराणामुचितं लेलकी
र्तिदं च महाजने अनुत्तयाततस्कंद भक्तशक्रो धनंजय मामादिश्यासुरं द्रष्टुं प्राहिणोदेवयोग्यकं अहं
स्वयं गंतुकामः शक्रेणापि च प्रेषितः प्रासादस्त्रीसहस्राणां प्रोवाच मध्यतोऽप्यहं असुराधम दुर्बुद्धे शक्र
स्यामहतद्धर्ष्ण यज्जगद्दलनाप्राप्तं किल्बिषं दानव त्वया तस्याहं नाशकस्त्वद्य पुरुषश्चेद्भविष्यसि शीघ्रं
निसर पापिष्ठ निःसरिष्यसि चेन्नहि क्षणात्त्वां पुरं क्षिप्यं पातिष्याय च सागरं इति श्रुत्वा रुषवाणं क्रुधः
स्त्रिगण संवृतः मुष्टिमुद्यम्य वां धावद्धी तश्चाहं पलायितः व्याकुलस्य वृत्तांतं कुमाराय न्यवेदयं मं
यिचाप्यागते दैत्यश्चिंतयामास चेतसि नालब्धः संज्ञायः शक्रो वक्तुमेत्तादिहार्हसि निमित्तानि च घोराणि
संत्रासं जनयंति मे एवं विचिंत्य चोत्थाय गवाक्षं सोऽध्यरोहत सहस्रभौमिकं वासश्रृंगवातायनास्थितः
अपश्यद्द्वंसैन्यैः सद्द्विं भूमिं च संवृतां रथैर्गजैर्हयैश्चापि नादिताश्च दिशो नदद्भिः विमानैश्चाद्भुताकारैः

किं न रोडीत नादितैः अक्षोभ्यामिव तां सेनां दृष्ट्वा सोचिंतयत्तदा एतेमयाजिताःपूर्वं कस्माद्भू
नोदकुर्यादिराः सर्पज्ञातुन च प्रसकु शिरो बुधः शिरस्य गस्तिमाध्याय शयीताथ पुरंदरं उदक्याः दर्शनं स्प
र्शं वर्जे संभाषणं तथा नाप्सु मूत्र पुरीषं वा मैथुनं वा समाचरेत् कुलानि भावितोदेव मनुर्वर्षिसमर्चितं ३६३
पितॄणां च ततः शेषं भोक्तुमाहेश्वरो हि ति वाग्यतः शुचिराचांतः प्राङ्मुखो दङ्मुखोपि वा अंतर्जानुश्च तश्चि

त्तो भुंजीतान्नमकुत्सयन् नोपवातं विना दोषान्नतस्योदाहरेद्बुधः नग्नस्नानं न कुर्वीत न शयीत व्रजेत्तथा
दुःकृतं नगरेऽश्वयाकुक्षं चैनं प्रसादयेत् परिवादं न शृणुयात् अन्येषामपि जल्पतां सदाचाकर्णयेत्धर्मो
स्त्वत्का कृत्त्सशानास्यपि नित्यं नि संहि समार्ष्टि गेहदर्पणयोरिव शुक्लाणां चतुर्थ्यां नक्तभोजी सदा भ
वेत् तिसो रात्रीर्न रात्रौ श्चेदेवं माहेश्वरो भवेत् संयावं कृसरां मांसं नात्मानमुपसाधयेत् सायं प्रातश्च भोक्त
व्यं कृत्वातिथिभोजनं स्वप्नाध्ययनभोज्यानि संध्ययोश्च विवर्जयेत् भुंजानः संध्ययो मोहाद्धसुरावसथो भवे
त् स्नातानधूनयत्केशान् क्षुतनिष्ठीवितेष्वपि आलभेद्दक्षिणं कर्णं सर्वभूतानि शापयेत् न चापि नीलवा
सास्यान्न विपर्यस्तवस्त्रभृत् वर्जयेन्मलिनं वस्त्रं दशाभिश्च विवर्जितं प्रक्षाल्य मुखहस्तौ च पादौ चाप्युपवि
श्य च अंतर्जानुस्त्विराश्चोमांद्व्मुखं परिमार्जयेत् तोयेन स्पर्शयेत्वानि स्वमूर्धानं तथैव च आचम्य पुनराच
म्य क्रियाः कुर्वीत सर्वशः क्षुत निष्ठीविते चैव दंतलग्ने तथैव च पतितानां च संभाषे कुर्यादाचमनक्रियां
अप्यत्न्यायनि त्यं भवितव्यं विपश्चिता धर्मतो धनमाहार्यं स्पष्टव्यं चापि यत्नतः हीभ्यो नैतेनि नयुंजीत
लंकारं कर्हिचित् बुधः लक्कारो वा वधो वापि गुरूणामुभयं समं सलंबाश्चैनित्यमंत्रेण भाग्यं कार्यं साध्यं निस

स्कं॰पु॰२ मायासकारी कोके मुष्मिन्न्याधितं स्यात्तथास्मिन्नात्मायोगे योजनीयो गभीरैः तीर्थस्नानैः सो
पवासैर्व्रतैश्च पात्रदानैर्होमजप्यैश्च यत्नैः भवार्चनैर्देवपूजाविशेषै रात्मानित्यं त्रो धनी यो मला
३६४ क्तः यत्रापि कुर्वतो नाम्ना जुगुप्सामेति पार्थिव तत्कर्तव्यमसंगेन यन्न गोप्यं महाजनैः इतित
वै समुद्दिष्टाः कीर्तितः किंचिदेव च शास्त्रस्मृतिपुराणस्य स्त्वया श्रोतव्य एव च एवमाचरतो धर्ममा
हेशस्य गृहे सतः धर्मार्थकामसंप्राप्त्या परत्रेह च शोभनं एवं नानाविधान् धर्मान् महाकालस्य
फाल्गुनः वदतो ध्वनिराकाशे सुमहान्यभिजायते यावत्पश्यति यत्तत्र समाजग्मुः शृण्वतान्
ब्रह्माविष्णुस्त्वं रुद्रो देवी रुद्रगणास्तथा इंद्रादयस्तथा देवा वसिष्ठाद्या मुनीश्वराः तुंबरप्रख्या
श्चापि गंधर्वाप्सरसां गणाः तान्महेशमुखान् सर्वान्महाकालो महामतिः अर्चयामास बहुधा भ
क्त्युद्रेकातिपूरिताः ततो ब्रह्मादिभिर्देवैः शुभैरत्नमयासने उपविष्टश्चाभिषिक्तो महीसागरसं
गमे ततः श्रीमान्महाकालः प्राप्य द्वारपदं महत् मूर्ध्ना प्रणम्य देवेशं गिरिजां चाभ्यवादयत् ततो ३६४
देव्या समालिंग्य निस्ताऽसंगं स्वकं मुदा पुत्रत्वे कल्पितः पार्थ महाकालो महामतिः उक्तश्च यावद्द्रुमो

उंइदमास्ते शिवव्रत तावत्तिष्ठ शिवस्थाने शिव वत्सिव भक्तितः देवेन च वरो दत्तः स्वलिंगे येच
यिष्य जितेंद्रियः शुचिर्भूत्वा अद्यामे लोकमाप्स्यति दर्शनं स्तवनं पूजा प्रणामश्च ततो जपः दानं
चात्र कृतं लिंगे ममातितुष्टिकारकं इत्युक्ते विस्मिता देवाः साधु साध्विति ते जगुः ब्रह्मविष्णुमु
खाश्चैव महाकालमतुष्टुवुः ततः सुरैः स्तूयमानो वंद्यमानश्च चारणैः नृत्यद्भिरप्सरोभिश्च गीते
र्गंधर्वजैः शुभैः कोटिकोटिगणैश्चैव स्तुवद्भिः सर्वतो वृतः महाकालो रुद्रभुवनं गतो भवपुरःसरः
एवमेतं महालिंगं उत्पन्नं कुरुनंदन कूपश्चापि सरः पुण्यं महाकालस्य सिद्धिदं अत्रेयमनुजापा
र्थ लिंगस्याराधनेरताः महाकालः समालिंग्य तान् शिवान्येवदयेत् एवं तदत्र लिंगं त्रिषु लोकेषु वि
श्रुतं दृष्टं स्पृष्टं पूजितं च गतास्ते भवसद्मतत् एवमेतानि लिंगानि पूजितानि च फाल्गुन ये शृण्वंति
गृणंते नरं तेपि धन्याने रोत्तमः इति श्री स्कंदपुराणे कुमारिकाखंडे श्री महाकालमहात्म्ये एकचत्वा
रिंशोध्यायः श्रीनारद उवाच ततो मया स्थापितेषु स्थानेषु कालांतरेणह चिंतितं हृदयेम या द्वि
जानुग्रहकाम्यया वासुदेवविहीनं हि तीर्थमेतन्न रोचते असर्व हि जगद्यस्मात्स हि भूषणभूषणं य

स्कं·पु·२ अत्रैवहरिःस्वीतीर्थेगेहेथमानसे ज्ञास्विवानदसत्सर्वं हं सतीर्थेनवायसं तस्मात्प्रसाद्यवरदं तीर्थे
स्मिन्पुरुषोत्तमं आन्वीक्षिककलयासाक्षाद्विश्वानुग्रहकाम्यया इतिसंचिंत्यकौरव्य ततोहंचात्रसंस्थितः
३६५ ज्ञानयोगेनयोगींद्रंज्ञातंवर्षाण्यनेकशः अष्टाक्षरंजपन्मंत्रं संनिगृह्येंद्रियाणिच वासुदेवमयोभूत्वा स
र्वभूतकृपापरः एवंमयाराध्यमानोगरुडंहरिरास्थितः गणकोटिपरिवृतः प्रत्यक्षंसमजायत तमहं
प्रांजलिर्भूत्वा दत्वार्घ्यंविधिवत्सुरैः प्रत्यवोचंप्रणम्याथ प्रबद्धकरसंपुटः श्वेतद्वीपपुराद्दृष्टंमयारू
पंतवप्रभो अजंसनातनंविष्णोनरनारायणात्मकं तद्रूपस्यकलामेकांस्थापयात्रजनार्दन यदितु
ष्टोसिमेविष्णो तदिदंक्रियतांत्वया एवंमयाप्रार्थितोथप्रोवाचगरुडध्वजः एवमस्तुब्रह्मपुत्र यत्त्वाया
भीप्सितंहृदि तत्तथाभवितासर्वं मयत्रस्थेसदेवहि एवमुक्त्वागतेविष्णौनिवेश्यस्वकलांप्रभो मया
संस्थापितोविष्णुर्लोकानुग्रहकाम्यया यस्मात्स्वयंश्वेतद्वीपनिवास्यत्रहरिःस्थितः ।व.धौविश्वस्यविश्वा
त्मावासुदेवस्ततस्स्मृतः कार्तिकेशुक्लपक्षेयाभवेत्सैकादशीशुभा स्नानंकृत्वाविधानेनवैकुंठपदमाप्नुयात ३६५
कुलानांतारयोत्सार्थंतोयप्रस्रवणादिषु योर्चयेदच्युतंभक्त्यापंचोपचारपूजया उपोष्यजागरंकुर्यात द्वी

तवाग्रेहरेःपुरः कथांचावैष्णवीकुर्यात दंभक्रोधविवर्जितः दानंदद्याद्यथाभक्त्यानियतोहृष्टमानसः अ
नेकभवसंभूतात्कल्मषादखिलादपि मुच्यतेमानसंदेहोयद्यपिब्रह्मघातकः गारुडेनविमानेनवैकुंठपद
माप्नुयात कुलानांतारयोत्सार्थंज्ञातमेकोत्तरंनरः श्रद्धायुक्तंमुदायुक्तंसोत्साहंसस्पृहंतथा अहंका
रविहीनंचस्नानंधूपा तुलपनं पुष्पनैवेद्यसंयुक्तंमेशानादपुरस्कृतं पुराणश्रुतिसंपन्नंभक्तिन्नत्यस
मन्वितं विनिद्रंक्षुतत्पास्वादस्पृहाहीनंचभारत तत्पादसौरभद्राणांसंयुक्तंविष्णुवल्लभं सगीतंसा
र्वनर्तकंतत्क्षेत्रगमनान्वितं वाद्योरोधनसंयुक्तंब्रह्मचर्यसमन्वि स्तुतिपाठेनसंयुक्तंपादोदकविभूषि
तं सत्यान्वितसत्तोयोगसंयुतंपुण्यवार्तया पंचविंशतिभिर्युक्तंगुणैर्योजागरंनरः एकादश्यांप्रकुर्वी
नपुनर्जायतेभुवि अत्रैवाथींधरःपूर्वमेतरयद्विजः सिद्धिप्राप्तोभोगोवासुदेवप्रसादतः अर्जुनो
वाच एतेरयःकस्यपुत्रोनिवासःकास्यवामुने कथंसिद्धिमगात्सोमान्वासुदेवप्रसादतः श्रीनारद
उवाच अस्मिन्वमहस्थानेहारीतस्यान्वयेभवत मांडुकारितिविप्राग्र्योवेदवेदांगपारगः तस्यासीदि
तरानामभार्यानारीगुणैर्युता तस्यामुत्पद्यतसुतस्त्वैतरेयइतिस्मृतः सचबाल्यात्प्रभृत्येवप्राग्जन्मन्यनु

स्कं·पु·२ क्षितं जजाप मंत्रं सततं द्वादशाक्षरसंज्ञितं नश्चितेन्यत्र वस्तेयमनसापि न किंच ततोस्मै कार्यमि
त्येव न नापांपैः प्रबोधितः पित्राय दान कुरुते व्यवहाराय मानसं ततो निश्चित मनसा तज्जाप मिति
३६६ भारत अन्यां विवाहयामास दारां पुत्रांस्तथा द्वेष पिंगलाख्या नाम सा भार्या तस्या पुत्राश्च जज्ञिरे च
त्वारः कर्मकुशला वेदवेदांगवादिनः यज्ञपुण्यतिहोमेषु द्विजैः सर्वत्र पूजिताः यतरेयातिनित्यं च
त्रिकालं हरिमंदिरे जजापपरमं जाप्यं नान्यत्र कुरुते श्रमं ततो माता निराश्वा च सपत्नीतनया त
था दार्यमाणेन मनसा तनयं वाक्यमब्रवीत् क्लेशायैव च जातोसि धिग्मजन्मच जीवितं नार्यात
स्यानलोकश्चैव राजन न निस्फुरे विमानिता यो भर्तास्याः न पुत्रस्य गुणैर्युतः पिंगयं कृतपुण्यावे त
स्याः पुत्र महागुणाः वेदवेदांगतत्वज्ञाः सर्वत्राभ्यर्चिता गुणैः तदहं पुत्र दुर्भाग्या निमज्जिष्ये परम
स्युजीवितं किं फलं मम त्वमप्येवं महामोनी नंदभक्तो हरेश्चिरं इति मातुर्वचः श्रुत्वा प्रहसं नेत्तर
यकः ध्यात्वा मुहूर्तं धर्मज्ञो मातरं प्रणतोब्रवीत् मातर्मिथ्याभिमग्नासि अज्ञाने ज्ञानवत्यसि अ ३६६
ज्ञात्येन च शिशुभिज्ञो ग्यैने वा पित्रा च असि देहस्यास्य कृते मिथ्या संसारे किं विमुह्यसि मूर्खा चरित

मेतद्धि मन्मातुरुचिरं न हि अन्यसंसारसारं च सारमन्य च मोहिताः प्रपश्यंति यथारात्रौ विद्यातं दी
पवस्थितं यदिदं मन्यसे संसारं श्रृणु तस्याप्यसारतां एवंविधं हि मानुष्यमागर्भादितिकष्टदं अ
स्थिपदं तु लास्तंभे स्नायुबंधेन यंत्रिते रक्तमांसमृदालिप्ते विण्मूत्रद्रव्यभाजने केशरोमतृणच्छ
न्ने सुवर्णलक्ष्मसुधूतके वदनैकमहाद्वार खंडवाक्षविभूषिते तुष्टद्वयकपाटे च तथा दंतार्गला
न्विते नाडीश्वेदप्रवाहे च कालवक्त्रानलस्थिते एवंविधे गृहे गेहो जीवो नाम्नास्ति नोभने गुणत्रय
मयी भार्या प्रकृतिस्तस्य तत्र च बाधाहंकार कामश्च क्रोधलोभादयोपि च अपत्यान्यस्य हा कष्टामयं
मूढ प्रवर्तते तस्य यो याय था मोहः तथा तं श्रृणु तत्वतः श्रोतासि यस्य सततं प्रस्रवंति गिरेरिव क
फमूत्रादिकान्पश्य कृते देहस्य मुह्यति सर्वाशुचि विधानस्य शरीरस्य न विद्यते शुचिरेक प्रदे
शोपि विण्मूत्रस्य दृतेरिव स्पृष्ट्वा स्वं देहश्रोतांसि मृत्तोयेशोध्यते करः तथाप्यशुचिभांडस्य नास्य
रज्यति किं नराः काय सुगंधतोयाद्यैर्यत्नेनापि सुसंस्कृतः न जहाति स्वकं भावं श्वपुच्छमिव नामितं
स्वदेहाशुचिगंधेनान विरज्यति यो नरः विराग कारणं तस्य किमन्य दुपदिश्यते गंधलेपापनोदार्थं शौचं दे

स्कं॰पु॰२ हस्य कीर्तितं दुःखस्यापगमः साध्ये भावशुद्ध्या विशुद्ध्यति गंगातोयेन सर्वेण मृद्भारैः पर्वतोपमैः आमृत्योरा
चरं शौचं भावदुष्टो न शुद्ध्यति तीर्थस्नानैस्तपोभिर्वा दुष्टात्मा नैव शुद्ध्यति श्वदृतिः क्षालितस्तीर्थे किं शुद्धि
३६१ मधि गच्छति अंतर्भावप्रदुष्टस्य विशतोपि हुताशनं न स्वर्गो नापवर्गश्च देहनिर्दहनं परं भावशुद्धिप
रं शौचं प्रमाणं सर्वकर्मसु अन्यथालिंगते कांता भावेन दुहितान्यथा अन्यथैव स्तनं पुत्रश्चिंतयत्यन्यथा
पतिः चित्तं विशोधयेत्तस्मात्किमन्यैर्बाह्यशोधनैः भावतः सविशुद्धात्मा स्वर्गमोक्षं च विंदति ज्ञानामलांभसा
पुंसः सद्वैराग्यमृदा पुनः त्रिविधा रागविण्मूत्रं लेपगंधविशोधनं एवमेतच्छरीरं हि निसर्गादशुचिर्दुः
खमात्रसरं निःसारं कदलीसारसन्निभं ज्ञात्वैवं दोषवद्देहं यः प्राज्ञः शिथिलो भवेत् सनिः क्रमति संसारे
दृढग्राहिस्सतिष्ठति एवमेतन्महाकष्टं जन्मदुःखं प्रकीर्तितं पुंसामज्ञानदोषेण नानाकर्मवशेन च यथा गि
रिवराक्रांतः कश्चिद्दुःखेन तिष्ठति तथा राजयुतो देहि दुःखं तिष्ठति वेष्टितः पतितः सागरे यद्वत् दुःखे
मास्ते समाकुलः गर्भोदकेन सिक्तांगस्तथास्ते व्याकुलः पुमान् लोहकुंभे यथान्यस्तः पच्यते कश्चिदग्निना ३६१
गर्भकुंभे तथा क्षिप्तः पच्यते जठराग्निना सूचीभिरग्निवर्णाभिर्विभिन्नस्य निरंतरं यद्दुःखं जायते तस्य तद्ग

र्भेष्टगुणं भवेत् मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः इत्येतद्गर्भदुःखं हि प्राणिनां परिकीर्तितं चरस्थि
राणां सर्वेषामात्मगर्भानुरूपतः अत्र स्वस्य च सर्वेषां जन्मनां स्मरणं भवेत् नानायोनिसहस्राणि मयादृष्टा
नि जायते अधुना जातमात्रोहं प्राप्तसंस्कार एव च ततश्श्रेयः करिष्यामि येन गर्भे न संभवेत् अध्येष्यामि ह
रेर्ज्ञानं संसारविनिवर्तनं एवं संचिंतयन्नास्ते मोक्षोपायं विचिंतयन् गर्भात्कोटिगुणं दुःखं जायमानस्य
जायते गर्भवासस्मृतिर्यासीत्सा जातस्य प्रणश्यति स्पृष्टमात्रस्य बाह्येन वायुना मूढतां भवेत् संमूढस्य स्मृ
तिभ्रंशः शीघ्रं संजायते पुनः स्मृतिभ्रंशात्ततस्तस्य पूर्वकर्मवशेन च रतिः संजायते तूर्णं जंतोस्तत्रैव जन्मनि
रक्तो मूढश्च लोकोयं अकार्ये संप्रवर्तते तत्रात्मानं न जानाति न परं न च दैवतं न शृणोति परं श्रेयः सति चक्षु
षि नेक्षते समे पथि समैर्गच्छन् स्खलतीव पदे पदे सत्यां बुद्धौ न जानाति बोध्यमानो बुधैरपि संसारे क्लि
श्यते तेन रागमोहवशानुगः गर्भस्मृतेरभावेन शास्त्रमुक्तं महर्षिभिः तद्दुःखकथनार्थाय स्वर्गमोक्षप्रसा
धकं न कुर्वंत्सामनः श्रेयस्तदत्र परमद्भुतं अव्यक्तेंद्रियवृत्तित्वात् बाल्ये दुःखं महत्पुनः इच्छन्नापि न शक्नो
ति वक्तुं कर्तुं च किंचन दंतोत्थानमहद्दुःखं मौलेन व्याधिना तथा बालरोगैश्च विविधैः पीडा बालग्रहैरपि

MEMORIAL

स्कं॰पु॰२ तद्बुभुक्षापरिगतः क्वचित्तिष्ठति रारटन् मूत्रभक्षणाद्यं च मोहाद्बालः समाचरेत् कौमारे कर्ण
वेधेन मातापित्रोर्वि ताडने अक्षराध्ययनाद्यैश्च दुःखं स्याद्गुरुशासनात् प्रमत्तेन्द्रियवृत्तेश्च काम
३६९ रागप्रपीडनात् रोगाभूतस्य सततं कुतः सौख्यं हि यौवने ईर्ष्यया सुमहद्दुःखं मोहाद्रक्तस्य जायते
मत्तस्याकुपितस्यैव रागो दोषाय केवलं न रात्रौ विन्दति निद्रां कामाग्निपरिपीडितः दिवापि हि कु
तः सौख्यमर्थोपार्जनचिंतया नारीषु लब्धभूतासु सर्वदोषाश्रयासु च विण्मूत्रोत्सर्गसदृशं सौ
ख्यं मैथुनजं स्मृतं सन्मानमपमानेन वियोगेनेष्टसंगमः यौवनं जरयाग्रस्तं क्व सौख्यमनुपद्रवं
वलीपलीतकालेन शिथिलीकृतविग्रहः सर्वक्रियास्वशक्तस्य जरया जर्जरीकृतः स्त्रीपुंसयोर्यौ
वनं रूपं यदन्योन्यं प्रियं पुरा तदेवं जरया ग्रस्तमुभयोरपि न प्रियं जरातिभूतः पुरुषः पत्नीपुत्रा
दिबांधवैः अशक्तत्वाद्दुराचारैर्भृत्यैश्च परिभूयते धर्ममर्थं च कामं च मोक्षं च न तु रोगतः शक्तः
साधयितुं तस्मात्कृत्वा धर्मं समाचरेत् वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते वातादीनां सम ३६९
हश्च देहायं परिकीर्तितः तस्माद्व्याधिमयं ज्ञेयं शरीरमिदमात्मनः रोगैर्नानाविधैर्याति देहे दुःखा

न्यनेकशः तानि नः स्यात्समवद्यानि किमन्यकथाम्यहं एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठि
तं तत्रैकः कालसंयुक्तः शेषाः स्युरागंतवः स्मृताः ये त्विहागंतवः प्रोक्तास्ते प्रशाम्यंति भेषजैः ज
पहोमप्रदानैश्च कालमृत्युर्न शाम्यति विविधा व्याधयः शस्त्रा सर्पाद्याः प्राणिनस्तथा विषाणि
चाभिचाराश्च मृत्योर्द्वाराणि देहिनां पीडितं सर्पनौषधं न तपो मंत्रा न मित्राणि न बांधवाः शक्नुवं
ति परित्रातुं नरं कालेन पीडितं रसायनतपोजप्यैर्योगसिद्धैर्महात्मभिः कालमृत्युपरित्रोज्झैर्नैय
तेनापि संयुते नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयं नास्ति मृत्युसमस्त्रासः सर्वेषामपि देहि
नां सद्भार्या पुत्रमित्राणि राज्यैश्वर्यसुखानि च आबद्धानि स्नेहपाशैर्मृत्युः सर्वाणि कृंतति किं न प
श्यसि मातस्त्वं सहस्रस्यापि मध्यतः जनाः शतायुषः पंच भवंति न भवंति वा अशीतिका विपद्यंते
केचित्सप्ततिका नराः परमायुः स्थिता षष्टिः स्तद्यदृप्यस्ति न तिष्ठति तस्य यावद्भवेदायुर्देहिनः पूर्व
कर्मभिः तस्यार्धमायुषो रात्रिर्हरते मृत्युरूपिणी बालभावेन मोहेन वार्धके जरया तथा वर्षाणां विं
शतिर्याति धर्मकामार्थवर्जितं आगंतुकैर्भयैः पुंसां व्याधिशोकैरनेकधः हीयते यद्धि तत्रापि यच्छेषं

स्कं॰पु॰२ तद्धि जीवितं जीवितांते च मरणं महाघोरमहद्याप्नुयात् जायते योनिकोटिषु मृतः कर्मवशात्पुनः देहभेदे
नयः पुंसां वियोगः कर्मसंख्यया मरणं तद्धि निर्दिष्टं नानात्वाः परमार्थतः महातमः प्रविष्टस्य छिद्यमानेषु
३६९ मर्मसु यद्दुःखं मरणे जंतोर्न तस्योपमा क्वचित् हा तात मातर्हा कांतेत्येवं क्रंदत्येवं सुदुःखितः मंडूक इव स
र्पेण गीर्यते मृत्युना जनः बांधवैः संपरित्यक्तः प्रियैश्च परिवारितः निःश्वसन्दीर्घमुष्णं च मुखेन परिशुष्यता
ता चतुरंतेषु खट्वायाः परिवर्तन्मुहुर्मुहुः संमूढः क्षिपते सर्वं हस्तपादावितस्ततः खट्वातो वांछते भूमिं भूमेः
खट्वां पुनर्महीं विवस्त्रो मुक्तलज्जश्च मूत्रविष्ठानुलेपतः याचमानश्च सलिलं शुष्ककंठोष्ठतालुकः चिंत
यानः स्ववित्तानि कस्यैतानि मृते मयि पंचावटान्वनमानः कालपाशेन कर्षितः म्रियते पश्यतामेवं गले घु
र्घुरारवकृत् जीवस्तृणजलूकेव देहाद्देहं विशेत्क्रमात् संप्राप्योत्तरमंशेन देहं सज्जितपूर्वकं मरणास्प्रा
र्थनाद्दुःखमधिकं हि विवेकिनः क्षणेकं मारणे दुःखमनंतं प्रार्थनाकृतं ज्ञातं मयेतदधुना मृते भवति यद्दु
ऋः न परं प्रार्थयते भयस्तल्लाघवकारणं आदौ दुःखं तथा मध्येऽप्यंते दुःखं च कारणं निसर्गात्सर्वभूता ३६९
नामिति दुःखपरंपरा क्षुधा च सर्वरोगाणां व्याधिश्रेष्ठतमः स्मृतः स चान्नौषधिलेपेन क्षणमात्रं प्रशाम्यति

क्षुद्व्याधिवेदना तीव्रा निःशेषबलकृंतनी तयाभिभूता म्रियंते यथान्यैर्व्याधिभिर्नरः राज्ञोभिमानमात्रं हि
ममैव वाद्यं तद्गृहे सर्वमाभरणं भारं सर्वमालेपनं मलं सर्वं प्रलापितं गीतं नृत्यमुन्मत्तचेष्टितं इत्येवं राज
संभोगैः कुतः सौख्यं विचारतः नृपाणां व्यग्रचित्तानामन्योन्यं विजिगीषया प्रायेण श्रीमदोल्लेपान्नहुषा
द्या महानृपाः स्वर्गं प्राप्यापि पतिताः कः श्रियाविंदते सुखं उपर्युपरि देवानामन्योन्यातिशयस्थितं नरैः पु
ण्यफलं स्वर्गे मूलच्छेदेन भुज्यते न चान्यत् क्रियते कर्म सोऽत्र दोषः सुदारुणः छिन्नमूलतरुर्यद्वद्विवशः पत
ते क्षितौ पुण्यमूलक्षये तद्वत्पतंति गां पतंति दिवौकसः इति स्वर्गेऽपि देवानां नास्ति सौख्यं विचारतः तथा
नारकिणां दुःखं प्रसिद्धं किं च वर्ण्यते स्थावरेष्वपि दुःखानि दावाग्निहिमशोषणं कुठारैश्छेदनं तीव्रं वल्कलानां
च तक्षणं पर्णशाखाफलानां च पातनं चंडवायुना अपमर्दश्च सततं गजवन्यैश्च देहिभिः तद्वद्बुभुक्षा च स
र्पाणां क्रोधो दुःखं च दारुणं दुष्टानां घातनं लोकपाशेन च निबंधनं एवं सरीसृपाणां च दुःखं मातुर्मुहुर्मुहुः
अकस्माज्जन्ममरणं कीटादीनां तथाविधं वर्षशीतातपैर्दुःखं सुकष्टं मृगपक्षिणां क्षुत्तृड्दुःखेन महता
संत्रस्ताश्च सदा मृगाः पशूनां गजनिकायानां शृणु दुःखानि यानि च क्षुत्तृट्शीतादिदमनं बधबाधनताडनं

स्कं॰पु॰२ नासाप्रबंधनं तामसः प्रतोदांकुशताडनं [illegible] वेणुकुंतादिनिर्गउंमुद्गरोशताडनं भा
रोद्वहनसंक्लेशं क्षिक्षायुक्षादिपीडनं आत्मपुत्रवियोगश्च वानानयनमादिच दुर्भिक्षं दुर्भगत्वं च
३७० मूर्खत्वं च दरिद्रता अधरोत्तरभावश्च मरणं राष्ट्रविभ्रमः अन्योन्याभिभवाद्दुःखं येस्माद्व्याप्तं चराच
रं निरयादिमनुष्यांतं तस्मात्सर्वं सजोद्भुधः स्कंदास्कंदं नयनभारं विश्राममन्यतेन्यथा तद्धत्सर्व
मिदं लोके दुःखं दुःखेन त्राम्यति एवमेतज्जगत्सर्वमन्योन्यातिशयस्थितं दुःखेनाकुलितं ज्ञात्वा
निर्वेदपरमाप्नुयात निर्वेदाच्च विरागः स्याद्विरागाज्ज्ञानसंभवः ज्ञानेनतं परं ज्ञात्वा निर्वेदं परमा
प्नुयात नाहेमताहृशे लोके रमयं जननिक्कचित राजहंसोयथाशुद्धः काकोमध्ये प्रदंतीके शृणु
मातर्यत्र संस्कारमेयं निरुपद्रवः अविद्यायनमत्युग्रं नानाकर्मातिदारिखनो संकल्पदंशमशकं शो
कहर्षहिमातपं मोहांधकारतिमिरं लोभव्यालसरीसृपं विषयानन्यथाध्यायं कामक्रोधविमाक्षि
तं तदतीत्य महादुर्गं प्रविष्टोस्मिमहद्वनं न तत्प्रविश्य शोचति न प्रहृष्यति तद्विदः न च बिभ्यति ३७०
केषांचित् नास्माबिभ्यति केचन तस्मिन्वने सप्त महाद्रुमास्तु सप्ततीर्थं यश्च फलानि सप्त सप्ताश्रमाः

सप्तसमाधयश्च दीक्षाश्च सप्तैतदरण्यरूपं पंचवर्णानि दिव्यानि चतुर्वर्णानि कानिचित त्रि
द्विवैकश्च वर्णानि पुष्पाणि च फलानि च स्रजंतः पादपात त्रव्याप्यतिष्ठंति तद्वनं सप्तस्त्रियस्तत्र
वसंति सत्सस्त्रा वाङ्मुखा भानुमंतो भवंति उर्ध्वं स्त्रानां ददते प्रजाभ्यः सर्वाश्च तास्तत्वतः कोपि
वेद सप्तैव गिरयश्चात्र धृतं यैर्भुवनत्रयं नद्यश्च सरितः सप्त ब्रह्मचारीवहा सदा तेजश्चाभय
दानत्वमद्रोहः केशलं तथा अचापल्यमथा क्रोधः प्रियवादश्च सप्तमः इत्येते गिरयो ज्ञेया तस्मिन्नि
द्यावने स्थितः दृढनिश्चतथा भासा समता निग्रहं गुणाः निर्ममत्वं न पश्चात्र संतोषः सप्तमो हृदः
भगवद्गुणविज्ञानात् भक्तिस्यात्प्रथमा नदि पुष्पादिपूजा विद्वितीया तस्मिन्विद्यावने स्थिताः अ
चापल्यमथा क्रोधः प्रियवादश्च सप्तमः इत्येते गिरयो ज्ञेया तृतीया त्वप्रदक्षिणा चतुर्थी स्तुतिवाक्प्र
जा पंचमीश्वरार्पणाः षष्ठी ब्रह्मैकताप्रोक्ता सप्तमी सिनाभियुक्तः प्रणवादिकादकं द्विरेव च सप्त
नद्यात्र कथिता ब्रह्मणा परमर्षिता ईश्वरार्पणः पंचनदी षष्ठी ब्रह्मैकतामपि सिद्धिश्च सप्तमं प्रोक्ता
सप्तनद्यात्र संख्यया ब्रह्माधर्मो यमश्चाग्निरिंद्रो वरुण एव च धनदश्च ध्रुवादीनां सप्तका र्चनयसमी

स्कं॰पु॰२ नदीनां संगमस्तत्र वैकुंठसमुपव्हरे आश्रमस्तायतो यांति यांतीह तापरात्परं केचिन्हमाख्रियां केचित गि
रिन्केचित सदापरे सरितः केचिदाकुसुमसंप्रेक्षज्ञानविश्रमाः अंपत्र च तेकामात्र ब्रह्मचर्यं चराभिच ब्रह्मचस
१०३ मिधस्तत्र ब्रह्माग्निब्रसस्तरः अपो ब्रह्म गुरु ब्रह्म ब्रह्मचर्यमिदं मम एतदेवेदमंसस्मे ब्रह्मचर्यं विदुर्बु
धाः गुरुं च शरणं मम मातः यो मे विद्याप्रदो भवत् एकः शास्ता न द्वितीयोस्ति शास्तव्हद्येव तिष्ठन् पुरुषः शा
स्ति शास्ता तेनाभियुक्तः प्रणवादिवादकं यथा नियुक्तो तथा चरामि एको गुरुर्नास्ति तथा द्वितीयो हृदि स्थि
तस्तमहमनुब्रवीमि पंचावमान्येव गुरुं मुकुंदं परामृतादानवासवंएव एकोवधं नास्ति ततो द्वितीयो हृदि
स्थितस्तमहमनुब्रवीमि तेनानुशिक्षाबोधयाबंधमंतः सप्तर्षयः सप्तदिविप्रभाति ब्रह्मचर्यचसंस्रावं गार्ह
स्थ्यं पुण्यादृत्यां पत्नीप्रकृतिरूपामितश्चिंता नास्ति कर्हिचित् मवि तासां सदा मात्तर्मे मे सर्वार्थसाधनी घ्रा
णं जिव्हा च चक्षुश्च त्वक् श्रोत्रं चैव पंचमं मनो बुद्धिश्च सप्तैते दीप्यते पावकाः मम गंधो रसश्च रूपं च यश्च स्पर्शं
च पंचमं मंतव्यमथ बोद्धव्यं सप्तैताः समिधो मम हुता नारायणाख्याना भुंक्ते नारायणः स्वयं एवं विधेन य १०३
ज्ञेन यज्ञाम्यस्मि तमीश्वरं अकामयानस्य सर्वकामान्मे वद्विषणस्य च सर्वदा पान् न मे स्वभावेषु भवं लिलिप्ता

त्मा यस्याविंदारिवपुष्करेषु नित्यस्य मे नैव भवंति नित्या निरीक्ष्यमाणस्य बहुस्वभावात् न संजते कर्मसु भोग
जालं दीविसर्यस्य मयूषजालं एवं विधेन पुत्रेण मा मातर्दुःखिणी भव लप्स्यसे त्वां च नेष्यामि नय कृतु गतेरपि
इति पुत्रवचः श्रुत्वा विस्मिता इव राभवत् चिंतयामास यद्येव विद्यानामसुतो ह्ययं लोके पुरख्यातिमायांति ततो
मस्याध्यरुः परं इत्यादि चिंतयन् यांतां रजन्यां भगवान्हरिः प्रहृष्टस्तस्य तेजो वीर्ये विस्मितः प्रादुरासच मूर्तिः
स्वयं चिनिक्राम्य ग्रांस्य च कदाधरः जगदुद्भासयन्भासा सूर्यकोटिसमप्रभः ततो निष्पलधरणी हृष्टरोमाश्रु
गद्गदः मूर्ध्नि बध्वांजलिं धीमान्नेतरे याथतुष्टवे नमस्तुभ्यं भगवते वासुदेवाय धीमहि प्रद्युम्नायानिरु
द्धाय नमः संकर्षणाय च नमो विज्ञानमात्राय परमानंदमूर्तये आत्मारामाय शांताय निवृत्तद्वैतदृष्टये आ
त्मानंदानुभूत्यैव सम्यक् सक्तोर्मये नमः ऋषिकेशाय महते नमस्तेनंतशक्तये वचस्युपरते प्राप्य य एको
मनसा सह अनामरूपचिन्मात्रः सोव्यान्नः सदसत्परः यस्मिन्निदं तत्पश्चिरं तिष्ठत्यपेति जायते म.संयपृथिव
मज्ज्ञाति तस्मै ते ब्रह्मणे नमः यन्न स्पृशंति न विदुर्मनोबुद्धींद्रियासवः अंतर्बहिश्च विततं व्योमवत्प्रणतोस्म्य
हं देहेंद्रियप्राणमनोधियामीयदंशाबद्धाः प्रचरंति कर्मसु नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु न तद् दृष्टपादशा

स्कं॰पु॰२ एते चतुर्भिश्चत्रिभिर्द्वाभ्यामेकधाप्रणमामि तां पूर्वापरापरं युगेशास्तारमीश्वरं हित्वागतो मोक्ष
कामायं भजंति दृश्यात्मकं तपरं सत्यमबलं त्वां वयं पर्युपास्महे ॐ नमो भगवते महापुरुषाय म
३७२ हानुभावाय विभूतये सकलसात्वतपरिवृढनिकरकरकमलकमलोत्पलकुड्मलोपलालि
तचरणारविंदयुगलपरमपरमेष्ठिन्नमस्ते तवाग्निरास्यं वसुधारयुग्मं नभःशिरश्चंद्ररवी च ने
त्रे समस्तलोका जठरं भुजाश्च दिशश्चतस्रो भगवन्नमस्ते जन्मानि तावंति न संति देव निष्पीज्य
सर्वाणि च सर्वकालं भूतानि यावंति मयात भीमे पितानि संसार महासमुद्रे संपष्ठितानां हि म
वश्महेंद्र केलासमवादिषु नैव तावत् देहानेकाननुगृह्णता मे प्राप्तास्ति संपन्महतीय थश्री
नसंति ते देव भुवि प्रदेशा न मेषु जातोऽस्मि तथाविनष्ट अन्नमयायेषु न जंतवश्च संभक्षिता वान
चमनतसंघैः शोकाभिभूतस्य ममाश्रु देव यावत्प्रमाणं पतितं भवेषु तावत्प्रमाणं न जलं पयोदाम्बु
वंति दिव्यैरपि वर्षलक्षैः मन्ये धरित्रीपरमाणुसंख्यामुपैति पित्रोर्गणनानमस्य मित्राण्यमित्रा ३७२
ण्यनुजीवबंधूनसंख्यानुमीशाश्मिन देवदेव त्वयसतिंनाथ पुनः पुनर्मे सनः समाक्षिप्य सुदुर्धराणि

कामावशंक्रोधमुखैः सहायैः करोति किं तद्भगवन्करोमि सोहं भयार्तः करुणाकरस्त्वं संसारगर्ते पति
तस्य विष्णो महात्मना संश्रयमभ्युपेतो नेयावसीदत्सति दुर्गतोपि परायणं रोगवतां हि वैद्यो महाब्धि
मानस्य च नौर्वरस्य बालस्य मातापितरौ सुघोर संसारखिन्नस्य हरे त्वमेव प्रसीद सर्वेश्च सर्व भू
त सर्वस्य हेतोः परमार्थसार मामुद्धरास्माद्दुरदुःखसंघात्संसारगर्तात्स्वपरिग्रहेण क्षुत्तृट्क्षुधा
नुभिरिमं मुकुंद दंदह्यमानं शीतोष्णवातसलिलैरितरेतराश्च कामाग्निनाच्युतरुषा च सुदुर्भरेण संप
श्यन्क्रमउरुक्रम दंतोऽहि भवंतु भद्राणि समस्तदोषाः प्रयांतु नाशं जगतोऽखिलस्य मयाद्य भक्त्या प
रमेश्वरप्रभो स्तुते जगद्धातरि वासुदेवे अज्ञानिनो ज्ञानविदो भवंतु प्रशांतिभाजः मततेऽन्विचित्ताः कु
र्वंतु भक्तिं परमामनंते स्तुते जगद्धातरि वासुदेवे ये भूतले ये दिवि चांतरिक्षे रसातले प्राणिगणाश्च
केचित् भवंतु ते सिद्धियुजो मयाद्य स्तुते जगद्धातरि वासुदेवे शृण्वंति ये मे स्तुवतस्तथान्ये पश्यंति
ये मामिदमीरयंतं देवासुराद्यामनुजास्तिरश्चा भवंतु ते प्यच्युत योगभाजः ये चापि मूकाविकलेंद्रि
यत्वात् शृण्वंति नो नैव विलोकयंति पश्वादयः कीटपिपीलिकाद्या भवंतु ते प्यच्युतयोगभाजः नश्यंतु

स्कं॰पु॰२ दुःखानि जगत्येते तु लोभादिको दोषगणः प्रजाप्यः यथात्मनि श्चातरि वात्मजे वा तथा नरस्यास्तु जनेपि भावः
संसारवैचित्र्यविदोषहानिविचक्षणे निर्वृत्तिहेतुभूते संसारबंधाः शिथिला भवंतु हृदिस्थितसर्वजनस्य विष्णो
३७३ पापं त्रणाशं मम च प्रयातु यन्मानसे यच्च करोमि वाचा शारीरमप्याचरितं च यन्मे स्मृते जगन्धातरि वासुदे
व यथा हि वा वासुदेवेति प्रोक्ते संकीर्तने विष्णुभक्तस्य वापि स्मृते हरौ चापि प्रयाति पापं सत्येन तेनेन मनश्यतु
तेन पापं मूढोयमल्पमतिरल्पविचिष्टितोयं क्लिष्टं मनोपि विषयैर्मयि न प्रसंगि इत्थं स्वरूपां कुरु मयि प्रणत
खिन्नतास्ता स्तोतुं मंबुजभुवोपि हि देव नम्राः सत्वं प्रसीद भगवन् कुरु मय्यनाथे विष्णो कृपां परमकारुणि
क कलुषं संसारसागरनिमग्नमनंतदीनमुद्धर्तुमर्हसि हरे पुरुषोत्तमोसि इत्थं स्तुतः स भगवानैतरेयेण मा
रत वासुदेवो विलोक्योत्मा सानंदमिदमाह तं वत्सैतरेय तुष्टोस्मि भक्त्यानेन स्तवेन ते वरं वृणु महाभक्ता
दुर्लभं यदभीप्सितं एतरेयउ॰ एष एव वरो नाथ मम नित्यमभीप्सितः मज्जतां घोरसंसारे कर्णधारो हरे
भव श्रीभगवानुवाच मुक्त एवासि संसाराद्यस्येत भक्तिरीदृशी यहे महायज्ञे विस्तोनेवतां द्विजयोदृशी ३७३
यश्च स्तोत्रेण सततं गुप्तक्षेत्रसमीहितं स्तोष्यते वासुदेवं मां स्वपापक्षयमीप्सितं यस्मादेतेन स्तोत्रेण पापं

MEMORIAL

नाशमवाप्स्यसि अयनाशनमिंस्यव तस्मात्ख्यातिमवाप्स्यति एकादश्यामुपोष्यैव ममाग्रे यः पठिस्यति स्तव
मेनं स पूतात्मा मम लोकमवाप्स्यति सर्वेषामेव क्षेत्राणां गुप्तक्षेत्रं प्रियं यथा तथा सर्वस्तवानां च स्तवेषसु प्रि
यो मम त्वं च वत्स श्रौतधर्मा सम्यगाचारश्रद्धया नैते बंधमयि न्यस्तैराप्तस्यनभिसंधितैः यज्ञयज्वैरवाप्येव
दारानंदय मातरं मयि ध्यानेन तीव्रेण मामेवाप्स्यस्यसंशयं बुद्धिर्मनोथ भूतानि बुद्धिकर्मेंद्रियाणि च
स्पर्शो रसो रूपगंधौ वचनादानमेव च विहृत्युत्सर्ग आनंदस्त्रयोदशमहाग्रहाः एतान्महाग्रहांस्तत्र शुद्धा
न शुद्धे स्वे केर्यहेः गृहाण ध्यानयोगेन मामेव मोक्षमाप्स्यसि एवं त्वं कर्मभिर्वीरि नैःकर्म्यसमवाप्स्यसि ता
म्रं रसेन संविद्धं दक्षाहेमं यथा श्रुतं वर्णाश्रमाचारवता मयि सन्यस्तकर्मणा मदनुध्यानयुक्तेन मोक्षो
नास्ति हदुर्लभः तस्मादेवं वर्तमानो नंदव्रतपरायणः उद्धृत्य सप्तपुरुषान् युयं मयि गमिष्यति सांप्रतं प्रति
भास्यंति वेदाश्चापि वितापिने ततस्त्वं कोटितीर्थे च यज्ञैर्वै हरिमेधसः या हि तत्र भविष्यंते सर्वमातुरभीप्सि
तं इत्युक्त्वा भगवान्विष्णुर्मूर्तेर्मध्ये विवेश ह विलोक्यमानो निमिषं मात्रा चैव सुतेन च ततो मूर्तिं नमस्कृत्य
वासुदेवस्य विस्मितः एतरेयः स्वजननीमुदितो वाक्यमब्रवीत् पुराहमभवं शूद्रो भीतः संसारदोषतः

स्कं.पु.२ परिनिष्ठागतं धर्मं ब्राह्मणं शरणं गतः सकृपालुर्मम प्राह मंत्रं वै द्वादशाक्षरं स दैवं जपचैतस्मा
त्तमहं जप्तवांस्तदा तेन जाप्यप्रभावेन ममाप्यतिस्तवोदरात् जातस्मृतिर्विष्णुभक्तिः स्थिति
१७४ रत्र च सर्वदा इदानीं च प्रयाम्येष यज्ञं तं हरिमेधसः तद्रूपं विष्णुप्रात्यर्थं प्रणम्य त्वां प्रसादये
ततो महिनगराख्यकोटितीर्थतलस्थितं यज्ञं तं सहितं विप्रैः कोटिशस्तमुपागमत् गेहायमा
तरं प्रोक्त्वा स यज्ञे प्रोक्तवान् द्विजः नमस्तस्मै भगवते विष्णवे कुण्ठवेधसे यन्मायामोहितधियो भ्र
माम कर्मसागरे इति श्लोकं महार्थं ते हरिमेधसुखा द्विजाः आकर्ण्य स नप्तृ जांघैः पूजयामासु
रंगतः ततो वेदार्थनैपुण्येस्तेन ते तोषिता द्विजाः प्रददुर्दक्षिणां सर्वे हरिमेधाः सुतामपि द्रव्यं क
न्यां च संगृह्य स्वगृहं समुपागमत् इष्ट्वा यज्ञेरनेरयो द्वादशीव्रततत्परः वासुदेवानुध्यायेनमो
क्षं पश्चादुपागतः एवं विधो वासुदेवः स्वयमात्रास्ति भारते योर्चयेत्पूजयेत्तोति सर्वे तस्याक्ष
यं विदुः शिवधर्मेषु यः प्रोक्तं फलं सर्वं मया तव तादृशं लभते मर्त्यो वासुदेवप्रसादतः इति श्री १७४
स्कंदपुराणे कुमारिकाखंडे श्रीवत्सवासुदेवमाहात्म्ये द्विचत्वारिंशोऽध्यायः श्रीनारद उ॰

ततोहं पार्थ भूयोपि जनानुग्रहकाम्यया प्रत्यक्षं देवं मार्तंडमानयितुमैच्छथ सर्वेषां प्राणिनां
यस्मात्तु उद्धृतो भगवान् रविः इहामुत्र च कौंतेय विश्वो धारी रविर्मतः यस्मरंति रविं भक्त्या कीर्तयंति
च ये नराः प्रपूजयंति ये नित्यं कृतार्थास्ते न संशयः सूर्यभक्तिपरा ये च नित्यं तत्कृदमानसः ये स्मरं
ति सदा सूर्यं न ते दुःखस्य भाजिनः भवनानि मनोज्ञानि विविधाभरणाः स्त्रियः धनं चाष्टपर्यं
तं सूर्यपूजाविधेः फलं दुर्लभा भक्तिः सूर्ये वा दुर्लभं तस्य चार्चनं दानं च दुर्लभं तस्मै ततो होमश्च दु
र्लभः नमस्कारादि संयुक्तं रविरित्यक्षरद्वयं जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितं इत्यहं हृदि
संचिंत्य महात्म्यं रविजं महत् पूर्णवर्षशतं पार्थ रविभक्त्या ह्यतोषयं जपेन सुविशुद्धेन छंदसां वा
युभोजनः ततस्त्वाहुतीयं भर्ति कृत्वा योगबलाद्विभुः तेजसा दुर्दर्शो भास्वान् प्रत्यक्षः समजायत
तमहं प्रांजलिर्भूत्वा नमस्कृत्य रविं प्रभुं सामभिर्विविधैर्देवं पर्यतोषयमीश्वरं तुष्टो मम्माह वरदो
देवर्षे सुचिरं त्वया तपसाराधितोस्मीति वरं वृणु यथेप्सितं इत्युक्तोहं लोकनाथं प्रांजलिः प्रास्तु
वं वचः यदि तुष्टो भवान् मह्यं यदि देयो वरो मम ततस्ते कामरूपेण कालानाथ प्रवर्तते राजवर्ध

स्कं॰पु॰२ नराज्ञाया राधिताय जनैः पुराः तथा च कृतयामोनो सदात्र स्थातुमर्हसि ततस्तथेति देवेन प्रोक्ते तु द्विजनामा
रत अस्थापयमहं सूर्यं मद्गादित्याभिधानकं पट्टनस्थापितं यस्मात मयात स्माद्द्विजगो ततः संपूज्य
३७५ तं पुष्पैः कृतावैरामहं रवि भक्त्योद्रेकात्कृतां गोप्य स्तुतिमेतामथावरं सर्वदेवस्य सूर्यस्य श्च नाम भिश्च शताष्ट
भिः सप्तसप्तिरचिंत्यात्मा महाकारुणिकोत्तमः संजीवनो जीवो जीवनाथो जगत्पतिः कालाश्रयः काल
कर्ता महायोगी महामतिः भूतांतकरणो देवः कमलानंदनंदनः सहस्रपाद्वरदो दिव्यकुंडलमंडितः
धर्मध्येयो चितात्मा च सविता वायुवाहनः आदित्यः क्रोधनः सूर्यो रश्मिमाली विभावसुः दिनकृद्दिनहृन्मो
नी सुरथी रथिनां वरः राशीपतिस्वर्गपिताः पूषा त्वष्टा दिवाकरः आकाशतिलको धाता संविभागी मनोहरः
प्राज्ञः प्रजापतिर्धन्यो विष्णुः श्रीशोभिषग्वरः आलोककृल्लोकनाथो लोकपालनमस्कृतः दिनाज्ञानश्च सुनयो
महात्मा भक्तवत्सलः कीर्तिः कीर्तिकरो नित्यो रोचिष्णुः कल्मषापहः जितानंदो महावीर्यो हंसः संहारकारकः ३७५
कृतकृत्यः सुसंगश्च बहुज्ञो वचसांपतिः विश्वपूज्यो मृत्युहारी घृणी धर्मस्य कारणं प्रणतार्तिहरो रोगः आ
युष्मान् सुखदः सुखी मंडलं पुंडरीकाक्षो व्रती व्रतफलप्रदः शुचिः पूर्णो मोक्षमार्गदाता भोक्ता महेश्वरः धन्वं

तरीः प्रियाभार्यो धनुर्वेदविद्रिकानन जगत्प्रीतो धूमकेतुर्विद्योतो ध्वांतहा गुरुः गोपतिश्च कृतातिथ्यः शुभाचा
रः शुचिप्रियः सामप्रियो लोकबंधुर्नैकरूपो युगादिकृत धर्मसेतुर्लोकसाक्षी खेटकः सर्वदाशुभः इत्येवं सं
स्तुवाचीतो भास्करो मामवोचत सदात्र सकलात्स्वैर्देवर्षिभिर्विशेषतः यो मम मात्र महाभक्त्या मदादित्यं
प्रपूजयेत सहस्रवारैः कामरूपस्य पूज्यः प्राप्नोति तत्फलं मामुद्दिश्य च यो विप्रस्तत्स्येवायदि नाबकुः शस्यते
त्राक्षयं तच्च ग्रहीष्यकरजयथा रक्तोत्पलैश्च कल्हारैः करवीरैः कणवीरकैः शतपत्रैर्महापद्मै रविं वीरणमा
नवः सप्तम्यामथ षष्ठ्यां वा येर्चयिष्यंति मामिह यान्यान्प्रार्थयते कामांस्तांस्तान्प्राप्स्यति निश्चितं दर्श
नात्मम भक्त्या च नाशो व्याधिदारिद्र्ययोः प्रणामात्स्वर्गमाप्नोति श्रुलोमाशं च निश्चयः अभिक्तिं यश्च कर्ता
मे सम्यङ्निश्चितं क्षयं अष्टोत्तरशतं नाम मम मांग्य यत्लेयाहितं त्रिकालमेककालं वा पठतः शृण्वतः फलं की
र्तिमान्सुभगो विद्वान् सुसुखी प्रियदर्शनः भवेद्वर्षशतायुश्च सर्वरोगविवर्जितः यस्त्विदं शृणुयान्नित्यं प
ठेद्वा प्रयतः शुचिः अक्षयं स्वल्पमप्यन्नं भवेत्तस्यापि साधितं निजयी च भवेन्नित्यं तथा जातिस्मरो भवेत त
स्मादेतत्सदा जाप्यं परं स्वस्त्ययनं महत तथा मम मांग्य कुंडं च कुरु स्नानार्थमुत्तमं कामरूपा पलायत्र तत्र कं

स्कं॰पु॰ ड्वनेभवेत् एवं दत्वा वरान्मातुस्तत्रैवांतरधीयत बालो भास्करवाक्येन सिद्धेनास्य च सख्यतः
वनमध्ये च या कुंडं कृतं दर्भशिलाकया कामरूपभवं कुंडं वक्षास्ते चापि भारत सलिला स्तत्र मह
१७६ श्चर्यममाज्ञायते चतसि माघमासस्य शुक्लायां सप्तम्यां स्त्रीनरोपि वा स्नानं शुभे कुंडे कृत्वा महा
दित्यं स पश्यति तस्यानंतं भवेत्पुण्यं रथं यश्च प्रपूजयेत् रथयात्रां च कुरुते यस्मिन्यस्मिन्स सो
पथि यं च पश्यंति लोकास्ते धन्याः सर्वे न संशयः पुत्रधान्यधनैर्युक्ता निरुजस्तेजसान्विताः भ
विष्यंति नरास्ते या कारयंति रथोत्सवं गंगादि सर्वतीर्थेषु यत्फलं कीर्तितं बुधैः महादित्यस्य कुंडे
च तत्फलं सप्तमीदिने तत्र कुंडे च यः स्नात्वा सूर्यायार्घं प्रयच्छति कपिलागोशतस्यासौ दत्तस्य
फलमश्नुते अर्जुन उवाच वासुदेवादयः सर्वे वदंत्येवं महामुने भास्करार्घं विना प्रातः कृतं वै सर्व
निःफलं तस्याहं श्रोतुमिच्छामि विधिं विधिविदां वरः श्रीनारद उवाच यथा भक्त्यादयो देवा यच्छं
त्यर्घं महामुने भास्कराय शृणुष्व तं विधिं सर्वाघनाशनं प्रथमं तावत्सुप्रे उदिते सूर्ये शुचिर्भूत्वा १७६
गोमयकृतमंडलस्योपरि रक्तचंदनेन मंडलं कृत्वा ततस्ताम्रपात्रे रक्तचंदनोदकं श्वेतचंदना

तिद्रव्यैः प्रपूरणं कृत्वा तन्मध्ये हेमाक्षत दूर्वा दधि सर्षपान्परिक्षिप्य परिजप्य स्थापयेत् स्वशिर
मालभेत अनेन मंत्रेण ॐ खखोल्काय नमः सप्तवारानुच्चार्य स्नातव्यं तेन शुचिरूपस्तु जायते दे
हस्याचाहिताम्भवति पश्चादानम्य देवं सवितारं मंडलमध्ये द्वादशात्मकं सुरादिभिः संपूज्यमानं ध्यात्वा
पूर्वोक्तमर्घ्यपात्रं शिरसि कृत्वा भूमौ जानुनी निपात्य सूर्याभिमुखस्तन्मनाभूत्वा अर्घमंत्रमुदाहरे
त् तदुच्यते सूर्यवक्त्राद्विनिर्गतमिति यस्योच्चारणमात्रेण नरः संस्थाप्य भास्करः प्रतिगृह्णाति चैवार्घं
वरमिष्टं प्रयच्छति ॐ यस्याकृसप्तच्छंदांसि रथे तिष्ठंति वाजिनः अरुणः सारथिर्यस्य रथवाहोग्रतः
स्थितः जया च विजया चैव जयंती पापनाशनी दंडाश्च पिंगलाश्चैव वहंताश्च मुखस्तथा डिंडिश्च क्रौ
पनागश्च गणाध्यक्षस्तथैव च स्कंदरेवंतताक्ष्र्यश्च तथा कल्माषपक्षिणौ राज्ञी च सुप्रभा निक्षुभा देवी
कुलतां चैव संज्ञिता तथा यज्ञभुजो देवा ये चान्ये परिकीर्तिताः एभिः परिवृतो यासौ वधरोत्तरवासि
भिः तमहं लोककर्तारमावाहयामि तमोपहं ॐ मयो भगवान्भानुरमुपस्तूपवर्तय इदमर्घ्यं च पाद्यं
च प्रगृहाण नमो नमः आवाहनं सहस्रकिरणावरद जीवनरूपत्वां नमः इति सांनिध्यकारणं

स्कं॰पु॰ ॐ वषट् इत्युच्चार्य सूर्यस्य चरणायुगलं पश्यन् भुवि पद्म्यापात्रीं निवादयेत् पाद्यं तदुच्यते एवं पाद्यं दत्वाब
द्धांजलिः सुस्वागतमिति कुर्यात् स्वागतं भगवन्नीह मम प्रासादं विधाय आस्यतां इहगृहाण पूजां च प्रसा
३७७ दं चाविपाकुरु तिष्ठ त्वं तावदत्रैव यावत्पूजां करोम्यहं एवं विज्ञापनं दद्यादनेन मंत्रेण कमलासनं ॐ सो
मम्रार्तिक्षीरादिपतये नमः इतिक्षीरादिस्नानं ॐ भास्कराय निरवसेवनमः इति जलस्नानं ततो वासोयुगं
शुभं दद्यात् अनेन मंत्रेण इदं वासोयुगं सूर्य गृहाण कृपया मम कुटिभूषणमे कंते द्वितीयं चांगप्रावर्णं त
तोयज्ञोपवीतं दद्यात् अनेन मंत्रेण सूत्रतंतुमयं शुभ्रं पवित्रमिदमुत्तमं यज्ञोपवीतं देवत्र प्रगृहाण नमो
स्तुते ततः शक्तिश्चेतमुकुटमुद्रिकादि भूषणादि दद्यात् अनेन मंत्रेण मुकुटो रत्नबद्धोयं मुद्रिका भूषणा
नि च अलंकारं गृहाण मे मया भक्त्या समर्पितं एवमलंकारं नैवेद्य पश्चात्केसर कुंकुम कर्पूर रक्तचंदन
मितमनुलेपनं दद्यात् ॐ तवातिप्रियरक्षाणां सौरयंतिग्मदीधिते सततं वा चितः स्वामिन् गृहाण कृप
यामम ततश्चंपकजपाकरवीकर्णिकेसरकांकनदादिभिः पूजां कुर्यात् ॐ वनस्पतिरसोद्भूतो गंधाढ्यो गं ३७७
धमुत्तमः आहारः सर्वदेवानां धूपोयं प्रतिगृह्यतां धूपमंत्रः ततः पयसादिनिष्पन्नं निवेदयेदनेन मंत्रेण

नैवेद्यममृतं सर्वभूतानां प्राणवर्धनं पूर्णपात्रे मया दत्तं प्रतिगृह्य प्रसीद मे ततः शुचौ तांबूल दीपारात्रि
कशांतलौक पुनः पूजादि नैवेद्य यथाशास्त्रं स्तुत्वा सुकृतं दुःकृतं वाक्षमस्वेति प्रोक्त्वा विसर्जयेत् ततो भूया
नमस्य हेमवस्त्रोपवीतालंकारान् ब्राह्मणाय निवेद्य निर्माल्यं संहृत्य भसि निक्षिपेत् इत्यर्घदानविधिः य ए
वं भास्करायार्घमुत्तौमंडलके पिवा नित्यं निवेदयेत्स्नातः स्यादमरात्मवाप्रियः अनेन विधिना कार्ष्णो भास्करे
र्घं प्रयच्छति ततः सूर्यस्य पार्थ साचात्मवद्धलभो मतः अजाक्त श्रोभ्नित्येमव अर्घं दातुं दिवाकरे ततो त्ररथस
प्तम्यां कुं इदयः प्रयत्नतः अश्वमेधफलं प्राप्य सूर्यलोकमवाप्नुयात् तस्मात्सर्वप्रयत्नेन दातव्यार्घो त्रभार
तः एवं विधस्त्वसौ देवो भद्रादित्यो त्रतिष्ठति भूयानेनोपिबहूनां पापकेहोमवर्धनः दिव्यमष्टविधं चात्र स
त्यपत्रयकारकं पापानां चापपुत्तेहि यथा पार्थ हलाहलं इतिश्री स्कंदपुराणे कुमारिकाखंडे भद्रादित्यमहा
त्म्ये त्रतीयचत्वारिंशोध्यायः ४३ अर्जुन उवाच दिव्यप्रकारमिच्छामि श्रोतुं सम्यक् मुनीश्वरः कथं का
र्याणि कानीह स्फुटं हि पुण्यपापकं श्रीनारद उ॰ शपथाः कोटधटकोविषाग्नीतप्तमाषको फालं च तंदुलं चैव
दिव्यानष्टाविदुर्बुधाः साक्षिकेषु चार्थेषु मिथ्याविवदमानयोः राजद्रोहाभिशापेषु साहसेषु तथैव च अविद

स्कं॰पु॰२ स्ततः सत्यं शपथेनाभिलंघयेत् महर्षिभिश्च देवैश्च सत्यार्थाः शपथाः कृताः जवानाम्नपतिःश्री
णो मिथ्याशपथमाचरन् वसिष्ठापिर्वर्षमध्ये सान्वयः विलभारतः अंधकात्रुगृहं गच्छेगोमिथ्याश
३७८ पथांश्चरेत् रौरवस्य स्त्वं इत्रमुह्ल्दयति दुर्मतिः अस्यंते वै पापकर्त्तान कश्चित्पश्यतीतिनः ताश्च
देवाः प्रपश्यंति स्वस्यैवांतरपौरुषः आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापोहृदयं यमश्च अह
श्च रात्रिश्च भे उभे संध्ये धर्मोहि जानातिनरस्य वृत्तं एवं तस्माद्विज्ञाय सत्यार्थान् शपथांश्चरेत् य
थाहि शपथाकुर्वन्प्रत्यक्षं विनश्यति इदं सत्यं वदामीति ब्रुवन् साक्षी भवान्यतः शुभाशुभफलं
दे हि शुचिपादौ रवेः स्पृशन् अथ शास्त्रस्य विप्रोपि शास्त्रस्यापि वक्षत्रयः मांसं स्पृशन् स्तथावैश्यः
शूद्रस्वगुरुमेव च मातरं पितरं पुत्रं स्पृशे साधारणमिदं कोशस्य रूपं पूर्वेत्याख्यातं पांडुनंद
नः विप्रवर्ज्जं तथा कोशं वर्णिनां पाययेन्नृपः यो यो यो देवताभक्तः पाययेत्तस्य तं नरं समभक्ते च
देवानामादित्यं चैव पाययेत् सर्वेषां चाग्र देवानां पापविद् आयुधास्त्रकं स्नानोदकं वा सकलं गृही ३७८
त्वा पाययेन्नरं त्रिसप्तरात्रमध्ये च फलं कोशस्य निर्दिशेत् अतः परं महादिव्य विधानं शृणु भारत

शपथाख्यापि कोशं च विज्ञातं दिव्यमेव च कोशस्कंदप्रदातव्यमिति ब्रह्मा पुराब्रवीत् महोग्राणां
च दातव्यमग्निरस्कंमपि स्फुटं साधूनां वर्णिनां राज्ञा नाग्निरस्कं प्रदापयेत् न प्रर्यातधटं देयं नोष्ण
कालकृतान्नं वर्णिनां च तथा फालं तंदुलं मुखरोगिणां कुष्ठपित्तार्दितानां च ब्राह्मणानां च नो वि
षं तप्तमाषकमर्हति सर्वे धर्मनिरत्ययं नव्याधिमकरे देत्रा शपथान्कोशमेव च दिव्यानां सुकरे
मंत्रस्तंभयंतीह केचन प्रतिघातविदस्तेषां योज्यं धर्मवत्सलो दिव्यानां स्तंभकं ज्ञात्वा पापनि
श्चं महीपति विवासयेत्स्वकाद्राष्ट्रात्ते हि लोकस्य कंटकाः तेषामन्वेषणे यत्नं राजा नित्यं समाचरेत्
ते हि पापसमाचारा नस्कंरभ्योपि तस्कराः अग्रहद्दोषास्तु लोकेषु दिव्येषु विनिमार्जयेत् महि स्वापि
न चौर्येषु धर्मज्ञान धर्मवत्सलात् न मिथ्यावचनं येषां जन्मप्रभृति विद्यते श्रद्धया पार्थिवस्तेषां वच
नादित्यमाचरेत् ज्ञात्वा धर्मान्वितो राजा पुरुषस्य विचक्षणः क्रोधाल्लोभात्कारणेश्च स्वयमेव विदुष्यति
तस्मात्सर्वेषु दिव्येषु तस्य यत्र दोषः प्राप्यते धटे सुसमायां पृथिव्यां च दिग्भागे पूर्वदक्षिणे यज्ञीयस्य तु व
क्षस्य स्त्वाप्यस्यान्मुंडकद्वयं स्तंभकस्य प्रमाणं च सप्तहस्तं प्रकीर्तितं द्वौ हस्तौ निखनेत्कार्यं दृश्यंस्या

स्कं॰ पु॰ २ हस्तपंचकं अंतरं तु तयोः कार्यं तथा हस्तचतुष्टयं मंडकोपरि काष्ठं च दृढं कुर्याद्विचक्षणः चतुर्हस्तं तुला
३।१८ काष्ठामयं कार्यं स्थिरं खदिरार्जुनवृक्षाणां शाकपाशाल्मलेस्तथा तुलाकाष्ठे तु कर्तव्यं तथा वंशाश्मवद्
यं प्राङ्मुखा निश्चलः कार्यस्तु चोदग्घटः सदा पाषाणस्यापि जायेत स्तंभेषु च धटस्तथा वणिक्सुवर्णका
रो वा कुशलः कांस्यकारकः तुलाधारधरः कार्यो रिपो मित्रे च यः समः शीत्येऽष्टाद्वि बाकापि तुलाधारं विच
क्षणः ब्रह्मघ्नेयस्य तोलका तुलां धारयतान्विषा एतस्मिंस्तोलयेच्छिक्येत्तात्तं संयोषितं नरं द्वितीयस्मिंस्तु को
शुभ्यांगो रां तु तुलयेत्बुधः इष्टकाभस्मपाषाणकपालास्थीनि वर्जयेत् तुलयित्वा ततः पूर्वं तस्मिन्नमवनारोप्य
तु मूर्ध्निपात्रं तत्तान्यस्य स्वस्तपत्रे निवेशयेत् पत्रे मंत्रस्वयं लेख्यो यः पुराकृतः स्वयंभुवा ब्रह्मणस्त्वंसुतादे वि
तुला नाम्नेति कथ्यते तुकारो गौरवे निसंलकारो लघुनि स्मृतः गुरुलाघवसंयोगात्तु लांतेन निगम्यते सं
शयान्मोचयस्वैनं नमिज्ञास्त्वं नरं शुभे मयश्चारोपयेत्तं तु नरं तस्मिन्सपत्रकं तुलितायादवर्धेत शुद्धो भव
ति धर्मतः हीयमानो न शुद्धः स्यादिति धर्मविदो विदुः छिक्यच्छेदे तुलाभंगे पुनरारोपयेन्नरं एवं निःसंशय
ज्ञानं पश्चान्नेन न लेपयेत् एतत्सर्वं रवौ वारे कार्यं संपूज्य भास्करं अथातः संप्रवक्ष्यामि विषदिव्यं शृणुष्व मे

Dr. BHAU DAJI MEMORIAL

द्विप्रकारं च तत्प्रोक्तं घटसर्पविषं तथा शृंगिणो वत्सनागस्य हिमशैलभवस्य वा यवाः सप्त प्रदातव्या अ
थवा षड्घृतप्लुताः मूर्ध्नि विन्यस्य पत्रस्य पत्रे चैतं निवेशयेत् त्वं विष ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितः त्राय
स्वैनं नरं पापात्सत्येनास्य भवामृतं येन वेगैर्विना जीर्णं छर्दिमूर्छाविवर्जितं तं तु शुद्धं विजानीयादिति धर्म
विदो विदुः क्षुधितं क्षुधितः सर्पं घटस्थं प्राच्य पूर्ववत् संस्पृशेन्नाभिकः सप्तन दंशेत्तं शुध्यतीति सः अ
ग्निदिव्यं तथा प्राह चिरं तितञ्छृणुष्व मे सप्तमंडलकान्कुर्यात्देवस्याग्रे रवेस्तथा मंडलान्मंडलं कार्यं पूर्वेणेति
विनिश्चयः षोडशांगुलकं कार्यं मंडलानामदंतरं आर्द्रवाससमाहूय तथोच्चैर्वाप्युपोषितं कारयेत्सर्वदि
व्यानि देवब्राह्मणसंनिधौ प्रत्यक्षं तारयेद्दिव्यं राज्ञा वाधिकृतस्य वा ब्राह्मणानां श्रुतवतां प्रकृतीनां तथै
व च पश्चिमेऽहनि काले हि प्राङ्मुखः प्रांजलिः शुचिः चतुरस्रे मंडले न्यकृत्वा चैव समाकरा लक्षयेयुः कु
नादीनि हस्तयोस्तस्य कर्मिणः सप्ताश्वत्थस्य पत्राणि विधीयु करयोस्ततः नवेन सितसूत्रेण कार्पासेन दृढं
यथा ततस्तु सुसमं कृत्वा अष्टांगुलमथायुतं पिंडं कृत्वाश्मसंतप्तं पञ्चाशत्पलिकं दृढं आदौ पूजां रवेः कृत्वा
कृतान्तस्याथ कारयेत् रक्तचंदनधूपाभ्यां रक्तपुष्पैस्तथैव च अभिषक्तस्य यंत्रे च वह्नियांश्चैव मर्धनि

स्कं.पु.२ मंत्रेणानेन संयुक्तं ब्राह्मणाभिहतेन च त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे पापं पुनासि
३८० वै यस्मात्तस्मात्पावक उच्यते त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनां जठरस्थोऽसि भूतानां
ततो वेत्सि शुभाशुभं पापेषु दर्शयात्मानं अर्चिष्मान्भव पावकः अथवा शुद्धभावेषु शीतो भव
महाबलः ततोभिमन्त्रितः सन्नके मण्डलानि परिक्रमेत् परिक्रम्य ततो नेर्द्याल्लोहपिंडं ततः क्षितो
विपत्रहस्तं तं पश्चात्कार्येर्तव्रीहिमर्दनं निर्विकारो करौ दृष्ट्वा शुद्धो भवति धर्मतः भयाद्वा पात
येद्यस्तु तदधो वा विभाव्यते पुनस्त्वाहारयेल्लोहं ताम्रं वा षोडशांगुलं चतुरंगुलखातं तु मृन्मयं
वापि कारयेत् पूरयेत् घृततैलाभ्यां पलैर्विंशतिभिस्ततः सुतप्ते निक्षिपेत्तत्र तत्समाषं समु
द्धरेत् शुद्धं ज्ञेयमसंदिग्धं विस्फोटादपि वर्जितं फालशुद्धिं प्रवक्ष्यामि त्वां शृणु लंधनं जय
आयसं द्वादश फल घटितं फालमुच्यते अष्टांगुलसमं दीर्घं चतुरंगुलविस्तृतं यद्युक्तं विन्यसे
मंत्रं अभिषस्तस्य मूर्धनि त्रिपरावर्तयेज्जिह्वां जिह्वन्स्मात्पदंगुलं गवां क्षीरप्रदातव्यं जिह्वाशो ३८०
धनमुत्तमं जिह्वपरीक्षणं कुर्याद्दग्धं चन्न विभज्यते तद्विशुद्धं विजानीयाद्विशुद्धं नैव मोक्षयेत्

तंदुलस्याथ वक्ष्यामि विधिं धर्मसनातनं चौर्ये तु तंडुला देया न चान्यत्र कथंचन तांडुलानुस्यंके
सिक्का रात्रौ तेने यस्थापयेत् प्रभातकारिणे देया न चान्यत्र कथंचन तांस्तु वै कारयेच्छुद्धं स्तंडुला
न शालिसंभवान् मृन्मये भाजने कृत्वा सवितुः पुरतस्थितः तंदुलान्मंत्रयेच्छुद्धां मंत्रेणानेन धर्म
तः दीयसे धर्मतत्वज्ञे मानुषाणां विशोधनं सुतस्तंडुलसत्येन धर्मतस्त्रातुमर्हसि निष्ठिवने
कृते तेषां सवितुः पुरतः शोणितं दृश्यते यस्य तमशुद्धं विनिर्दिशेत् एवमष्टविधं दिव्यं पापसंशय
छेदनं भद्रादित्यस्य पुरतो जायते कुरुनंदनः जलदिव्यं तथा प्राहुर्द्विप्रकारं पुराविद जलहस्त
स्मृतं चैकं मज्जनं चापरं विदुः बाणाक्षेपस्तथा दानं यावद्दीर्घं बताकृतं तावत्तं मज्जयेज्जीवन्तथा
तच्छुद्धिमादिशेत् एवंविधमिदं स्थानं भाद्रादित्यस्य भारत ममैव कृपया भोना ज्ञातमेतन्महीत
ले इति श्रीस्कंदपुराणे कुमारिकाखंडे दिव्यवर्णनं चतुर्थचत्वारिंशोध्यायः श्रीनारद उ०
तथा बहूदकस्थोन कथामाकर्णयाद्भुतां यस्माद्बहूदकं कुंडं कामरूपे यदस्ति च तदस्ति चात्र सं
क्रांतं तस्मात्प्रोक्तं बहूदकं कपिलेनात्र तस्माच्च वर्षाणि सुबहून्यपि स्थापितं नाम्भिनं लिंगं कपि

स्कं॰पु॰२ लेश्वरसंज्ञितं तच्च लिंगसद्यः पार्थ नंदभद्र इति स्मृतः वणिक्संपूजयामास त्रिकालं च कृतादरः सर्वध
र्मविशेषज्ञः साक्षाद्धर्म इवापरः नाज्ञातं तस्य किंचिच्च यद्धर्मेषु प्रकीर्त्यते सर्वेषां च सुहृन्नित्यं सर्वेषां च हि
१८३ तेरतः कर्मणा मनसा वाचा धर्ममेनमुपाश्रितः न भूतो न भविष्यश्च न स धर्मोस्ति किंचन नदोषो या
हि सर्वत्र निश्चलेयं व्यवस्थितः अस्य धर्मसमुद्रस्य संभवः शृणु सर्वतः निर्मथ्य नंदभद्रेण आहृतं तन्नि
गामय वापिसंमन्यते श्रेष्ठं जीवनाय तदा स्थितः परछिन्नैः काष्ठतृणैः गारणं तेन कारितं॥ मघवर्ज्यं भे
द्वर्ज्यं कूटवर्ज्यं समं तथा सर्वभूतेषु वाणिज्यमल्पलाभेन संचरेत् अमायया परेभ्योसौ गृह्णाति च क्रि
याणकं अमायेयं च भूतेभ्यो विक्रीणाति स्वयं सदृतं केचिद्यत्तं प्रशंसंति नंदभद्रो न मन्यते दोषमेनं विनि
श्चित्य शृणुत पांडुनंदन लुब्धोन्यतीर्थिकश्च स्वप्रशंसापरायणः यजन्यैत्तैर्जगद्धंति स्वं चाधतमसं नय
त् अग्निप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः यद्वादायजमान
स्य कलिजाद्द्रव्यमेव च चौरप्रायस्य कलुषा जन्मनो यजनस्य हि अदक्षिणे तथा यज्ञे कृते चाप्यविधानतः १८३
पशवो वालकुटेर्हन्युर्यजमानं मृतं हताः तस्माच्छुद्धाद्धनं द्रव्य यजमानैः शुभः स्मृतः यज्ञ येतद्धि वार्योसौ य

ज्ञसारं समस्थितः श्रद्धयो देवपूजायां नमस्कारः स्तुतिः शुभाः नैवेद्यं हविषश्चैव यज्ञोयं हि विकल्मषः स
एव यज्ञः प्रोक्तो वै येन तुष्यंति देवताः केचिच्च संति संन्यासं नंदभद्रो न मन्यते योहि सन्न्यस्य विषयान् मनसा
गृध्यते पुनः उभयभ्रष्ट एवासौ छिन्नाभ्रमिव नश्यति सन्यासस्य तु यत्सारं तत्तेनाप्तमनुत्तमं कस्य चिन्नै
व कर्माणि ग्राप्ते वा प्रशंसति नानामार्गस्थिताल्लोकात् चंद्र वल्लीयतेक्षते न द्वेष्टि नो कामयते नानुरुध्य
विरुध्यते समाश्मकांचनाधार तुल्यनिंदात्मसंस्तुतिः अभयः सर्वभूतेभ्यो यथांधबधिराकृतिः न कर्मणां
फलकांक्षा शिवस्याधीनो नैहितम् कारणाधर्ममान्विष्ठन् जनलोके चतत्श्वरन् विविक्ततरस्तत्सारं मोक्ष
पुत्रगेह ऋषिकेचिच्च प्रशंसंति नंदभद्रो न मन्यते यस्मात्तिदंति वृषणात् यथाभिदंति नासिकाः कर्षयंति
महाभारान् बध्नंति दमयंति च वृकदंशामशान्दशान् नयंति बहुकर्दमान् वाहसंपीडिता धर्याः सीदंत्यविधि
नापरे मन्ये न भ्रूणहत्यापि विशिष्टान्नास्य कर्मणः अघ्न्या इति गवां नाम श्रुतौ ताः पीडयेत्कथं भूमिभूमिज्ञा
यांश्चैव हंति काष्ठमयामुखं पंचेंद्रियेषु जीवेषु सर्वं वसति दैवतं आदित्यश्चंद्रमा वायुः प्रभूत्येय च नास्तु
ना विक्रीणाति सुनुष्टस्य तस्य कानुविचारणा अजाग्निर्वरुणो मेषः सूर्यश्च पृथिवी विराट् धेनुर्वत्सश्च सोमा

स्कं·पु·२ वै विक्रीयेत न सिध्यति एवंविधसहस्रैश्च युतो दोषैः कृषिः सदा अष्टगवं स्याद्धि हलं त्रिंशद्भागं
त्यजेत्कृषेः धर्मेण दयासंबद्धान्यश्चान्येषु कृषीकृतः सारमेतत्कृषेस्तेन नंदभद्रेण चादृतं विसा
३०२ धितमन्यजातिस्वजातीनां देवपितृषु मनुष्येषु हि जनं तपुनियुंज्यानातिसर्वदा केचित्संति वैश्य
र्यं नंदभद्रो न मन्यते मानुषामानुषानेव दासामानेन भुंजते वधबंधविरोधेन पीडयंति दिवानि
शं देहि किमन्नदातुः स्वमातुर्वा जनकस्य च मातुपितुर्वा बलिनः केतुरन्येषु नापि वा इति सं
चिंत्य चिरन्नमराइव ईश्वरः ऐश्वर्यमदपापिष्ठा मदा मघमदादयः ऐश्वर्यमदमत्तो हि नापति
त्वा हि माद्यति आत्मवत्सर्वभूतेषु प्रियाने व च माद्यति नात्मप्रसयवान्देहे केश्वरश्चैदृशोस्तिहि
ऐश्वरस्यापि सारं स उयाहेतन्नित्रामय स्वजात्या सर्वभूतेषु यदसौ न पराङ्मुखः तीर्थाण्येक प्रशं
संति नंदभद्रो न मन्यते श्रमेण क्लेशकरा तापशीतवातक्षुधातृषा क्रोधेन गेहे धर्मस्य नापि नाश
मवाप्नुयात् सौख्यं भवाचनस्यापि श्रद्धया स्वल्पगोर्थवान् समर्थो हि मवस्पुण्यं त्राक आमुंक्य चा ३०२
स्तिसः सदा शुचिर्देवभाजी तीर्थसारं ग्रहेध्यधात् नापः पुनाति पापानि न शैला न महाश्रमः आ

त्मा पुनाति पापानि यदि पापान्निवर्तते एवमेष समाचारं प्राकुर्वंतं ततस्ततः एकोनक्षसदा धीमा
नंदभद्रसमास्थितः तस्यैवं वर्ततः साधोः स्पृहयंत्यपि देवताः वासवः प्रमुखाः सर्वे विस्मयं पर
मं ययुः अत्रैव स्थानके वापि शूद्रोभूत्प्रातिवेश्मकः स नंदभद्रधर्मं पुनःपुनरसूयते नास्ति
कः सुदुराचारः सत्यव्रत इति श्रुतः स सदा नंदभद्रस्य विलोकयति चांतरं छिद्रे चरस्य पत्याभि
तता धर्मान्निवर्तयेत् ततस्त्वेवं वर्ततोस्य नंदभद्रस्य धीमतः एकोभूत्तनयः कष्टाद्वार्द्धक्ये सो
प्यनश्यत ततोस्य सुप्रिया भार्या सर्वैः साध्वीगुणैर्युता गृहधर्मस्य मूर्तिर्या साक्षादिव अरुंधती
विनाशमागता पार्थ कनकानाम नामतः ततो जितं द्विषो पापहेंगे धर्म विनाशतः शुशोच हा क
ष्टमिति पापोहमिति चासकृत् ततस्य चांतरं दृष्ट्वा हृष्टः सत्यव्रतश्चिरात् उपाव्रज्य स हा कष्टं शृण्वं
स्तं नंदभद्रकं दधिकर्ण इवासाद्य नंदभद्रमुवाच सः हा नंदभद्र यद्येवं तवाप्येवंविधं फलं ए
तेन मन्ये मनसि धर्मोप्ययं व्यर्थ एव यत् इत्यादि वचोभिः प्राच्य तत्त्वाक्यं तस्य ततः सत्यव्रतस्त
तः प्राह नंदभद्रं कृतान्वितं नंदभद्र सदा तुभ्यं वक्तुकामोस्मि किंचन प्रस्तावस्याप्रभावाच्च नादि

स्क॰पु॰२ तमयचकचित् अप्रस्तावब्रुवन्वाक्यंबृहस्पतिरपिध्रुवं लभतेबुद्ध्यवज्ञानमवमानंचहीनवत् नंदभ
द्र उ॰ अहिअहिनेमकिंचित्साधुगाथीप्रियंपरं वचोभिप्रस्थसत्वानांनमोक्षोप्युपमीयते सत्यत्र
१८३ त उ॰ नचभिर्नचभिश्चैवविमुक्तंवाग्विदूषणैः नवभिर्बुधिदोषैश्चवाक्यंवक्ष्यामिदोषवत् सूक्ष्मंसंख्या
क्रमश्चापिनिर्णयःसप्रयोजनः पंचैतान्यर्थजातानियत्रतद्वाक्यमुच्यते धर्ममर्थंचकामंचमोक्षंचोद्दि
श्यचोच्यते प्रयोजनमितिप्रोक्तंप्रथमंवाक्यलक्षणं [illegible] धर्मार्थकाममोक्षेषु प्रतिज्ञायवि
न्नाषतः इदंतदितिवाक्यंतेप्रोच्यतेसोपिनिर्णयः इदंपूर्वमिदंपश्चाद्वक्तव्यंयत्क्रमेणहि क्रमयोगंतम
प्याहुर्वाक्यतत्वविदोबुधाः दोषाणांचप्रमाणांचप्रमाणंप्रतिभागशः उभयार्थमभिप्रेक्ष्यसासंख्येत्यवधा
र्यतां वाक्यज्ञेयषुभिन्नेषुयत्राभेदंप्रदृश्यते तत्रातिशयहेतुत्वंतत्सौक्ष्म्यमितिनिर्दिशेत् इतिवाक्यगु
णानांचवाग्दोषोद्दिनवंश्रृणु अपेतार्थमभिन्नार्थमपवृत्तंतथाधिकं अश्लक्ष्णंचापिसंदिग्धंपदांतेगुरुवा
क्षरं पराङ्मुखमुखंयच्च अनृतंचाप्यसंस्कृतं विरुद्धंयत्त्रिवर्गेणन्यूनंकष्टातिशब्दकं व्युत्क्रमाभिहितंयच्च ३८३
सदोषंचाप्यहेतुकं निःकारणंचवाग्दोषात्बुधिजांश्रृणुलंचयत् कामक्रोधाद्भयाच्चैवलोभादैन्यादनार्य

कात् हिनानुकोशतोभावान्नचवक्ष्यामिकंचन वक्ताश्रोताचवाक्यंचयदात्वविकलंभवत् सममेतिविचक्षा
यांतदोसार्थप्रकाशते वक्तव्यमेतुयदावक्ताश्रोतारमवमन्यते श्रोतावाक्यथवक्तारंतदावाक्यंनरोहति
अथयस्वप्रियंब्रूयात्श्रोतुर्यात्कृत्यतत्कृतं विरोकजायतेतस्मिन्वाक्यंतदपिदोषवत् तस्माद्यस्वप्रियंसत्
क्तःश्रोतुश्चाप्यथयत्प्रियं सत्यमेवप्रभाषेतसवक्तानेतरोभुवि मिथ्यावादानृतशास्त्रजालसंभवान्परिहाय
च सत्यएववर्ततंयस्मात्तस्मात्सत्यव्रतस्त्वहं सत्यंतेसंप्रवक्ष्यामिमंतुमर्हसितत्तथा यदप्रभृतिभद्रत्वंपा
पाणःस्पार्चयेरतः तत्प्रभृतिकिंचिच्चनहिपश्यामिशोभनं एकःसोपिसुतोनष्टोभार्याचार्थाप्यनश्यत कृता
नांकर्मणांसाधुफलमनेविधंभवत् क्षदेवाःसंतिमिथ्येतत्दृश्यंतेचेद्भवंसदि सर्वोबकचतिप्राण्यद्रव्यार्थ
वविकल्पना पित्तदुद्दिश्ययत्कृतिममहास्तःप्रजायते अन्नस्यापद्रवंपश्यमेतोहकमषिष्यते यत्सदंवकु
धामत्ताघर्णोयंतिद्विजाधमाः विश्वनिर्माणमखिलंतत्रापिशृणुसत्यतः उत्पत्तिश्चापिभंगश्चविश्वस्येतद्द
यंमया एवमेवहिसर्वंचसदिदंवर्ततेजगत् स्वभावेनविश्वमिदंहिवर्ततेस्वभावतः स्वभावतोप्यवो
र्वीतिनिसंस्वभावेनावर्षतिवाबुदोयं स्वभावतोरोहतिधान्यजातंस्वभावतोवर्षहिमातपत्वं स्वभावतःसं

स्कं.पु.२ स्थितामेदिनी च स्वभावतः संरितः संस्थवेति स्वभावतः पर्वताभांति नित्यं स्वभावतो वारिधिरेष संस्थि
तः स्वभावतो गर्भिणि संप्रसूते स्वभावतो मीव हृ च स्थ जीवा यथा स्वभावं न भवंति वक्रा ऋतुः
३८४ स्वभावा बदरीषु कंटकः तथास्मभावेन न हि सर्वमेतत् प्रकाशते कोपि कर्तान दृश्यः तदेवं संस्थितो
लोके मूढा मुह्यंति मत्तवत् मानुष्यमपि यद्भूतां वदंत स्वर्गे शृणुष्वतत् मानुष्यात्परं कष्टं वैरिणेनो
भवेद्धि तत् शोकस्थानसहस्राणि मनुष्यत्वे क्षणे क्षणे मानुष्यं हि स्मृताकारं सभाग्यास्मादिमुं
च्यते पशवः पक्षिणः कीटाः क्रमयश्च यथासुखं अबद्धा विहरंत्येते योनिरेषां सुदुर्लभा नि
श्चितास्थावराह्येते सौख्यमेवां महद्भुवि बहुना किं मनुष्येभ्यः सर्वे धन्यान योनिजाः स्वभावमेनं ज्ञा
नं हि पुण्यापुण्यादि कल्पना यदेते स्थावराः कीटाः पतंगा मानुषादिकाः तस्मान्मिथ्यापरित्यज्य
नंदभद्र यथासुखं पिब क्रीड जड भुंक्ष्व भोगात्सत्यमिदं भुवि नारद उ० इत्येतैरसुखैर्वाक्यैरयु
क्तैरसमंजसैः स सव्रतस्य नाकंपन् नंदभद्रो महामनाः प्रहसन्निव तं प्राह क्षोभ्यसागरो य ३८४
था यदूवानाहधर्मिष्ठाः सदा दुःखस्य भागिनः तन्मिथ्या दुःखजालानि पश्यमः पापनामपि च

पबंधपरेक्लेशाः पुत्रदारादि वंचताः पापिनामपि दृश्यंते तस्माद्धर्मो गुरुर्मतः अहं साधुरहो क
ष्टं कष्टमस्य महाजनाः साधोर्वदंति तदपि पापिनां दुर्लभं त्विदं दारादिद्रव्यलाभार्थं विभ्रितः
पापिनो गृहे भवानपि बिभेत्यस्माद् दुष्टि कुप्यति तत्कथा यथास्य जगतो श्रेष नास्ति हेतुर्महेश्वरः
तद्दुर्लभाषितं तुभ्यं किं राजानं विना प्रजा यच्च प्रविषि पाषाणं मिथ्यालिंगं समर्चसि यद्भयात्
लिंगमाहात्म्यं वेत्ति नो धेय थार्थविधं रवि ब्रह्मादया सुराः सर्वे राजानश्च महर्द्धिकाः मानवा मुनयश्चै
व सर्वे लिंगं यजंति च स्वनामस्थानि चिन्हाते षां लिंगानि संति च एते किल भवन्मूर्खाः स्त्वं तु सत्यव्र
तः सुधीः प्रतिष्ठाप्य पुरा ब्रह्मा पुष्करे नीललोहितं प्राप्तवान्परमां सिद्धिः ससर्जेमाः प्रजाः प्रभुः
विष्णुनापि निहत्याजौ रावणं पयसां निधेः तीरे रामेश्वरं लिंगं स्थापितं चास्ति कं मुधा वत्रं हत्वा पु
रान्नाक्रो माहेंद्रे स्थाप्य शंकरं लिंगं विमुक्तपापोथ त्रिविदद्यापि मोदते स्थापयित्वा क्रिवं सं योगं
गा सागरसंगमे नरा मयोम्भ सोमश्च प्रभासे पश्चिमोदधौ काश्यपश्च धनदः सद्येगरुडकश्य
पौ नैमिषे वायुवरुणौ स्थाप्य लिंगं प्रमोदतः अस्मिन्नेव संभतीर्थे मारशंगुहो विभुः लिंगं संस्था

स्कं॰पु॰२ पयामाससर्वपापहरंतत्किं यममन्येसुरेयोनिपार्थिवेर्मुनिभिस्तथा संस्थापितानिलिंगानितानिसंख्यातुमु
३८५ त्सहे पृथिवीवासिनःसर्वेयेचस्वर्गनिवासिनः पातालवासिनस्तुष्टाजायतेलिंगपूजया यच्चब्रवीषिगीर्वाणा
नसंतिसंतिचकुतः कुत्रापिनैवदृश्यंते तेनमेविस्मयोमहान् एकवल्किस्मितादेवानृयावंतेवाकुलस्यवा
यमिच्छसिमहाप्राज्ञसाधुकौटिरुरूस्तव स्वभावान्नैवसर्वार्थासंसिध्यायदितेमतं भोजनानिकथंसिध्येन्नैव
कर्तारमंतरा बदरीमंतरेणापिदृश्यंतेकंटकानहि तस्मात्कस्यातिनिर्माणंयस्ययावत्तथैवतत् पंचत्रयीषि
पश्चाद्याःसुखीनोधन्यकास्त्वमी लब्ध्वेतेनेहमुक्तेर्चकनीपिश्रुतमेववा तामसाविकलायेच कष्टंतेषांचश्लाघ्य
ता सर्वेंद्रिययुताःश्रेष्ठाःकुतोधन्यानमानुषाः सम्यंतवब्रतंमन्येनरकायलयाहृतं अस्मिन्नार्थेअनिवृत्तिका
मोयंभवितावचिरा आदावाडंबरेणैवश्रुयतोज्ञानेभवेत् इत्थंनिःसारथाव्यक्तमादावाडंबराधियत् मायावि
मोहिश्रुवतांवाक्यंचाडंबरायतं कुनाणकमिवादिप्तं परिक्षेयंसदागतं आदौमध्येतथाचांतेयथावाक्यम
दोषवत् कषदाघेस्वर्णमिवच्छेदेपिस्याच्छुभंशुभं लयान्यथाप्रतिज्ञातमुक्तंचैवान्यथापुनः लंदोषानायमस्मा ३८५
कंलक्ष्वःश्रुणुमाहिमं नास्तिकानांचसर्पाणांविषस्यचगुणस्त्रयं मोहयंतिपरंयच्चदोषानैवपरस्यतु आपो

MEMORIAL

वस्त्रंतिलास्तैलंगंधावासेयतथा पुष्पाणामधिवासेनतथासंसर्गजागुणाः मोहजालस्ययोनिर्हि मूढैरेव
समागमः अहन्यहनिधर्मस्ययोनिःसाधुसमागमः तस्मात्प्राज्ञैश्चवृद्धैश्चशुद्धभावैस्तपस्विभिः सद्भिश्चस
हसंसर्गःकार्यःशमपरायणैः नर्नीचैर्नाप्यविदुद्भिर्नानातत्तैर्विशेषतः एषांत्रीण्यवशुद्धानियोनिर्विद्याचक
र्मच तांश्चसेवेद्धिशेषणशास्त्रेयषांहिविद्यते असतांदर्शनस्पर्शसंजल्पनसहासनैः धर्माचाराःप्रतीयं
तेनचसिध्यंतिमानवाः बुद्धिश्चहीयतेपुंसांनीचैःसहसमागमात् मध्येश्चमध्यतांयातिश्रेष्ठतांयातिचेत्तमैः
इतिधर्मस्मरन्नाहसंगमार्थीपुनस्तव यत्रिदंसिषिज्ञानेषवेपर्यार्णवकृतः वेदाप्रमाण्यंस्मृतयःप्रमा
णंधर्मायुक्तंवचनंप्रमाणं नेतत्रयंयस्यभवेदप्रमाणंकस्तस्यकुर्याद्वचनंप्रमाणं इत्थंयिरेलावचनंमाहा
त्मासनंदभद्रःसहसातेदेव गृहाद्विनिःसृत्यजगामपुण्यंबहूदकंभद्रवेःसकुंडं इतिश्रीस्कंदपुराणे
कुमारिकाखंडेपंचचत्वारिंशोध्यायः ४५ श्रीनारदउवाच बहूदकस्यकुंडस्यतिरस्थंलिंगमुत्तमं क
पिलेश्वरमभ्यर्च्यनंदभद्रस्ततसुधीः प्रणम्यचाग्रतस्तस्थौप्रबद्धकारसंपुटः संसारच्चरितेःकिंचित् दुःखी
गाथाप्यगायेत स्रष्टारमस्यजगतश्चेत्यश्यामिसदाशिवं नानादृष्टभिरथतंकुर्यानार्थविलक्षितं अपूर्यमा

स्कं·पु·२ णं तव किं जगत्संस्थानं विना निरीहवद्ध्यायेन स्वं दृष्टं भार्गं कुलाकुलवत् संचिन्तनेन शुभेन रागादिरहि
तेन च अकस्मात्त्वम् सहजं न स्वदृष्टं निर्मितं जडं निर्वैरेण समेन अथ सुखदुःखम् कामये वैः ब्रह्मादि की
३८६ टपर्यंतं किमर्थं क्लिश्यते जगत् कांश्चित् स्वर्गे अथ नरके पातयन्त्वं सदा शिव विफलं समवाप्नोति कि
मेवं कुरुषे वद दुष्टैः पुत्रादिभिर्नाथ वियुक्ता मानवाह्यमी त्वं देहि करुणासार किं घृणापि भवेन्तरे
अतीव नाचितं तुभ्यमिति दीश्वर सर्वथा यत्ते भक्तासमं पापे मज्जंते दुःखसागरे एवंविधेन संसार
चारित्रेण विमोहिताः स्थानांतरं न यास्यामि मोक्ष्ये पास्यामि नोदकं मरणांतमेव यास्यास्त्यास्य सं
चिन्तयंन दुःसएवं विमृशंनेव नंदभद्रोऽहं स्थितः ततश्च तुर्थे दिवसे बद्धदृढकृतं शुभे कश्चिद्बा
लः सप्तवर्षः पीडापीडित आययौ कौपीनी वगलकुष्ठी प्रमुत्थश्च पदे पदे नंदभद्रमुवाचेदं करुणा
त्संस्तंभ्य बालकः अहो सुरूपसंयोग कस्माद्दुःखी भवानपि ततोऽस्य कारणं सर्वं व्याचष्ट नंदभद्रकः
श्रुत्वा तत्कारणं सर्वं बालो दीनमना अब्रवीत् अहो हकष्टमस्मत्त्वं बुद्धानां यदि बुद्धिताः तदहो भारतं ३८६
सं दुं सत्सायुषस्तद्धिकः अहमेव हृष्टोऽमन्ये पितृभ्यां यो विवर्जितः अशक्तश्चलितुं वापि मनुमिष्वा

मि या पुनः सर्वेऽलाभाः साभिमाना इति सत्यावतश्रुतिः संतोषाप्लुचितस्तुभ्यं देहं यस्य दृढं स्थिरं
शरीरं निरुजं चेन्मे भवेदपि कथं च न क्षणे क्षणे च तं कुर्यात भुज्यते पश्चाद्युगे इन्द्रियाणि वशे य
स्य शरीरं च दृढं भवेत् सोऽप्यन्यादि स्थितेन च श्रुको अन्यस्तस्मादचेतनः शोकस्थानसहस्राणि हर्षस्था
नशतानि च दिवसे दिवसे मूढ माविशंति न पंडितं नहि ज्ञानविरुद्धेन बद्धपापेषु कर्मसु सज्जघा
तिषु सज्जंते बुद्धिमंतो भवद्विधा अप्रांगा बुद्धिमाकुर्या सर्वश्रेयोविघातिनीं श्रुतिस्मृत्यविरुद्धा
स्या बुद्धिलयास्तिनिर्मला अथ कृच्छ्रेषु दुर्गेषु व्यापत्सु स्वजनस्य च शारीरमानसैर्दुःखैर्न सीदंति
भवद्विधा नाप्राप्यमभिवांछंति नष्टं नेच्छंति शोचितुं आपत्सु च न मुह्यंति नराः पंडितबुद्धयः मनो
देहसमुत्थाभ्यां दुःखाभ्याम् अर्दितं जगत् तयोर्व्याससमासाभ्यां शमोपायमिमं शृणु व्याधिरनिष्टसं
स्पर्शाच्छ्रमादिष्टविसर्जनात् चतुर्भिः कारणैर्दुःखं शारीरं मानसं चयत् मानसं चाप्यप्रियस्य संयो
गः प्रियवर्जनं द्विप्रकारं महाकष्टं द्वयोरनुदाहृतं मानसेन हि दुःखेन शरीरमुपतप्यते अयःपिं
डेन तप्तेन कुंभसंस्थमिवोदकं तदाश्च प्रतिकारश्च सततं चविवर्जनात् व्याधराधेश्च प्रशमः क्रि

स्कं॰पु॰२ यायोगद्वयेन तु मानसं शमयेत् तस्मात् ज्ञानेनाग्निमिवांबुना प्रशांते मानसे ह्यस्य शारीरमुपशाम्यति मनसो
१८७ दुःखमूलं तु स्नेह इत्युपलभ्यते स्नेहाच्च सज्जते जंतुर्दुःखयोगमुपैति च स्नेहमूलानि दुःखानि स्नेहजानि
भयानि च शोकहर्षौ तथायासः सर्वं स्नेहात्प्रवर्तते स्नेहादिंद्रियरागश्च प्रजज्ञे वै शायस्तथा अश्रेयस्कावुभा
वेतौ पूर्वस्तत्र गुरुः स्मृतः त्यागी तस्मान्न दुःखी स्यान्निर्वैरो निष्परिग्रहः अत्यागी जन्ममरण प्राप्नोतीह पुनः पुनः
तस्मात्स्नेहं न लिप्सेत मित्रेभ्यो धनसंचयात् स्वशरीरसमुत्थं च ज्ञानेन विनिवर्तयेत् ज्ञानान्वितेषु सिद्धेषु
शास्त्रज्ञेषु कृतात्मसु न तेषु सज्जते स्नेहः पद्मपत्रेष्विवोदकं रागाभिभूतः पुरुषः कामेन परिकृष्यते इच्छा
संजायते तस्य ततस्तृष्णा प्रवर्धते तृष्णा हि सर्वपापिष्ठा नित्योद्वेगकरी मता अधर्मबहुला चैव घोररूपा
निबंधिनी या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः योसौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखं अना
द्यंता तु सा तृष्णा ह्यंतर्देहगता नृणां विनाशयति संभूता लोहं लोहमलो यथा यथैधः स्वसमुत्थेन वह्निना ना
शमृच्छति तथा कृतात्मा लोभेन सहजेन विनश्यति तस्माल्लोभो न कर्तव्यः शरीरे चात्मबंधुषु इत्येषु वानह १८७
ष्यत प्रोक्षानाशेन शोचयेत् नंदभद्र उवाच अहो बालेन बालस्त्वं मतो मे लोनमाप्यहं तद्वाक्यैरतितृप्तोहं लो

प्रवक्ष्यामि किंचन कामक्रोधावहंकारमिंद्रियाणि च मानवाः निदंति तत्र मे नित्यं विविक्षेयं प्रजायते अह
मेषमेमेदं च कार्यमीदृशकस्त्वहं इत्यामिचात्मविज्ञानमहंकार इति स्मृतः परिहार्यः स चेत्तच्च विनोन्म
तः प्रकीर्त्यते कामाभिलाषयुक्तः स चेत्सुंसा विवर्ज्यते कथं सर्वो मुमुक्षा वा साध्यते ईदृशा यथा क्रोधो
वा यदि संत्यज्यस्ततः शत्रुक्षयः कथं बाह्यानामंतराणां वा विना तत्क्षणवह्निदुः इंद्रियाणि निगृह्यैव दुष्टानी
निपीड्येत् कथं स्यात्स्वधर्मश्रवणं कथं वा जीवनं भवेत् एतस्मिन्मे मनो विद्धं स्विद्यते ज्ञानसंकटे तथा कस्मा
दिदं स्पष्टं जडं विश्वं विदात्मना एवं यदुरुधाक्लेशैः पीड्यते ह्याकुतस्त्विदं बालक उ॰ सम्यगेतद्यथा पृष्टं यत्र
मुह्यंति जंतवः शृणुष्वैकाग्रमना भूत्वा ज्ञातं द्वैपायनान्मया प्रकृतिपुरुषश्चैव अनादी शृणु मे पुरा साध
र्म्येणावतिष्ठेते स्वेच्छाप्राग जरामरौ ततः कालस्वभावाभ्यां प्रेरिताः प्रकृतिः पुरः पुंसः समागमेच्छातद्रा
त्रास्मकुर्यंते ततस्तमोमयासा च लीलया देव विक्षिता राजसी समभूद्दृष्टा सात्त्विकी समजायते एवं त्रि
गुणतां याता प्रकृतिर्देवदर्शनात् तां समास्थाय परमश्विमूर्तिः समजायत तस्या प्रावरणार्थं च प्रवृत्तः स्वां
दशास्ततः असूयत महत्तत्वं त्रिगुणं तद्धि दुर्बुधाः अहंकारमहत्तत्वात्सत्त्वराजसतामसाः तमो रजस्तमा

स्कं॰पु॰२ पाद्य रजसत्वं गुणं नयेत् शुद्ध सत्वे ततो मोक्षं प्रवदंति मनीषिणः तमसो स रजसस्तस्मात्तं शु
३८८ द्धं धर्थं च सर्वदा जीवात्मसंज्ञानुस्वीयांज्ञानव्यभजत्परमेश्वरः तावंतस्ते च क्षेत्रज्ञा देहाद्यावं त
यं बहिः निःसरंति यथा लोहान्नपालिंगास्फुलिंगकाः तन्मात्रभूतसर्गो यमहंकारात्तु तामसात्
इंद्रियाणां सात्विका च त्रिगुणानि च तान्यपि एतैः संसिध्यर्थं तेन सच्चिदानंद विक्षणात् रजस्तमश्च
शोध्येत सत्वेनैव मुमुक्षुभिः तस्मात्कामं च क्रोधं च इंद्रियाणं प्रवर्तनं अहंकारं च संसत्व सात्विकि
सिद्धिमश्नुते राजसास्तामसाश्चैव सोऽद्या कामादयस्तमी सात्विका सर्वदा सत्या सात्विकी सिद्धि
मश्नुते गुणत्रयस्य वक्ष्यामि संक्षेपाल्लक्षणं तव शास्त्राभ्यासस्तितो ज्ञानं शौचमिंद्रियनिग्रहः धर्म
क्रियात्मचिंता च सात्विकं गुणलक्षणं आरंभरति ताधैर्यमुपसत्कार्यविग्रह धर्मक्रियात्मचिंता
च विषयोपासनाजसं अन्यायेन धनादानं तंत्रीनास्तिक्यमेव च कार्यं च याचकार्धं च मात्मसंगुण
लक्षणं तस्माद्बुद्धिमुखैस्सैतैः सात्विकैर्देवतां भजेत् राजसैर्मानवस्तं च तामसैस्थाणुयोनितां ३८८
बुध्वाद्वैरवमुक्तिस्यादेवैरेव च यातना अमीषां चाप्यभावेन किंचिदुपपद्यते कलौ दाहिकलाही

नं सुवर्णं शोधयेद्यथा तथा रजस्तमश्चैव संशोध्यो सात्विको गुणैः अस्मादेव गुणानां च समवाया
दनादितान् सुखिनो दुःखितश्चैव प्राणिनः शास्त्रदर्शने अष्टाविंशति लक्षैश्च गुणमेके कमीश्व
रः व्यभजच्चतुरशीति लक्षास्ता जीवयोनयः सकाशान्मनसस्तद्वत् आत्मनः प्रभवं हि ते ईश्व
रांशाश्चैतसर्वे मोहिताप्रकृतेर्गुणैः कृशानासादयंत्येव यथेनाधिक्षता चिमा अनान्नापयसावा
पि जीवानां चाथ श्रीयसे मानुष्यमाकृस्तत्वज्ञाः शिवभावेन भावितं नेदभद्रम् एवमेतत्किंतु भयः
ईश्वरास्त्वेदातारः पूज्यंते यैश्च देवताः स्वभक्तांस्तांतु दुःखेभ्यः कस्माद्रक्षंति मानवान् विज्ञापाले
पि दृश्यंते दुःखमग्नाः सुरा नरताः इतिमेमोह्यते बुद्धिस्त्वं वाक्यं बालमन्यसे बालकजना अशुचिश्चशु
चिश्चापि देवभक्ता हि जास्मृताः कर्मणा मनसा वाचा तद्भक्ता भक्त उच्यते अशुचिर्देवताश्चैव यदा पूज्
यते नरः तदा भक्तान्या विशांति सो पि मुह्यति तत्क्षणात् विभ्रष्टश्चाअकर्माणि तानि तानि नि भवेत
ततो विनश्यति क्षिप्रं नाशुचिः पूजयेत्ततः शुचिर्वाप्यर्चयेद्यस्य तस्य वेदं शुभं भवेत् पूर्वपुण्यं क
तं यत्कं कर्मणः का हि मुच्यते महेश्वरो ब्रह्महत्या भयात्तत्र ततस्ततः तस्तो तीर्थपुकस्तस्मादितरो

स्कं॰पु॰२ मुच्यते कृतात् अंबरीषसुतो हृत्वा पर्वतान्नारदास्तथा शीतापहारमोपेतिरामान्यो मुच्यते कथं अत्रापि
१८८ त्रिरसा छेदकामयित्वासुतामगात् इंद्रचंद्रविधिध्यप्रमुखाः प्रापुयुः कथं तस्मादत्र स्वयंस्वकृतं भोज्यमेव
नरैः सदा मुच्यते कोपि स्वकृतान्नैवेति श्रुतिनिर्णयः किंतु देवप्रसादेन लभ्यमेकं सुरप्रैतैः बहुभीर्जन्मभि
र्यो प्रभुज्यते केन जन्मना चतुर्भुक्त ततस्त्वर्थं भवेदिति विनिश्चयः यगतां तगते पापैः भुंचयो देवताश्रताः
इह ते पुत्रपौत्रैश्च मोदंते पुत्रवेरह च तस्माद्देवाः सदा पूज्याः भुविभिः श्रद्धयान्वितैः प्रत्यक्षे शोधनी यात्रस्व
वर्णोदितकर्मभिः स्वनुष्ठितोपि धर्मस्यात्कुशयेव विनाशितं दुराचारस्येदेवोपि प्राहेती भगवान्हरः भोक्त
व्यं स्वकृतं तस्मात् पूजनीयः सदा शिवः स्वाचारेण परित्याज्यारागद्वेषाविदं परं नंदभद्र उ॰ अत्र प्रज्ञकि
मतं च पापिनोपि नरा यदा मोदमाना प्रदृश्यंते धारैरपि धनैरपि व्यक्तं तैस्तमसा दत्तं दानं पूर्वेषु जन्मसु
सज्ज सापूजितः शंभुस्ततः प्राप्तं कृतं च तैः किंतु यत्तमसा कर्म कृतं तस्य प्रभावतः धर्माय नरति भूयात्तत्त
स्याश्च तदेव च भुक्त्वा पुण्यफलं यांति नरकं नात्र संशयः अस्मिश्च संशये प्रोक्तं मार्कंडेयेन श्रूयतां इहैवैक ३८८
स्य नामुत्र अमुत्रैकस्य नो इह इहचामुत्र चैकस्य नामुत्रैकस्य नो इह पूर्वोपात्तं भवेत्पुण्यं भुक्ते नैवार्जयत्य

पि इह भोगः सर्वे प्रोक्तो दुर्भगः स्यात्स्वमेधसः पूर्वोपात्तं यस्य नास्ति तपोभिश्चार्जयत्यपि परलोके तस्य भोगाधि
मतः सत्क्रियास्फुटं पूर्वोपात्तं यस्य नास्ति पुण्यं चेहानार्जयेत ततश्चेहामुत्र चापि भोगाधिक्तेन राधमं इति
ज्ञात्वा महाभाग सत्क्रिया ग्राह्या निकृत्स्नशः भजरुद्रं वर्णधर्मं पालयस्वात्परं न हि योहि न दृष्टश्च भीदृष्टपुप्रोमयापि
नत्राचति तत्प्येत वा भवेद्बुधा निश्चितं सोन्यजन्मनः नंदभद्र उ॰ वा॰ नमस्तुभ्यमबालाय बलारूपाय धीमते
कामवास्तव तो वेत्तु दृष्टा मिलांश्च विस्मिते बहवोपि मया चक्षा दृष्टाश्चोपासिताः सदा तेषामीदृशा कावुद्धि
नदृष्टा न श्रुता मया येनमे जन्मसंदेहा नाशीता लीलयैव च तस्मात्सामान्यरूपित्वे निश्चितं न मतं मम बाल उ॰
महदेवत्समाख्येयं मवत्यथ शृणु तत्वतः इति सप्ताधिके चापि सप्तमे जन्मनि त्वहं नैमित्रे न गवे विप्रो नाम्ना
सं धर्मजालिकः वेदवेदांगतत्वज्ञः स्मृतिशास्त्रार्थविद्वरः व्याख्याता धर्मशास्त्राणां यथा साक्षाद्बृहस्पतिः किं
त्वहं विविधान् धर्मान् लोकानां वर्णयेस्म वै स्वयं चाति दुराचारः पापिनामपि पारदान् मांसाशी मद्यसेवी च पर
दाररतिः सदा असत्यभाषिते भीच सदा धर्मध्वजिरवलः सोभी दुरात्मा कथं कोन कर्ता चर्हि चित क्वचित् य
नजालि स्मात् लिकं लोकेर्वीक्ष्य पापिनः तत्सर्वामां ततः प्रादुर्धर्मजालिक इत्युत सोहं तैर्बहुभिः श्चीर्णैः पातकैरंतमा

स्कं.पु.२ गते मृतो गतो मस्थानं पातितः कूटशाल्मली यमदूतैस्ततः कष्टः स्मार्यमाणः स्वचेष्टितं पक्षिश्वभिः
कृष्यमाणो जीवाभिः प्रक्षिप्यानि च आत्मनं च बहूनि दिनत्राण्यतीत्य च संगमाः नरके यामीति भ्रंशात्
१९० धर्मं प्रतिपद्यीउष्यतः सान्त्वे मुहूर्तमत्र स्वां दृषिध्यन्यस्ततः पुमान् नमानमः कर्मभूम्यैः सुकृतं दुःकृ
तं च वा तस्यां मुहूर्तमात्रेण युगेरपि नमष्यति ततो विपश्चिज्जनको मोक्षयामास नारकान् ततः स
हाहं प्रयुक्तश्च कथंचिदवपीडितः स्थाणुलमवभूयाथ क्रूराणां साधभूरिशः कीटोहमभवं प
श्चात्तीरे सारस्वते शुभे तत्र मार्गे सुखमीवसं सुप्तोहं यदृच्छया आगच्छतो रथस्यास्य शब्दमश्रौष
मुत्तमं तं मेघनिनदं श्रुत्वा भीतोहं सह साजनात् मार्गमुत्सृज्य दूरेण प्रपलाय नमाचरं एतस्मि
न्नंतरे व्यासस्तत्र प्राप्तो यदृच्छया स मामपश्यत्तत्र स्वं कृपयासंयुतो मुनिः यन्मया सर्वलोका
नां नानाधर्मप्रकीर्तितः विप्रजन्मनि तस्यैव प्रभावाद्व्याससंगमः ततः सर्वरुतज्ञो मां प्राहाचार्यः
कीटभाषया किमेवं नश्यसे कीट कस्मान्न स्नो बिभेषि च अहो समुचिता भीतिर्मनुष्यस्य कृतस्त १९०
व इत्युक्तो मतिमान्पूर्वपुण्याद्व्यासं तदाजिवान् नमे भयं जगद्वंद्य मृत्योरस्मात्कथंचन एतदेव

भयं मा तो गच्छेयमधमां गतिं अस्या अपि कुयोनेश्च संसना कोटिशो धमाः तासु गर्भादिकक्ले
शाभीतस्त्रस्तोस्मि नान्यथा व्यास उ॰ माभयं कुरु सर्वाभ्यो योनिभ्यश्चिराद्दिव मोक्षयिष्यामि ब्राह्म
ण्यं यावन्नेष्यामि निश्चितं इत्युक्तोहं कालव्यासेन तं प्रणम्य जगद्गुरुं मार्गमागत्य चक्रेण पीडितो मृत्युमा
चरं ततः काकशृगालादि योनिषु स्मि यदाभवं तदा तदा समागम्य व्यासो मां स्मारयच्च तत् ततो
बहुविधा योनिपरिक्रम्यास्मि कर्हितः ब्राह्मणस्य च गेहे स्यां योनो जातोतीति दुःखितः ततो जन्मप्र
भृत्यस्मि पित्रभ्यां परिवर्जितः गलकुष्ठी महापीडामतां योनुभवापि च ततो मां पंचमे वर्षे व्यास आ
गत्य ज्ञतवान् कर्णसारस्वतं मंत्रं तेनाहं संस्मरामि च अनधीतानि शास्त्राणि दोवेन धर्माश्च कृ
त्स्नशः उ॰ तं व्यासेन वेदांमे गच्छ क्षेत्रं गुहस्य च तत्र लं नंदभद्रं च याथ्वस्य महामतिं स ह्यां बहू
दकपाणान स्थितः स्थिता महीतले काराप्य लं ततोभावी मैत्रेय इति सन्मुनिः गमिष्यसि ततो मोक्षमि
ति मां व्यास उक्तवान् आगतश्च ततश्चात्र वाहीकेभ्याति कृत्स्नतः इति ते कथितं सर्वं आत्मनश्चरि
तं मया पापमेवंविधं कष्टं नंदभद्र सदाव्ययः नदभद्र उ॰ अहो महाद्भुतं तुभ्यं चरितं येन मे हृदि

स्कं॰पु॰२ भयः शतगुणं जातं धर्मोयद्दृच्छमानसं किंतु लयोक्तधर्मस्य कर्तुकामो स्मितिः कृतं धर्मस्य रभवांस्तस्मात्
१०१ किंचिदादिशानिश्चितं बालउवा॰ अत्रतीर्थेवसप्ताहं निराहारःस्वहंस्थितः सूर्यमंत्राञ्जपिष्यामिवस्यामिवै
ततस्ततः ततोकर्करिकातीर्थे दग्धव्याहं लयातटे अस्थिनिसागरेचापिममक्षेप्यानिचात्रहि यदिसापदवं
चितं मयातीवतवास्तिचेत् ततस्तांगुरुकार्यार्थं मादेष्यामिश्रृणुधतत अस्मिन्बहूदके तीर्थे यत्रप्राणांस्त्य
जाम्यहं तत्रमन्नामचिन्हस्तं संस्थाप्याभास्करोविभुः आरोग्यंधनधान्यंचपुत्रदारादिसंपदः भास्करोभगवा
स्तुष्टोदद्यादितश्रुतेर्यचः सवितापरमोदेवः सर्वेस्त्वंवाहितजन्मनां वेदवेदांगगीतश्चतमेष्यनसदाभज ब
हूकमिदंकुंडं संसर्यंवसदालया महत्म्यमस्यवक्ष्यामि संक्षेपाद्व्याससत्रचितं बहूदकेकुंडवरे स्नातियो
विधिवन्नरः आरोग्यंधनधान्याद्यं तस्यस्यात्सर्वजन्मसु बहूदकेयस्नात्वाचसप्तम्यांमाघमासके दद्यात्
पिंडंपितृणांचतेक्षयांतृप्तिमाप्नुयुः बहूदकस्यतीरेचप्रेतानुद्दिश्यदीयते यत्किंचिदक्षयंतेषामुपतिष्ठेन
चान्यथा स्नानंदानंजपोहोमःस्वाध्यायःपितृतर्पणं कृतंबहूदकतटे सर्वस्यात्सुमहत्फलं लेयेतहृदिसं १०३
धार्यमहात्म्यंव्याससत्रचितं बहूदकस्यकुंडस्यनंदभद्रमहामते नारदउ॰ इत्युक्तभगवान्मौनी स्नात्वाकुंडत

तःशुचिः तीरेश्चस्तरमाश्रित्य स्वयंमंत्राञ्जजापच ततः सप्तसगत्वांते जहौबालोनिजानसन् संस्कारि
तोयथातं नंदभद्रेणब्राह्मणैः यत्रबालःसचप्राणाजहौजपपरायणः बालादित्यमितिख्यातं तत्रास्था
पयतप्रभु बहूदकेतुयःस्नात्वाबालादित्यंप्रपूजयेत् तस्यस्यात्भास्करस्तुष्टो मोक्षोपायंचविंदति नंदभद्रो
प्यथान्यस्यांभार्यायामपरान्सुतान् उत्पाद्यात्मसमानधामान्शिवसूर्यपरायणः रुद्रदेहंयथोपार्थपुनरावृत्ति
दुर्लभं एवमेतन्महाकुंडं बहूदकमितिस्मृतं अस्यतीरेस्वमंत्रेन चल्मीनाथःप्रमोक्ष्यति दत्तात्रेयस्ययोग
गीह्यचतोरोभविष्यति अर्चयित्वाचतं देवं योगसिद्धिमवाप्नुयात् पश्चिनाम्नश्चिमांमातिगोत्राणारणोह्यसौ
प्रभुः पश्चिमायांबुधसुतस्तथाक्षेत्रभारत पुरूरवादित्यमिति स्थापयामासपार्थिवः सर्वकामप्रदश्चा
सोभद्रादित्यसमोरवि बहूदकक्षेत्रसमंतस्यक्षेत्रंचभारत अस्यक्षेत्रस्यमहात्म्यं जप्तव्यं कर्णमूलके पुत्र
स्यचापिशिष्यस्यनकथंचनानास्तिके श्रृणोतीदंश्रद्धयायःतस्यतुष्येच्चभास्करः धारयन्हृदयेमोक्षंमुच्य
तेभवसागरात् इतिश्रीस्कंदपुराणेकुमारिकाखंडेबहूदकमहात्म्येपंचचत्वारिंशोध्यायः श्रीनारद
उवा॰ ततोमहास्यतीर्थस्यरक्षणायपुनर्जय समाराध्ययथोदेव्यःस्थापितानशृणुष्वमे यथातास्तर्वभूतेषु

DR. BHAU DAJI MEMORIAL

स्कं॰पु॰२ व्यापकः परमेश्वरः तथैवप्रकृतिर्नित्या व्यापकारमेश्वरी शक्तिप्रसादादाप्नोति वीर्यसर्वाश्च
संपदः ईश्वरास्सर्वमेतत्तु साचैवंपार्थसंस्थिता बुद्धी ह्रीः पुष्टिर्लज्जेति तुष्टिः शांतिः क्षमास्पृहा
३०२ श्रद्धाचचेतनाशक्तिर्मैत्रीसाहप्रकृद्भवाः इयमेवचबंधाय मोक्षायेयंच सर्वदा एवमाराध्यचैश्वर्यं
इंद्राद्याः समवाप्नुयुः येचशक्तिंनमन्यंते तिरस्कुर्वंतिचाधमाः योगींद्राअपितेव्यक्तं भ्रश्यंते का
सिजायथा वाराणस्यांकालपुरासिद्धयोगीश्वराःपुनः अवमन्यवतेशक्तिःपुनर्भंशमुपागताः
तस्मात्सदादेहिनेयंशक्तिःपूज्यैवनित्यदा तुष्टाददातिसाकामान् रुष्टासंहरतेक्षणात् परमाप्र
कृतिःसाचबहुभेदैर्व्यवस्थिताः सिद्धांबिकातुपूर्वस्यांस्थापितासागृहेनच जगदादेमलकेतरु
तन्त्रासाप्रकीर्त्यते आराधियेतोतःसिद्धेस्तस्मात्सिद्धांबिकापरा दक्षिणस्यांतथातारासंस्थितास्था
पितामया तारणार्थायदेवानांयस्मत्कूर्मसमाश्रिताः ययाविष्टःसमुद्धर्त्तुंवेदान्कूर्मोजगद्गुरुः
अनयाविष्टदेहश्च बुद्धोवैब्राह्मनिष्यति कोटिशोवेदमार्गस्यध्वंसिकान्पापकर्मभिः इयंमयास
माराध्यसामनीतागिरेःसितात् कोटिसंख्याभिरत्यग्रेदेवीभिःसंवृताचसा दक्षिणांदिशमाश्रित्यसं ३०२

स्थितामरणारयान् पश्चिमायांतथादेवीसंस्थिताभास्करा शुभा ययाविष्टोनिभाशक्तिर्भास्वराकुरु
नंदन मयाराध्यसमानीताकहादत्रसंस्थिता कोटिकोटिवृतानिसेत्रायतेपश्चिमोदिने उत्तरस्यांतथा
देवीसंस्थितायोगनंदिनी परमप्रकृतेर्देहापूर्वेनिसृतयायथा दृष्टादृष्टानिमेलया योगमायुश्चतु
सनाः योगीश्वरीचसादेवीसनकाद्यैस्तुतोषिता सोचाहांउकृटाद्धाम्नेसमाराध्याप्रापितायोगीनिभिः
परिवृतासंस्थिताचोत्तरांदिशं एवमेतामहाशक्त्याश्चतत्रसंस्थिताःसदा पूजिताःकामदानित्यं
रुष्टासंहरणक्षमाः ततश्चनवमेदुर्गाःसमानीताश्चणुष्वता त्रिपुरासाचपरमादेवीस्थाणुर्यथा
पुराः आविष्टस्त्रिपुरंनिसंभस्मलंजगदीश्वरः त्रिपुरेतिततस्तांच प्रोक्तवान्भगवान्हरः तुष्टावच
स्वयंतस्मात्पूज्यासाजगतामपि साचाराध्यसमानितामयामरोश्चपर्वतान् भक्तानांकामदासात्नि
मदादिक्षसमीपतः अपराचापिकालंबामहाशक्तिसनातनी कालरूपीयदाविष्टःकेशवश्चाज
हारगां तस्मात्साविष्णुनाप्रोक्ताकालंबेतिस्तुतार्चिता साचदेवीमयापार्थभक्तियोगेनतोषिता
वाराहगिरिसंस्थानांसमानीताचसाब्रवीत् यत्राहंनारदसदातिष्ठामिकृपयार्थिनां तत्रकूपनसंस्थ

स्कं·पु·२ यं रुद्राणीसंस्थितेनवै तंहि कूपंविनामर्त्यंनरतिर्जीर्यते क्वचित् तस्माद्भवान्कूपवरं स्वयमत्रखनद्विज ए
३९३ वमुक्तः पार्थदेव्यादर्भमूलेनमेतदा कूपोखनियत्र साक्षाद्रुद्राणी कूपआवभौ ततोमयातत्र देवास्त्वात्वाज्ञ
स्नायतर्पिताः पूजिता च ततो देवी प्रणतंमांतदाब्रवीत् परितुष्टा ततो देवी कोलंबा जगदीश्वरी सदात्रचाहं
स्थास्यामि प्रसादं प्रापिता त्वया ये च कूपेत्र संस्नाता मामाघाष्टम्यां विशेषतः पूजयिष्यंति मां मर्त्यास्तेषां चेस्या
मि दुःखं सर्वतीर्थमयो यस्मात् सर्वतुं कुवंनेस्थितः मेरोः समीपे रुद्राण्याः कूपएष सएव च प्रयागादपि संगा
या गयायाश्च विशेषतः कूपस्मिन्नधिकं स्नानं मया नारद कीर्तितं तदहं तव वाक्येन संस्थितात्र तपोधन गु
हनाथसरः पुण्यं पालयिष्याम्यतंद्रिता कुमारं ह्यं पूजयित्वा पूजयिष्यंति ये च मां देविभिः षष्टिकोटिभिर्युता
तस्यास्त्यभीष्टदा अत्रास्म्यमातालंदेवं गुप्तक्षेत्रस्य कारणं तीर्थयात्रावृत्तातेषां नार्चयंतीह त्वांचेय इदं च
य त्सरः पुण्यं त्वं नाम्ना ख्यातिमेष्यति ईश्वरी सरसोस्यत्वं तीर्थस्यास्य तथेश्वरी एवं दीर्घतपस्त्वस्त्वं स्थापिता
मयि का शुभा महादुर्गा नरैस्तस्मात् पूज्येयं सततं बुधैः तृतीये च दिशि त्वस्यां स्थिता संस्थापिता मया गुहेन ३९३
चक्रपालेश्वराः प्रभी वास्याः पुरोततः धन्यास्ते ये प्रपश्यंति नित्यमेनां नरोत्तमः कपालेश्वरमभ्यर्च्य विश्वशक्ति रि

यंततः एवमेतास्तिस्रो दुर्गाः पूर्वस्यां दिशि संस्थिताः पश्चिमायां प्रवक्ष्यामि स्तोदुर्गा महोत्तमाः सुवर्णाक्षितया
देवी ब्रह्मांडपरिपालिनी समाथात्र समाराध्य तीर्थं देविनिवेशिता एवं तां प्रणमिष्यंति पूजयिष्यंति भक्तितः
त्रयस्त्रिंशच्च कोटिभिर्देवीभिः पूजिता चैते अपरा च महादुर्गा चर्चिता येति संस्थिताः रसातलतलात्साऽत्र म
यानीता सुभक्तितः इयमार्याचर्चिता चाविरत्वं समभीप्सुभिः बहुभिर्देवदैतेयैर्देत्यैश्च वीरतां इयमेव म
हादुर्गा श्रूद्रकं वीरसत्तमं चौरैर्बद्धं कलौ चाग्रे मोक्षयिष्यति विक्रमात् ततस्तेतां समाराध्य वीर्यकामैर्नरैः स
दा चर्चिता या महादुर्गा पश्चिमायां दिशि स्थिता तथा त्रैलोक्यविजया तृतीयास्यां दिशि स्थिता ऐंद्रत्वमवाप्स्य
सि नि हनिष्यति चाक्रम्य कालेनानमुखान्रिपून् तस्मादियं समाराध्य वी × यामाराध्य जयं प्राप्य त्रिलोक्यां रो
हिणीपतिः सोमं लोकान्मया नीता पूजिता जयदा सतां एवमेताः पश्चिमायामुत्तरस्यामतः शृणु तिस्रो देव्यः श्रे
त्तरस्यामेकवीरा मुख्याः स्थिताः एकवीरेति या देवी साक्षात्सा शिवपूजिता ययाविष्टो जगत्सर्वं संहरत्येष भूत
राट् वीर्येणत्यैकवीरा या कृत्वा लोकांश्च भस्मसात् मुखेकद्दश पूर्णे सेवित्वक्षोभ तु भस्मनि एवं विधा त्वेकवी
रा नाकिरपासनातनी पूजिताराधिता चैव सा सर्वाभीप्सितार्थदा ब्रह्मलोकात्समानीता मयाराध्या त्र भारत ना

स्कं॰पु॰ मकीर्तनमप्यस्या दुष्टानां घातनं विदुः द्वितीया हरसिद्धाख्या देवी दुर्गा महाबला सिकोत्तरा समा
राध्य मयानीता त्र पांडव यदाशीकोनरस्तेन पार्वत्या प्रार्थितेन च रुद्रेण डाकिनीमंत्र प्रोक्तो देव्याः रू
३९४ पालुना तदा मंत्रस्वभावेन मोहिता गिरिजा सती तेन वाक्यमांसं च त्राणि तेन भवं पपौ ततो रुद्र
शरीरात्तु विनिक्रांता तिनामिनी अहं सिद्धिर्महादुर्गा महामंत्रविशारदा सा सहस्रभुजा देवी समा
क्रम्याभिपीड्य च मोक्षयामास गिरिशं मशापयत तां तथा ततः प्रभृति सा लोके हरसिद्धिप्रकीर्त्यते दे
वीनां षष्टिकोटिभिरावृता पूज्यते सुरैः एतामाराध्य सुग्रीवप्रमुखा दोषनाशकाः अभवंस्तु महावी
र्या डाकिनीसंघनाशकाः तस्मादेतां पूजयेत्तु मनोवाक्कायकर्मभिः डाकिन्या ध्यानसंप्रीति हरसिद्धे
रनंतरं तृतीयस्थाने कोणस्थाचंडिका नवमी स्थिता वागीशोपि लभेत्पारं नैव यस्याः प्रवर्णने यापु
रा पार्वती देहाद्विनिःसृता महासुरैः चंडमुंडौ निहत्यैव भक्षयामास क्रोधतः अक्षौहणीतंत्रा लेकं चं
डमुंडौ च ता वुभौ नापूर्यत ग्रहासास्या विलक्ष्याप्यालिर्यं हिसा द्रुयमेवांधकानां च तृषितात्राणि तं ३९४
पुनः पापौ तानि जग्राह चांधकं भगवान्भवः द्रुयं च रक्तबीजानां कुलापानं च रक्तजं अर्पयामास तं

देव्या चामुंडा पितत्रशोषितं एषात्यल्पातिभक्तानां प्राणामेनापि भारत अर्बुदानां च कोटिभिर्दैत्यानां
पापकर्मणां कुंडं चास्यामयोदेव्याः पुण्यं निष्पादितं शुभं यत्र वै स्पर्शमात्रेण सर्वतीर्थफलं लभेत् ह
रसिद्धिर्देहसिद्धिर्धर्मसिद्धिश्च भारत त्रिविधा प्राप्यते सिद्धिस्तीर्थस्मिंश्चंडिकारिते: यश्च पूजय
ते देवीं स्वल्पेन बहुनापि वा कात्यायनी कोटिशतचत्वांतस्य विभूतिदा एवमेतन्महादुर्गा नवतीर्थे
त्र संस्थिता चतस्रश्चापि दिग्देव्यो नित्यसमर्थाय ताः शुभाः अश्विनस्य च माघस्य नवरात्रे विशेषतः
उपोष्यैकभक्तैर्वा देव्यास्ताः प्रपूजयेत् बलिपूपकनैवेद्यैस्तर्पणे धूपगंधिभिः तस्य रक्षां चरंत्य
तारथ्यासु त्रिकचत्वरे भूतप्रेतपिशाचाद्या नोपकुर्युः प्रपीडनं आपदो विद्रवंत्याशु याग न्यानं द
र्यति तं पुत्रार्थी लभते पुत्रान् बंधो मुच्येत बंधनात् आसां यः कुरुते भक्तिं नरो नार्यश्च श्रद्धया स
र्वान्कामानवाप्नोति यश्चिंतयति चेतसि कामगस्तु मोदेभ्यश्चिंतामणिनिभास्तथा कल्पवत्लोकभ
क्तानां प्रतिष्ठं दोषघ्नानिह तथाव भूतमातास्ति हरसिद्धेः सुदक्षिणे तस्य माहात्म्यमतुलं संक्षेपात्प्र
ब्रवीमि तं पूर्वं किल गुहा विद्वान्पुण्यसारस्वते तटे भूतप्रेतपिशाचानामधिराज्यमभिषिच्यते स च

स्कं॰पु॰७ सर्वाणि भूतानि मर्यादायामधारयत् एतदेनं प्रदत्तेव कृपया भगवान्गुह यस्मंत्र कृतं किंचिद्वचाद्यं
चयत्कृतं अश्रद्धया च कोपेन तद्वृत्तं पैशाचं भविष्यति ततस्तेनेन भोगेन तानि निंदति कृत्स्नशः ततः केनापि
१९५ कालेन अश्रद्धयाश्रद्धया कृतं पुण्यं तानेव भूतानि प्रसंसाक्रम्य देवताः ततो देवाः क्षुधार्तास्ते गुहायैतन्न्य
वेदयत् स चैतदाकर्ण्य क्रुधः गुहः कालाग्निरिवाभवत् तस्य क्रुद्धस्य भूमध्यमध्यात्काचिद्विनिर्गता ज्वालामाला
स्तु दुर्दर्शा नारी दृष्ट्वा रक्तलोचना सा च प्रणम्य तं प्राह कृतवाक्यकिरहं प्रभो शीघ्रमादिश मां कृत्सं किं करोमि त
वाक्षितं स्कंद उ॰ भूतैर्भूतैर्गणैः पापैरुल्लंघ्याम मत्प्राशनं मनुष्यदत्तं सकलं भुज्यते स्वेच्छया धमे शीघ्रेम
तानि त्वं तस्मान्मर्यादायामुपानय एतास्त्वां तु प्रेजिष्यंति देव्य कोटरकांतं शुभे ततस्तथेति सा चाप्लकाद्देवीभिः
संवृता तदा मयूरं समास्थाय गुहशक्तिसमागताः त्रिरोभुवनमासाद्य भूतसंघानपश्यत जघान च स
मासाद्य देवीनां नानाविधायुधैः ततः प्रेतपिशाचाद्या हन्यमाना महारणे प्रसादयंति तां देवीं नानावरैः सुदी
नवत् केचिद्ब्राह्मणवेशाश्च तापसानां तथोक्तिभिः नृसंतो देवि पय्याशि प्रसीदेति पुनः पुनः ततः प्रसन्ना १९५
सा देवी ब्रियतां स्वेच्छयाहितान् ते च प्रोचुस्प्राणिनस्त्वं भूतमाता भवेश्वरी मर्यादां नैव लक्षामो वयं स्कंदविनिर्मि

तां येचैवं त्वां तोषयंति तेषां देहि वरान्सदा श्रीदेव्युवाच वैशाखे दर्शदिवसे ये चैवं तोषयंति मां अरिष्टाभ
रणापुण्यैर्दधियुक्तैश्च भोजनैः तेषां सर्गोपसर्गा वै यास्यंति विपुलं स्फुटं एवं दत्वा वरं देवी मुमुदे भूतसंवृता
एवं प्रभावा सा देवी मायानी तात्र भारत ये चेमां प्रणमन्मर्त्याः सर्वारिष्टैर्विमुच्यते एवं प्रभावाः परिकीर्तिता
मया समासतस्तीर्थवरे च देव्यः चतुर्दशी वार्जुन पूजयाच चतुर्दशस्थानवरेष्टमुख्यैः इतिश्रीस्कंदपुरा
णे कुमारिकाखंडे देव्यापाख्यानं सप्तचत्वारिंशोध्यायः श्रीनारद उवाच अथ ते संप्रवक्ष्यामि सोमनाथ
मिह स्फुटं श्रणुयं कीर्तयिष्यामि पापमोक्षमवाप्नुते पुरा वै तायुगपार्थ गोदेवासमुद्भवौ कुर्वयं तश्च प्राल
योवित्रावास्तां महाद्युत तावेकदा पुरा पार्थ श्लोकमेकमपश्यतां तां दृष्ट्वा सर्वशास्त्रज्ञौ आस्तां कष्टफितस्तयो
प्रभासाद्यानि [illegible] तीर्थानि पुलस्त्याय हपस्त्रभूः नचैवात्र प्लुतं येन वा किंस्तीर्थमुपासितं इति श्लोकं पवि
त्रां तां पुनः पुनरभिष्टुतं तदर्थं च प्रभासार्थिनिःसृतौ स्नातुमुत्तमौ तौ च नानि नदीश्चैव व्यतिक्रम्य शनैः शनैः
महर्षिगणसंकीर्णामुत्तीर्णौ नर्मदां शिवां गुप्तक्षेत्रस्य माहात्म्यं महीसागरसंभवं तत्र श्रुत्वा प्रभासाय त
न्मध्यनमतस्थतुः ततो मार्गस्य श्रांतौ क्षुधापीडितौ भृशं आस्तां विचेतनौ विप्रासिद्धलिंगसमीपतः

स्कं॰पु॰२ मिसनाथं नमस्कृत्य संप्राप्तौ तौ सुधैर्यतः क्षुधावेगेन तीव्रेण तृषाभ्याऽर्कतापितौ सहसा पतितौ भू
मौ तेन पादौ विमूर्छितौ ततो मुहूर्तात्संलिय उर्जयंतमभाषत किंचिद्धिश्वस्य धैर्याच्च सर्वं वेकिं नश्रु
३०८ तं स्वया यथा यथा विवर्णांगो जायते तीर्थयात्रया तथा तथा भवद्दीन दीनः सोमेश्वरो हरः तथास्वांग
दमानौ वां वेव सुकृतेन वश्रुतं लुठमानौ जगामैव प्रायेऽलं किंचिदंतरे उच्छितं सहसा लिंगं भूमिं भित्वा
सुदुर्दृशी खवाणी चाभवत्तत्र पुष्पवर्षपुरःसरा प्रालेयत वहे तौ स्तु सोमनाथसमं फलं उच्छितं
सागरतटे लिंगं तिष्ठात्र सुव्रत प्रालेयउ॰ यद्येवं सलभेत च यथाप्यस्मात्प्रकल्पिताः प्रभासाय प्र
यातव्यं यदा मसोमयास्फुटं ततश्चैवार्जयंतोपि मूर्छां भावाद्धुवन्पुनः अपश्यदुच्छितं लिंगं सर्वं वं
प्रत्यपद्यते ततः प्रत्यक्षतां प्राप्तो मवश्यं केतयोर्हरः दृश्यते नूतयोर्यानौ प्रभासं निविपस्यच ता व
तौ सोमनाथो ह्युसिद्धेश्वरसमीपतः उर्जयंतः प्रतीच्यां च प्रालेयस्येश्वरोपरः सोमकुंडं त्रानवीपिस्ता
त्वार्णवमहीतले सोमनाथद्वयं पश्येज्जन्मपापात्प्रमुच्यते ब्रह्मा न स्थापयित्वात्तु हाटकेश्वरसंज्ञि ३०६
तं महीनगरके लिंगं पातालात्सुमनोहरं तुष्टाव देवप्रयतस्तुतिं तां शृणु पांडव नमस्ते भगवान्रु

द्र भास्करामिततेजसे नमो भवाय रुद्राय रसायांबुमयाय ते शर्वाय क्षितिरूपाय सदा सुरभिणे
नमः ईशायवायवे तुभ्यं संस्पर्शाय नमो नमः पशूनां पतये चापि पावकायातितेजसा भीमाय व्यो
मरूपाय शब्दमात्राय ते नमः महादेवाय सोमाय अमृताय नमोस्तु ते उग्राय यजमानाय नमस्ते क
र्मयोगिने इसेवनाम भिर्दृष्यैः स्तोत्रमेतदुदीरितं यः पठेच्छृणुयाद्वापि पितामहकृतं स्तवं हाटके
श्वरलिंगस्य नित्यं संप्रयतो नरः अष्टमूर्तेः स सायोज्यं लभते नात्र संशयः हाटकेश्वरलिंगस्य प्र
यतो यः स्मरेदपि तस्यस्याद्दूरदेशस्थाते नेदं स्थापितं त्वय एवं विधानि तीर्थानि महीसागरसंग
मे बहूनि संति पुण्यानि संक्षेपाद्वर्णितानि मे इति श्रीस्कंदपुराणे कुमारिकाखंडे स्तंभतीर्थमहात्म्ये
अष्टचत्वारिंशोध्यायः ४८ अर्जुन उ॰ असंख्यातानि तीर्थानि लिंगानि च महामुने श्रुत्वा तव मु
खांभोजाद्धृष्टं मे तुष्यते मनः महीनगरकस्यापि स्थापितस्य त्वया मुने यानि तीर्थानि मुख्यानि तानि
वर्णय मे प्रभो श्रीनारद उ॰ श्रीमन्महीनगरके यानि तीर्थानि फाल्गुन तानि वक्ष्यामि यत्रास्ते जया
दित्यो रविप्रभुः जयादित्यस्य यो नाम कीर्तयेदिह मानवः सर्वरोगविनिर्मुक्तो लभते सोपि हृदीप्सितं

स्कं·पु·२ यस्य संस्पर्शनादेव कल्याणैरपि पूर्यते मुच्यते चाप्यकल्याणैश्चाप्यबान्यार्थमानवः तस्य तीर्थस्य चोत्पत्तिं
शृणु तीर्थं वदामि ते शृण्वन्वा कीर्तयन्वापि प्रसादं भास्करालभेत् अहं संस्थाप्य संस्थानमेतत्कालेन केनचित्
१९७ प्रयातो भास्करं लोकं दर्शनाय यदृच्छया समां प्राणतमासीनमभ्यर्च्यार्घेण भास्करः प्रहसन्निव प्राहेदं
देवो मधुरया गिरा कुत आगम्यते विप्र क्व च वा प्रतिगम्यते क्व चार्यं नारद मुने कालस्ते विहृतो भवत्
श्रीनारद उ· एवमुक्तो भास्करेण प्रत्यवोचं वचस्तदा भारते विहृतः खंडे महीसागरकादपि द र्शनार्थं ते
व विभो समायातोस्मि भास्करः रविरुवाच यत्त्वया स्थापितं स्थानं तत्रेयसंति ब्राह्मणाः तेषां गुणान्मम ब्रूहि
किं गुणा ननु ते द्विजाः श्रीनारद उ· एवं दृष्टो भगवता पुनरेवाब्रुवं वचः यदि तान्भो प्रशंसामि स्थायान्स्तौ
ति वाच्यतां निंदाम्यनर्हान्कस्माद्वा कष्टमेवोभयत्र च अथ वा परमाहात्म्यसंतितेषां महात्मनां अल्पं कृते व
र्णने स्याद्दोष एव महान्मम मदर्चितद्विजं द्राणां यदि स्यादुर्वणेप्सिता ततः स्वयं विलोक्यास्ति गत्वेदं मे मतं
रवे इति श्रुत्वा मम वचो रविरासीत्सुविस्मितः स्वयं द्रक्ष्यामि चोवाप्रर्थानिर्णय धरो धमि जटा त्रिषवण १९७
स्नानपिंगलां धारयन्नथ द्विधि द्विजो महातेजा ददर्श ब्राह्मणोत्तमम् ततो हारीतप्रमुखाः प्रहर्षोत्फुल्ललोचनाः

उत्थाय ब्राह्मणं शालायास्ते द्विजा द्विजमाद्रवन् नमस्कृत्य द्विजाग्र्यं ते महर्षादिदमब्रुवन् अद्य नो दिवसः पुण्यः
स्थानमेतोत्तमं त्विदं यत्त्वया विप्र प्रवर स्वयमागमनं कृतं धन्यस्य हि गृहस्थस्य रूपेषु द्विजोत्तमाः अ
तिथ्यो वषणायांति पावनार्थं न संशयः तत्वं गेहानि चास्माकं पादचंक्रमणेन च दर्शनाच्च जनास्थाना दस्मा
भि सह पावय अतिथिरुवाच भोजनं द्विविधं विप्रा प्राकृतं परमं तथा तदहं सम्यगिच्छामि दत्तं परमभोज
नं उ सेत इति श्रुत्वा हारितः पुत्रमब्रवीत् अष्टवर्षं तु कमठं वेत्सि पुत्र द्विजोत्तमं कमठ उ· तात प्रण
म्य तां वक्ष्यामि परमभोजनं द्विजं च तर्पयिष्यामि दत्त्वा परमभोजनं सुतेन किल जातेन जायते च नृणः
पिता ससंकरिष्यत्वद्वाक्यं संतर्प्यातीर्थमुत्तमं भोजनं द्विप्रकारं च प्रविभागस्तयोरयं प्राकृतं प्रोच्यते
तेव मन्य परमभोजनं तत्र तत्प्राकृतं नाम प्रकृति प्रमुखस्य तत् चतुर्विंशति तत्त्वानां गणस्यात्र हि तर्पणं
षट्रसं भोजनं तच्च पंचभेदं वदंति च येन भुक्तेन तृप्तस्याशुत्वं यो देहलक्षणं तथापरं परं नाम प्रोक्तं
परमभोजनं परमः प्रोच्यते चात्मा तस्य तत् भोजनं भवेत् ततो नानाप्रकारस्याधमस्य श्रवणं भवेत्
मनसे वप्रन्नास्यामु प्रश्नमेनमथाकरोत् कथं संजायते जंतुः कथं वापि प्रलीयते भस्मतामथ संप्राप्य क्व

MEMORIAL

स्कं·पु·२ चार्यं प्रतिपद्यते कमंडलु· गुरवेप्राज्ञमस्कृत्य धर्मायतद्नंतरं ॐ दागीतमम प्रश्नं ज्ञात्वा वक्ष्या
मितेद्विज जनेनत्रिविधंकर्म हेतुर्जंतोर्भवेत्किल पुण्यंपापंचमिश्रंच ज्ञात्वावक्ष्यामितेद्विज सत्वरा
१९८ जसतामसं तत्रयःसात्विकोनाम सस्वर्गंप्रतिपद्यते स्वर्गात्कालपरिभ्रष्टो धनीधर्मी सुखीभवेत्
अथायस्तामसोनाम नरकंप्रतिपद्यते भुक्त्वाबह्वीर्यातनाश्च स्थावरत्वंप्रपद्यते महतांदर्शनस्प
र्शरूपभोगसहासनैः महताकालयोगेन संसारेमानवोभवेत् सोपिदुःखैर्द्रारिद्र्यैर्विशिष्टोविकलें
द्रियः प्रत्यक्षःसर्वलोकानांपापस्यतद्विलक्षणं अथवामिश्रकर्माण्यात्तिर्यक्त्वंप्रतिपद्यते म
हतामवसंसर्गात्संस्मरान्मानवोभवेत् यस्यपुण्यंपृथुतरंपापमल्पंहिजायते सपूर्वंदुःखितोभू
त्वापश्चात्सौख्यान्वितोभवेत् पापंपृथुतरंयस्यपुण्यमल्पतरंभवेत् पूर्वंसुखीततोदुःखीमिश्रा
स्यतद्विलक्षणं तत्रमानुषसंभूतिंशृणुयादृगसौभवेत् पुरुषस्यस्त्रियाश्चैवशुक्रशोणितसं
गमे सर्वदोषविनिर्मुक्तोजीवःसंसरतेस्फुटं गुणान्वितःसतन्मात्रोमनोबुद्ध्यहमन्वितः जीवः १९८
प्रविष्टोगर्भंतुकलिलेप्रतितिष्ठति मूढश्चकलिलेतत्रमासमात्रेचतिष्ठति द्वितीयंतुतथामासं

घनीभूतःसतिष्ठति तस्यावयवनिर्माणंतृतीयेमासिजायते अस्थीनिचतथामासिजायतेचच
तुर्थके त्वंजन्मपंचमेमासिषष्ठेरोमसमुद्भवः सप्तमेचतथामासिभूःशमुद्विजेततः जरायुणा
विष्टितांगोमुखबद्धकरांगुलिः मध्येक्लीबस्तुवामेस्त्रीदक्षिणेपुरुषस्तथा तिष्ठत्युदरभागेचपृष्ठे
रभिमुखःकिल यस्यांतिष्ठत्यसौयोनौतांचवेत्तिनसंशयः सर्वंस्मरतिचत्तंतंबहूनांजन्मनामपि
अंधेतमसिक्लिष्टश्यागंधान्माहंद्वद्वंभवेत् शीतमात्रजलपातेशीतमुष्णेतथोष्णके व्यापोमल
भेतमातुक्लेशंव्याधिश्चैवधनो अलक्षापित्तमातृभ्यांजायतेव्याधयःपुराः सौकुमार्याभुक्तंतीव्राज
नेजीतिचतस्यते स्वल्पमप्यथतंकालंवत्तिवर्षशतोपमं संतप्यतेभृशंगर्भकर्मभिश्चपुरातनैः म
नोरथांश्चकुरुतेसुकृतार्थंपुनःपुनः जन्मचेदहमाप्स्यामिमानुष्यजीवितंतथा ततस्तत्प्रकरिष्यामि
येनमोक्षोभवेत्स्फुटं एवंतुचिंतमानस्यसीमंतोनयनादनु मासद्वयंतद्भृतातिपीड्यतेस्त्रियुगा
कृतिः ततःस्वकालेसंपूर्णेसूतिमारुतचालितः भवसवानुरवाजंतुपीडामनुभवत्परां अधोमुखः
संकटेनयोनिद्वारेणनिःसरेत् पीडयापीड्यमायातिचर्मोत्कर्तनतुल्यया करपत्रसमस्पर्शंकरसंक

स्कं॰पु॰ स्यनादिकं असौ जातो विजानाति मासमात्रे विमोहितः प्राक्कर्मवशाग स्यास्य गर्भज्ञानं न पश्यति ततः कृ
शोतिकर्माणि श्वेतरक्तासितानि च अस्थिपद्दत्त लास्तंभस्नायुबंधनयंत्रितं रक्तमांसमृदालिप्तं विण्मूत्र द्र
३९९ व्यभाजनं सप्तभीतिसुसंबंधं छन्नं रोमतृणैरपि वदनैकमहाद्वारं गवाक्षाष्टविभूषितं तु ह्रद्वयकपाटं चदं
तार्गलविमुद्रितं नाडिश्चेद प्रवाहं च कफपित्तपरिप्लुतं जराशोकसमाविष्टं कालवक्त्रानलस्थितं रा
गद्वेषादिभिर्ध्वस्तं शार्दूकोशकसमुद्भवं एवं संज्ञायते पुंसो देहं गेहमिदं द्विजः यस्मिन्वसति क्षेत्रज्ञाग्र
हस्थाबुद्धिगहिभिः मोक्षं स्वर्गं च नरकं मास्तं संसाधयन्नपि इति श्री स्कंदपुराणे कुमारिकाखंडे नवच
त्वारिंशोध्यायः ४९ अतिथिरुवाच साध्वबालमते बाल कर्म हेतलयोच्यते शरीरलक्षणं श्रोतुं पु
नरिच्छामि तद्वद कमठउवाच यथैवतद्ध्ब्रह्मांडं शरीरं च तथोच्यते पादमूलं च पातालं प्रपदं च रसात
लं तलातलं तथा गुल्फौ घें जे चास्य महातलं जानुनी सुतलं चोरू वितलं चातलं स्मृतं नाभिर्महीतलं
प्राहुर्भवो लोकमथोदरं उरस्तलं च स्वर्लोकमहर्ग्रीवां मुखं जनं नेत्रे तपः सत्यलोकः शीर्षदेशो वदंति च ३९९
नव यथा सप्त द्वीपानि पृथिव्यां संस्थितानि च यथात्र धातवः सप्त नामतस्तानि बोधमे त्वगसृग्मांसमेदोस्थि

मज्जाशुक्राणि धातवः अस्थमत्र शतानि स्युस्त्रीणि षष्ट्याधिकानि च त्रिंशच्छतसहस्राणि नाडीनां कथि
तानि च षट्पंचाशत्सहस्राणि तथान्यानि नैव तु ताव हंति रसं देहे जलं नद्यो यथा भुवि सार्धा भिस्तिस्रभि
श्च कोटीभिः समंताद्रोमकोटिभिः शरीरं स्थूलसूक्ष्माभिर्दृश्यादृश्याहिताः स्मृता षडंगानि प्रधानानि कथ्यमानानि
मे शृणु द्वौ बाहू सक्थिनि द्वे च मूर्धा जठरमेव च अंत्राण्यत्र तथा त्रीणि सार्धव्यामात्रयाणि च त्रिव्यामाणि तथा
स्त्रीणां माहुर्वेदविदो द्विजा ऊर्ध्वनालमधोवक्त्रं हृदि पद्मं प्रकाशितं हृत्पद्मवामतः प्लीहा दक्षिणस्मात्तथा य
कृत मज्जातो मेदसश्चैव वसायाश्च तथा द्विज मलस्यैव पित्तस्य श्लेष्मणः सकृतस्तथा रक्तस्य च रसस्या
त्र गताः शीजलयं स्मृतः तेभ्यः प्रवर्तमानास्ते देहं संधारयंत्युत शिवन्यश्च तथा सप्त पंच मूर्धानमाश्रिताः
एकं मेढ्रगतां चैका तथा जिह्वागता द्विज नाड्यः सर्वाः प्रवर्तंते नाभिपद्मात्तथात्र च यासां श्रेष्ठाः शिरो या
तासु षम्ना चाति पिंगला नासिकाद्वारमासाद्य संस्थिते देहवर्द्धने वायुरग्निश्च द्रमाश्च पंच धा पंच धात्र च
प्राणापानसमानश्च उदानो व्यान एव च पंच भेदाः स्मृता वायोः कर्माण्येषां वदंति च उच्छ्वासश्चैव निश्वासो
ह्यन्नपानप्रवेशनं आकंठशीर्षसंस्थश्च प्राणकर्म प्रकीर्तितं सोगाविण्मूत्रशुक्राणां गर्भमिश्रवर्ण तथा

स्क.पु.२ अपानकर्म निर्दिष्टं स्थानमस्य गुदोपरि समानो धारयत्यन्नं विवेचयति चाप्यथ रससत्ते च च
रति सर्वश्रोणेष्वारितः वाक्प्रवृत्तिप्रयत्नोर्जप्रयत्ने सर्वकर्मणां आकण्ठमुरस्स्थानमुदा
२०० नस्य प्रकीर्तितं व्यानो हृदि स्थितो नित्यं तथा देहचरोऽपि च धातुवह्निप्रदश्चैव लालाभेषानि
मपकृत पावको रंजकश्चैव साधकालोचकौ तथा भ्राजकश्च तथा देहे पंचधा पावकः स्थितः
पावकस्तु पचत्यन्नं नित्यं पक्वाशये स्थितः आमाशयस्थश्च रसं रंजकः कुरुते त्वसृक् साधको
हृदि संस्थश्च बुद्ध्यादुत्साहकारकः आलोचकश्च दृक्स्थोऽसौ रूपदर्शनशक्तिकृत त्वक्संस्थो भ्रा
जको देहं भ्राजयन्निर्मलीकृतः क्लेदको बोधकश्चैव तर्पणश्लेष्मणस्तथा आलंबकस्तथा देहे पंच
धा सामउच्यते क्लेदकः क्लेदयत्यन्नं नित्यं पक्वाशये स्थितः बोधको रसनास्थश्च रसानामवबो
धकः शिरस्थश्चक्षुरादीनां तर्पणात्तर्पणः स्मृतः सर्वसंधिगतश्चैव श्लेष्मणाश्लेष्मकृत्तथा
उरस्थः सर्वगात्राणि आलंब्यालंबकः स्थितः एवं वाय्वग्निसोमैश्च देहः संधारितस्त्वसौ आकाश २००
जानि श्रोत्राणि तथा कोष्ठविविक्तता पार्थिवानि हि जानीहि घ्राणं काठिन्यकानि च अस्थिनि धैर्यगुरुता

त्वग्मांसं हृदयं गुदं नाभिर्मेदः पक्वमज्जा अंत्रमामाशयः शिराः स्नायुः पक्वाशयश्चैवं प्राक्तैर्देवि
दो द्विजाः नेत्रयोर्मंडलं शुक्लं कफाद्भवति पैत्तिकं कृष्णं च मंडलं वातात्तथा भवति मातृकं पक्ष्मम
डलमेकं तु द्वितीयं वर्त्ममंडलं शुक्लं तृतीयं कथितं चतुर्थं कृष्णमंडलं दृङ्मंडलं पंचमं तु नेत्रस्यास्य
च मंडलं अपरे नेत्रभागेऽपि उपांगापांग एव च उपांगो नेत्रपर्यंतो नाशामूलमुपांगतः वपेणाच
तथा प्रोक्तो मेदः स्कंदकफमांसकैः असृग्मांसमयी जिह्वा सर्वेषामेव देहिनां हस्तयोः पादयोर्मेद्र
ग्रीवायां षड्कूर्चता एवमत्र स्थितो जीवो देहस्मिन्सप्तसप्तकैः पंचविंशतिको व्याप्य देहं वागस्य
मूर्धनि त्वगसृक्मांसमित्याद्यसृक्मातृसमुद्भवं मेदोमज्जास्थिकं प्रोक्तं पितृजं बस्यकौशि
कं एवं भूतमयं देहं पंचभूतसमुद्भवं अन्नैर्यथाग्निमिलितं देहं वर्णयामि ते तदन्नं पिंडकवले
ग्रासं भुक्तं च देहिभिः पूर्वं स्वप्नाशये वायुः प्राणः प्रकुरुते द्विधा समप्रविश्यान्नमध्ये तु पृथगन्नं पृथ
क्जलं अग्नेरूर्ध्वं जलं स्थाप्य तदन्नं तु जलोपरि जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः
वायुनाध्मायमानोऽग्निरत्युष्णं कुरुते जलं तदन्नमुष्णतोयेन समंतात्पच्यते पुनः द्विधा भवति तत्सकिट्ट

स्कं॰पु॰२ थक॰कीटं पृथग्रसं मलेङ्गीदशभिः कीटं भिन्नं देहाद्बहिर्व्रजेत कर्णाक्षिनासिकाजिह्वादंताःशस्नेगुदंन
खाः रोमकूपाणि चैवस्यु द्वादशैते मलाश्रयाः हृत्सद्मप्रतिबद्धाश्च सर्वा नाड्यः समंततः तासां मुखे तु तं स
२०३ सूक्ष्मं व्यानं स्थापयते रसं रसेनैतेन ता नाड्यः समानः पूरयेत्पुनः ततः प्रयाति संपूर्णा व्याप्य देहं समंततः
ततः स नाडिमध्यस्थः शरीरजेन कोष्मणा रसः पच्यते पच्यमानस्तु रुधिरत्वं भवेत्पुनः ततस्तु क्लोममेदश्च मां
संशायुशिराशिस्थि च नखा मज्जा रवं वैमाल्यं शुक्रं च षड्भिः क्रमाद्भवेत एवं द्वादशधान्नस्य परिणामः प्रकीर्त्यते
एवमेतद् द्विनिःपन्नं शरीरं पुण्यहेतवे यथैव स्यंदनः शुभ्रो भारसंहायनाय च तैलाभ्यंगादिभिर्यत्नैर्बंधु
भिः पाल्यते नवा किं कुर्संसाध्यते तेन यद्भारं वहेन्नहि एवमेतेन देहेन किं कुर्संभोजनाद्यैः वर्धितेन
चेत्पुण्यं कुरुते पश्चात् वञ्चितः भवंति चात्र श्लोकाः यस्मिन्काले च देशे च वयसा यादृशेन च कृतं शुभाशु
भं कर्म तत्तथा तेन भुज्यते तस्मात्सदा शुभं कार्यमविच्छिन्नसुखार्थिभिः छिद्यते यथा भागाग्नीप्सि कृसारि
ते यथा तस्मात्पापं न दुःखानि तीव्राणि स्युर्बहून्यपि तस्मात्पापं न कर्तव्यमात्मपीडाकरं हितं एवं तवर्णितः २०३
साधो प्रश्नार्थं शास्त्रतामया यथा संजायते प्राणी यथा श्रेष्ठप्रलीयते आयुष्य कर्मणि क्षीणे संप्राप्ते मरणे नृणां

स्वकर्मवशगो देही कृष्यते यमकिंकरैः पंचतन्मात्रसहितः समनोबुद्ध्यहंकृतिः पुण्यपापमयैः पाशैर्ब
द्धो जीवस्तजेद्वपुः शीर्षणः सप्तभिश्छिद्रैर्निर्गच्छेत्पुण्यकर्मणां अधश्च पापिनां याति योगिनां ब्रह्मरंध्रतः
तत्क्षणात्सोप्यगृह्णाति शरीरं चातिवाहिकं अंगुष्ठपर्वमात्रं तु स्वप्राणैरेव निर्मितं ततस्तस्मिन्स्थितं जीवं देहे
यमभटास्तदा बध्वा नयंति मार्गेण याम्येनातियथाबलं अंबरीषाभे वत्र भ्रष्टाः अयोगुडनिभे दच प्रतप्तासि
केनेनापि ताम्रपत्रनिभेन च षडशीतिसहस्राणि योजनानां महीतलात कृष्यमाणो यमपुरीं नियंते पाप
कृतभटैः क्वचिच्छीतं महादुर्गमंधकारं क्वचिन्महत् अग्निसंस्पर्शनदैनेकाककाकाजबुंबुके मक्षिकादंश
मशकैर्भक्षितसर्पवृश्चिकैः भक्ष्यमाणोपि तैर्जंतुः कंदतां म्रियते नहि क्वचिच्च भक्ष्यते घोरो राक्षसैः कृष्यते ऽस्य
ते दह्यमानोतिघोरेण शिशिकृतेन चनीयते मुहूर्ते दशभिर्याति तं मार्गमतिदुस्तरं तत्कालं सुममं द्विति
पुरुषावर्षसंमितं तार्यते च नदीं घोरां पूयशोणितवाहिनीं नदीं वैतरणीं नाम केशशैवलशाद्वलां
ततो यमस्य पुरतः स्थाप्यते यमकिंकरैः पापी महामयं पश्येत कालांतकमुखेवृतं पुण्यकर्मा सौम्यरूपं
धर्मराजं तदा किल मनुष्या एव गच्छंति यमलोकं न चापरे मरणानंतरं तेषां जंतूनां योनिपूरणं तथाहि

स्कं·पु·२ प्रेतामनुजाः श्रूयंते नान्यजंतवः धार्मिकः पूज्यते तत्र पापः पाश्यगलो भवेत् धार्मिकश्चयथा
याति तं मार्गं चाभियच्छते आराम द्रुम दातारः फलपुष्पवतां यथा छायया च सुखं याति तथा य
२०२ छत्र दा नराः उपानह प्रदायोनेर्वित्त पापूर्तधर्मिणः विमानैर्यानदा यांति तथान्नाद्यासनप्रदाः
भक्ष्यभोज्यैस्तथा तृप्ता याति भोजनदायिनः दीपप्रदाः प्रकाशेन गोप्रदास्तानदीं सुखं श्रीस
र्यश्रीमहादेवं भक्त्या च पुरुषोत्तमं जन्मप्रभृतिसंयाति पूज्यमानाय मानुगैः महीगांकांचनंला
हं तिलान्नकर्मा समेव च लवणं सप्तधान्यं च दत्वा याति सुखं नरः तेषां तत्र गतानां च पापिनां पु
ण्यकर्मणां चित्रगुप्तस्ततो याति निरूपयति वै ततः प्रेतलोके च वसति ततः संवत्सरं नरः वत्स
रेण च तेनास्य शरीरमभिजायते सोदकुंभमथानाद्यं प्राप्नोति स्वयमेव च स्वयं येन न दत्तं च त
था हा तात न विद्यते न चाप्युदकदाता सो क्षुत्तृष्णाभ्यामतिपीड्यते बांधवैस्तूदकं दत्तं न दीभक्ताप
तिष्ठति मासिमासि च यच्छ्राद्धं षोडशाख्यं सपूर्वकं तत्र न क्रियते यस्य प्रेतत्वात्तन मुच्यते मा २०२
नुषं च दिने नैव प्रेतलोके दिनं स्मृतं तस्माद्दिने दिने देयं प्रेताया न्नांच वत्सरं तं च श्मशानिका

नामगणायाम्याभयावहा शीतवातातपो पेतं तत्र रक्षति पापिनं यदेह बंधने कश्चित् रक्ष्यते
विषमैर्नरैः प्रेतपिंडान दीयंते षोडशाश्राद्धपूर्वकाः यस्य तस्य न मोक्षोऽस्ति प्रेतलोके युगैरपि
ततः सपिंडीकरणे बांधवैः सकृते नरः पूर्णे संवत्सरे देहं संपूर्णं प्रतिपद्यते पापात्मा घोररूपं तु
धार्मिको दिव्यमुत्तमं ततः स नरकं याति स्वर्गं वा स्वेन कर्मणा रौरवाद्याश्च नरकाः पातालतलसं
स्थिताः स्वराद्यास्सप्तपर्यंताः स्वर्लोकः स्योर्ध्वमाश्रितः इतिहासपुराणेषु वेदस्मृतिषु यच्छ्रुतं
पुण्यं तेन भवेत्स्वर्गो नरकस्तद्विपर्ययात् तत्रापि कालं वसति कर्मणामनुरूपतः अर्वाक्स
पिंडीकरणं यस्य वर्षा च वा कृतं प्रेतत्वमति तस्यापि प्रोक्तं संवत्सरं ध्रुवं यरिष्टं च त्रिभिर्मघैर
र्चितं वा सुरत्रयं प्रेतकोकं न ते यांति तथा ये समरे हताः शुद्धेन पुण्येन दिवं च शुद्धं पापेन
शुद्धेन तथा तमोघं मिश्रेण स्वर्गं नरकं च याति देहस्तथैवस्य भवेच्च तादृक् प्रश्नत्रयं येति
न च प्रणीतमुत्पत्तिमृत्यू परलोकवासः यथा गुरुर्मे समुदाजहार किं भूयश्च स्तुतत द्वदा
मि इतिश्रीस्कंदपुराणे कुमारिकाखंडे पंचशोध्यायः ५० अतिथिरुवाच

स्कं॰पु॰२ यदेतत्सर्वलोकस्य स्वरूपं व्याहृतं त्वया आगमं समुपाश्रित्य तत्तथैव न संशयः किं त्वत्र नास्ति कः पापाः स द
२०३ ह्यंतेल्पचेतनाः तेषां निःसंशयं कुरुते वद कर्मफलं हि यत् इहैव कस्य कस्यैव कर्मणः पापकस्य च प्रभा
वा कीदृशो जायते कर्मणैतद्वदास्ति चेत् [illegible] कस्य कमठ उवाच सर्वमेतत्प्रवक्ष्यामि स्थिरो भूत्वा शृ
णुष्व च यथा मम गुरुः प्राह यान्मे चेतसि संस्थितं अन्नहा क्षयहारी स्यात्सुरापः श्यावदंतकः सुवर्णचौरः
कुनखी दुश्चर्मा गुरुतल्पगः तत्संसर्गी सर्वरोगी पंचपातकिनस्त्वमी निंदामाकर्ण्य यो धूर्तो बधिरः संप्रजा
यते स्वयंप्रकीर्तयश्चापि मूकः पापोभिजायते आज्ञालोपी गुरूणां च अपस्मारि भवेन्नरः अवज्ञाकारक
स्तेषां कृमिरेवाभिजायते उपेक्ष्यतः पूज्यकार्यं दुःप्रज्ञत्वं प्रजायते चौर्यार्थं साधु द्रव्याणां यो देयावत्सदाभि
च तावद्वर्षाणि पंगुत्वं संप्राप्नोति नराधमः दत्वा हरति तद्द्यो जायते कुकलासकः कुपीतान प्रसाद्यैव पूज्या
न्स्याच्छीर्षरोगवान् रजस्वलाभिगश्चैव चांडालं संप्रजायते वस्त्रापहारी चित्रि स्यात्कृच्छ्रकुष्टी तथाग्निदः
उदरी रूप्यहारि स्यात्कूटसाक्षी मुखारुजः परदाराभिकामेन दृष्टा स्यादक्षिरोगवान् प्रतिज्ञाया प्रयच्छन् २०३
यो ह्यल्पायुर्जायते नरः विप्रस्वापहारि स्यादजीर्णी सर्वदाधमः नैष्टिकानाक्रानाड्र्यो निवृत्तो रोगवान्सदा

DR. BHAU DAJI MEMORIAL

पोत्तीव कुब्जे लेकायां रेतो मोक्षक्षयी भवेत् स्वामिनाधर्मयुक्तोयस्तं ज्ञात्वा न समाचरेत् स्वयं वा भक्षये
त्तद्द्रव्यं समूढस्याज्जलोदरी दुर्बलं पीड्यमानं यो बलवान्समुपेक्षते अंगहीनः स च भवेदन्नं हृत्वा क्षुधाभ
वेत् व्यवहारे पक्षपाती जिह्वारोगी भवेन्नरः धर्मप्रवृत्तिं संवार्य पत्न्यादिष्टवियोगवान् स्वयंपाकाग्र्य
भोजी यो गलरोगमवाप्नुयात् पंचयज्ञानकृत्वैव भुंजन्स्यात्स ग्रामशूकरः सर्वमिथुनकृन्मोहपारसज्यस्वेग
हिनी वक्रयाद्रिक्तो मूढात्मा खल्वाटो नरकाद्भवेत् छद्मनोपाचरेद्यस्तु पितरं स्वामिनं गुरून् प्राप्तप्राप्तस्या
तिकष्टापरिभ्रंशोऽर्थनाशो भवेत् विश्वस्तस्वापहारी यो दुःखानां भाजनं भवेत् मिथ्यागुणैरात्मश्लाघी लोका
नां दुर्भगो भवेत् धार्मिके क्षुद्रकारी यो नरः स वामनो भवेत् दुर्बलो विषयायीयः कटिलूति भवेन्नरः जासंधः
श्चापि योगाभ्यासिनः पश्चाद्दुःखकृत्तज्ज्ञवां निर्दयो गोपु घासाद्यैः सदा साध्वसु कष्टगः निस्तेजकः समार्यायो गल
गंडीस जायते सदा क्रोधी च चांडालः प्रतिपक्षश्च सूचकः अजविक्रियकृद्व्याधः कुंडाशी भृतको भवेत् ना
स्तिकः शिलपिंडस्यादश्वघोगीतजीविनः अभिक्षादोगडमाली अस्वादिता सुदास्यकृत् अज्ञायनोऽज्ञानयो
हि मूर्खो भवति मानवः शास्त्रचारकेफराश्यः कथां पुण्यां च हेतुभिः कृमिवक्रः स च भवेद्धि भ्रष्टो नरकाक्षो १ धीः

स्कं॰पु॰२ देवद्विजगवां वृत्तिहारकोवांतभक्षकृत् तडागारामभेत्ता यो भवेद्धि कलपाणिकः वातरोगी कु
वेद्यः स्यात् दुश्चर्मा गोष्टमेहनः मधुमेहश्खरागामी गोत्रस्त्रीमैथुनात्पसू स्वसारं मातरं पुत्रवधू ग
२०४ च्छन् नवीर्यवान् कृतघ्नः सर्वकार्याणां वैकल्यं समुपाश्नुते इत्येषलक्षणोद्देशः पापिनां परिकीर्ति
तः श्वित्रगुप्तापि मुत्यत सकलस्यानुवर्णने एते नरक विभ्रष्टा भुक्त्वा योनि सहस्रशः एवंविधाश्चिह्नि
ताश्च जायंते लक्षणैर्नराः एहधर्मेन मन्यंते तथा ये दानवर्जिताः सर्वव्यसनान संत्यक्त्वा धर्ममेकं भ
जंति ते भवंति चात्र श्लोकाः धर्मादनवमं सौख्यमधर्मा दुःखसंभवः तस्माद्धर्मं सुखार्थाय कुर्या
त्पापं च विवर्जयेत् लोकत्रयेपि यत्सौख्यं तद्धर्माद्भ्यते यतः धर्ममेकमतः कुर्यात्सर्वकार्यार्थसिद्धये
मुहूर्तमपि जीवेत नरः शुक्लेन कर्मणा न कल्पमपि जीवेत लोकद्वयविरोधिना इति श्रुत्वाय प्र
यथाशक्त्यामर्यारितं असूक्ष्मसूक्ष्ममथवा क्षंतव्यं किं विदामि वा श्रीनारद उ॰ कमठस्य तदाकर्ण्य
अष्टवर्षस्य भाषितं भगवान्भास्करः प्रीतो बभूवातीव विस्मितः प्रशशंस च तान्विप्रान् हारीतप्रमुखां २०४
स्तदा अहो वसुमति धन्या द्विजैरेवंविधैरिमैः अथ प्रजापतिर्धन्यो यन्मर्यादमिपाल्यते अमीभि

र्ब्राह्मणवरैर्धन्यो वेदाश्च संप्रति येषां मध्ये बालबुद्धिरियमीदृशी स्फुटा हारीतप्रमुखानां हि का
वे बुद्धिर्भविष्यति असंशयं त्रिलोकस्थमेषामविदितं न हि यथैतन्नारदः प्राह भूयस्तस्मादमी बुधः
इति प्रशस्य तान्विप्रान् प्रहृष्टो रविरब्रवीत् अहं सूर्यो विप्रमुख्या युष्माकं दर्शनात्स्फुटे समागतः
सूर्यलोकात्प्राप्तनेत्रफलं त्वमे भवद्भिर्धीर्विप्रमुख्यैः संजल्पन सहासनात् अंस जाऽपि पज्ञोनो किं पु
नमादृशा द्विजाः सर्वथा नारदो धन्यो यो सौ त्रैलोक्यत लावित् युष्माभिर्बध्यते श्रेयो यस्यैवं ध्यतिदा
नवत् प्रणमामी च वः सर्वान् मनोबुद्धिसमाधिभिः तपोविद्याचावित्तं तपापवार्धक्यकारणं वरं म
त्तो वृणीध्वं च वदुर्लभं यद्धृदीच्छथ यूयं स्वयं हि वरदा मत्संगो मा सुनिःफलः देवतानां हि संसर्गो निः
फलो नापजायते तस्मान्मत्तो वरं किंचित् वृणुध्वं प्रवदामि वः इति सूर्यवचः श्रुत्वा प्रहृष्टास्ते द्विजो
त्तमाः संपूज्य परया भक्त्या पादार्घस्तुतिवंदनैः मंडलादीन्महाजप्यान् गृहंतः प्राचुरं रविं जया
दित्य जय स्वामिन् जय भानो जयामल जय वेदपते श्वश्वस्तारयास्मान् हर्षिते विप्राणां लंपरो देवो
विप्रस्वर्गापितन्मयः नितरां पूतमेतन्नः स्थानं देवलये क्षितं अद्य नः सफलो वेदा अद्य नः सफला क्रिया

स्कं॰पु॰२ अद्य नः सफलं गेहं त्वया संगम्य गोपते वरं यदि प्रदातासि तदेनं प्रवृणीमहे अस्माकं यदिदं स्थानं न
हि त्याज्यं कथंचन श्रीसूर्य उवाच यस्माद्भवद्भिः पूर्वं तु जयादित्येति नोदितं जयादित्य इति ख्यातस्तस्मात्स्थास्ये
२०५ त्र सर्वदा यावन्मही समुद्राश्च पर्वता नगराणि च तावत्स्थानमिदं विप्रा न हि त्यक्ष्यामि कर्हिचित् दारिद्र्य
रोगसंघातान् दुर्वामंडलानि च दुष्टादीन्नाशयिष्यामि भजतामत्र संस्थितः यो मामत्र स्थितं चापि पूजयिष्य
ति मानवः सूर्यलोकमिवागम्य पूज्यां तस्य भजाम्यहं नारदः एवमुक्ते भगवता हापीताद्या द्विजोत्तमाः मूर्ति
संस्थापयामासुर्वेदोदितविधानतः ततो द्विजाः प्राकुर्वन् कमकं त्वत्कृते रविः अत्र स्थाने मितस्तस्मात्स्थ
मं तु हितं रविं इत्युक्तो ब्राह्मणैः सर्वैः कमठो वाग्मिनां वरः प्रतिपत्स जयादित्यं महास्तोत्रमिदं जगौ नत्वं
कृतकेवलसंश्रुतश्च यज्ञेष्विव व्याहरस्यादिदेव चतुर्विधा भारतिदूरदूरं दृष्टस्तोमि स्वार्थकामक्षमेतत्
मार्तंड सूर्यांशुरविस्तथेंद्रो भानुर्भगश्चार्यमा स्वर्णरेताः दिवाकरो मित्रविष्णू च देव ख्यातस्त्वमेव द्वादशात्मा
नमस्ते लोकत्रयं चैतव गर्भगेहं जलाधारः प्रोच्यसे त्वं समग्रं नक्षत्रमालाकुसुमाभिमालातस्मै नमो व्योमलिं २०५
गाय तुभ्यं त्वं देव देवत्वमनाथनाथ त्वं पाल्यपालः कृपणः कृपालुः त्वं नेत्रनेत्रं जनरक्षिबुद्धिराकाराकाराज

यजीवजीवः दारिद्र्यदारिद्र्यनिधिर्निधिनां मंगलानां मंगलं रोगरोग प्रथितः पृथिव्यां चरं जरादित्य ज
यात्प्रमेय व्याधिग्रस्तं कुष्ठरोगाभिभूतं भग्नघ्राणं जीर्णदेहं विसंज्ञं मातापिता बांधवः संत्यजंति सर्वे स्व
त्कृपासि कोऽपि स्यादन्यः त्वमेव पिता त्वं जननि त्वमेव त्वं मे गुरुर्बांधवाश्च त्वमेव त्वमेव धर्मस्त्वं च मे मोक्षमार्गो दास
स्तुभ्यं स जनार्क्षं देव पापोऽस्मि मूढोऽस्मि महोग्रकर्मी रौद्रास्यमाचारविधानमस्मि तथापि तुभ्यं प्रणिपत्य
पादौ याचेऽयं भक्त्या नाथ यथा श्रीजयार्कः श्रीनारद उ॰ एवं स्तुतो जयादित्यः कमठेन महात्मना स्निग्धगंभीरया
वाचा प्राह तं प्रहसन्निव जयादित्याष्टकमिदं यत्त्वया परिकीर्तितं अनेन स्तोष्यते यो मां भुवि तस्य न दुर्लभं रवि
वारे विशेषेण मासमभ्यर्चयेत् पठेत् तस्य रोगा न नश्यंति दारिद्र्यं च न संशयः त्वया चेतत्पिता वत्स तव
दास्ये वरं त्वमुं सर्वलोभुवि भूत्वा त्वं ततो मुक्तिमवाप्स्यसि त्वत्पिता स्मृतिकारश्च भविष्यति द्विजार्चितः स्था
नस्यास्य न नाशश्च कदाचित्संभविष्यति न चैतत्स्थानकं वत्स परित्यक्ष्यामि कर्हिचित् एवमुक्त्वा स भगवान् ब्रा
ह्मणैरर्चितः स्तुतः अनुज्ञाप्य द्विजेंद्रांस्तांस्तत्रैवांतर्दधे प्रभुः एवं पार्थ समुत्पन्नो जयादित्यो त्र भूतले अश्वि
ने मासि तस्मात्स मासो त्रेति विशिष्यते अश्विने भानुवारेण यो जयादित्यमर्चयेत् कोटितीर्थे नरः स्नात्वा ब्रह्मह

स्कं॰पु॰२ सुमहत्फलमश्नुते अथवाश्विनमासे च जयादित्यं प्रपूजयेत् कोटितीर्थे नरः स्नात्वा ब्रह्महत्यां व्य
पोहति पूजनाद्रक्तमाल्यैश्च रक्तचंदनकुंकुमैः लेपनाद्धूपदीपैश्च नैवेद्यैर्घृतपायसैः ब्रह्मघ्नश्च सुरा
२०६ पश्च स्तेयी च गुरुतल्पगः मुच्यते सर्वपापेभ्यः सूर्यलोकं स गच्छति पुत्रदारधनधान्यमुः प्राप्य संसा
रिकं सुखं इष्टैः कामैः समायुक्तः सूर्यलोके चिरं वसे सर्वपुरविकारेषु जयादित्यस्य दर्शनं कीर्त
नं स्मरणं चापि सर्वरोगापहं त्विदं अनादिनिधनं देवमव्यक्तं तेजसां निधिं ये भक्त्यास्मे चलीयं ते सौ
रस्थाने निरामेय सूर्योपरागे संप्राप्ते रविकूपसमाहितः स्नानं यः कुरुते पार्थ होमं कुर्यात्स्वयं ततः
दानं चैव यथाशक्त्या जयादित्याग्रतस्थितः तस्य पुण्यस्य माहात्म्यं शृणुष्वैकमना नृप कुरुक्षेत्रे च यत्
पुण्यं प्रभासपुष्करेषु च वाराणस्यां च यत्पुण्यं प्रयागे नैमिषेपि वा तत्पुण्यं लभते मर्त्यो जयादित्यप्र
सादतः इति श्रीस्कंदपुराणे कुमारिकाखंडे जयादित्यमहात्म्ये एकपंचाशोध्यायः अर्जुन उ॰
यदा मे स्थापितं स्थानं प्रसाद्याथ मया प्रभुः ब्रह्मलोकात्समानीतः साक्षाद्ब्रह्मा पितामहः ततोम २०६
ध्याह्नसमये स्नानार्थं भगवान्विधिः सस्मार कोटितीर्थानां स्मृतान्यत्रागतानि च स्वर्गाच्च दश ल

क्षाणि सप्तनीश्च महातले ।। पातालाद्द्वि लक्षाणि स्मृत्वान्यभ्यागतानि च अनेन प्रविभावेन लिं
गान्यपि कुरूद्वह आयातानि यथा पूजां विदधाति पितामह ततोभिषेचनं कृत्वा लिंगान्यभ्यर्च्य पद्म
भूः मध्याह्नकृत्यं संसाध्य मम प्रेमावरं ददौ ततो भगवता यत्र मनसा निर्मितं सरः भगवानर्च्य
ते स्त्रीर्थैरिदमेव प्रजापतिः किं कुर्म भगवान् धातरादेशं देहि न प्रभो तेषां तद्वचनं श्रुत्वा ब्रह्मा प्रा
ह प्रजापतिः एतस्मिन्सरसि स्थेयं तीर्थैः सर्वैः रथात्र च एकस्मिंश्च तथा लिंगे सर्वलिंगसमार्चनात्
कोटिनामवती तीर्थानां लिंगानां स्नानपूजया दानेन च फलं तत्र यदि संस्थं वचो मम यः श्राद्धं कुरुते
चात्र पिंडदानं यथाविधि पितृणामक्षया तृप्तिर्जायते नात्र संशयः स्नात्वा योभ्यर्चयेद्देवं कोटि
श्वरमनन्यधीः कोटिलिंगार्चनफलं व्यक्तं तस्यापजायते त्रैलोक्ये यानि तीर्थानि गंगाद्याः सरितस्त
था तेषां सफलमाप्नोति कोटितीर्थावगाहनात् एवं दत्वा वरं ब्रह्मा ब्रह्मलोकं ययौ प्रभुः कोटिती
र्थं च संजातं ततः प्रभृति विश्रुतं अस्य तीरे पुरा पार्थ ब्रह्माद्यैर्देवसत्तमैः यज्ञान्बहुविधान्कृत्वा
ततः सिद्धिं परां ययुः वशिष्ठाद्यैर्मुनिवरैस्तपश्चीर्णं पुरानघ मनसाभीप्सितान्कामान्प्रापुरन्ये

स्कं॰पु॰२ तपोधनाः अत्र तीर्थे पुरा पार्थ अत्रिणा विहितं तपः कोटितीर्थाद्दक्षिणतः स्थापितं लिंगमुत्तमं अत्रीश्वराभिसं
ज्ञं तु महापापहरं परं स्थापयित्वा च तल्लिंगमत्र चक्रे सरोवरं तत्र स्नात्वा च यो मर्त्यः श्राद्धं कुर्यात्प्रयत्नतः
२०७ अत्रीश्वरं समभ्यर्च्य रुद्रलोके वसेच्चिरं भरद्वाजेन मुनिना कोटितीर्थे सरोवरे तपश्चीर्णं महाबाहो यत्ना
च्चाविहितं किल भरद्वाजेश्वरं लिंगं स्थापितं सुमनोहरं तत्र कृत्वा सरो रम्यं पुरीमुत्तमवाप्तवान् तत्र स्ना
त्वा नरो भक्त्या श्राद्धं कुर्याद्विधानतः भरद्वाजेश्वरं पूज्य शिवलोके महीयते ततश्च कोटितीर्थेस्मिन् गोत
मो गतवानृषिः अतप्यत तपो घोरमहल्यासंगमाशया तं कामं प्राप्तवान् धीमान् परां मुदमुपागतः अहि
ल्यायाः समायोगमस्य तीर्थप्रभावतः अस्मिन् क्षेत्रे महालिंगं गौतमेश्वरसंज्ञकं स्थापयामास भगवान् अहि
ल्यासरसस्तटे अर्जुन उ॰ अहिल्यया कदा ब्रह्मन् नवानितं चेमहासरः तन्मम ब्रूहि सकलं अहिल्यासरकार
णं श्रीनारद उ॰ अहिल्या शापमापन्ना गौतमान् किल फाल्गुन पुराचेन्द्रसमायोगपरं दुःखमुपागता त
ता दुःखातः स मुनिः कोटितीर्थे करोत्तपः तपसा तेन वै पार्थ अहिल्या सह संगतः ततः साध्विपरं हृष्टा अ २०१०
त्र क्षेत्रे सरोवरं चकार सुमहत्पुण्यं तीर्थाद्यैः परिपूरितं अहिल्यासरसि स्नानं पिंडदानं समाचरेत् गो

तमेशं च संपूज्य ब्रह्मलोकं स गच्छति कोटितीर्थे नरश्रेष्ठ अनेकमुनयो मलाः तपस्तप्त्वा सुघोरं च परां
सिद्धिमुपागताः अस्य तीरे द्विजं चैकं मिष्टान्नैर्यश्च तर्पयेत् तेन श्रद्धासहायेन कोटिर्भवति तर्पिताः अस्य तीरे
नरः पार्थ रत्नानि विविधानि च गोभूमितिलधान्यानि वासांसि विविधानि च श्रद्धया परया पार्थ द्विजेभ्यः संप्रय
च्छति ज्ञातकोटिगुणं पुण्यं कोटितीर्थप्रभावतः कोटितीर्थे प्रतिश्रुत्य द्विजेभ्यो न प्रयच्छति नरके पातयित्वा
च कुलमेकोत्तरं शतं आत्मानं पातयत्पश्चाद्दारुणं सैरवं महत् माघमासे तु संप्राप्ते प्रातःकाले तथामल
यः स्नाति मकरादित्ये तस्य पुण्यं शृणुष्व मे सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलं सर्वदानव्रतैर्यच्च कोटिती
र्थे दिने दिने तत्पुण्यं लभते मर्त्यो नात्र कार्या विचारणा कन्यागते सवितरि यः श्राद्धं कुरुते नरः पितरस्त
स्य तुष्यंति गयाश्राद्धशतैर्न तु कार्तिके मासि संप्राप्ते स्नानादि कुरुते यदि तदक्षयफलं सर्वं ब्रह्मणो वच
नं यथा इष्ट्वा च यज्ञमेकं तु कोटियज्ञफलं लभेत् कन्या श्रेष्ठेण विधिना दत्वा कोटिगुणं फलं सर्वं दानं को
टिगुणं कोटितीर्थे भवेद्यतः कोटितीर्थे त्यजन्प्राणान् हृदि कृत्वा तु माधवं तस्य पार्थ चिरं स्वर्गे त्वक्षयाश्च
ती गतिः कोटितीर्थे तीर्थवरे देहत्यागं करोति यः तस्य पूजां प्रकुर्वंति ब्रह्माद्या देवतागणाः अस्य तीरे देहदा

 दानं यस्य कस्य प्रजायते अस्ति क्षेपोस्य भेवेन महीसागरसंगमे तत्फलं गदितुं पार्थ वागीशोपि न वे
क्षमः एतत् ज्ञात्वा परं पार्थ कोपि तीर्थं प्रसेवते दिने दिने फलं तस्य कापिलिंगो सहस्रकं स्वर्गे मर्त्ये
 च पाताले तस्मादेतत्सुदुर्लभं इतिश्रीस्कंदपुराणे कुमारिकाखंडे कोटितीर्थमहात्म्ये द्विपंचशोध्यायः
५२ श्रीनारद उवा॰ अथान्यं संप्रवक्ष्यामि शालामाहात्म्यमुत्तमं संस्थापितपुरा स्थाने प्रार्थिताहं
द्विजपुंगवैः स्थानस्य रक्षणार्थाय उपायं कुरु सुव्रतः ततो मया प्रतिज्ञातं करिष्ये स्थानरक्षणं आरा
धितामया पश्चाद्ब्रह्मा विष्णु महेश्वरं त्रयश्चैकाग्रचित्तेन ततस्तुष्टा सुरोत्तमाः समागम्याथ मां प्रोचु
र्नारद ब्रियतां वरः प्रोक्तं तानर्थ्यं च मया क्रियतां स्थानरक्षणं अयमेव वरो मह्यं देयो देवैः सुतोषितैः
स्थानलोपो यथा न स्याद्यथा कीर्तिर्भवेन्मम एवमस्त्विति देवेशैः प्रतिज्ञाते तदा द्विज स्वांशेन प्रकरि
ष्यामो द्विजानां तव रक्षण एवमुक्त्वा कलामुक्ता देवैस्त्रिपुरुषास्स्वयं अंतर्धानततः प्राप्ताः सर्वेपि सुर
सत्तमाः ततो मया द्विजैः सार्धं शालाग्रे स्थानरक्षणं स्थापिताश्च पृथग्दृवा स्त्रयस्त्रिभुवनेश्वराः पी
ड्यमानाय दाविप्राः केनापि च भवंति हि पूर्वाह्ने चापि कृत्वेदं मध्याह्ने यजुरेष्वथ यामस्तृतीये सामा

नि नारस्वरमधीलस च शापं यस्य प्रदास्यंति शालाग्रे भृशरोषिता सप्ताहमध्य वर्षाद्वा त्रिवर्षा
न् भस्मतां व्रजेत् प्रतिज्ञाता स्थानरक्षा यदि वो नारदाग्रतः स सेन ते न नो वैरी भस्मीभवतु तत्क्षणा
त् अनेन शापमंत्रेण भस्मीभवति निश्चितं शालात्रिपुरुषा तत्र यः पश्यति दिने दिने अर्चये
त्तोषयेद्यासौ स्वर्गलोके महीयते इतिश्री स्कंदपुराणे त्रिपुरुषशालामहात्म्यं तृतीयपंचशोध्या
यः ५३ श्रीनारद उ॰ अथान्यं संप्रवक्ष्यामि मदीयसरसो महत् माहात्म्यमतुलं पार्थ
देवानामपि दुर्लभं मया पूर्वं सरः खातं दर्भांकुरशलाकया मृत्तिकाताम्रपात्रेण सद्यो बाह्येत
तः स्वयं सर्वेषामेव तीर्थानामाहृत्योदकमुत्तमं सतत्रसरसि क्षिप्तं तेन संपूरितं सरः अश्विने मा
सि संप्राप्ते भानुवारः शुचिः श्राद्धं यः कुरुते तत्र स्नात्वा दानं विशेषतः पितरस्तस्य तृप्यंति यावदा
भूतसंप्लवं नारदीयं सरो ह्येतद्विख्यातं जगतीतले महता पुण्ययोगेन देवैरपि हि लभ्यते यदत्र
दीयते दानं हूयते यच्च पादके सर्वं तदक्षयं विद्यात् जपान् ज्ञानसाधना नारदीये सरःश्रेष्ठे स्ना
त्वा यो नारदेश्वरं पूजयच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते अत्र तीर्थे पुरा पार्थ सर्वनागैस्तपः कृतं क

स्कं॰पु॰२ दुर्वासापस्य मोक्षार्थमात्मनो हितकाम्यया ततः सिद्धिपरां प्राप्ता अस्य तीर्थप्रभावतः ततो नागेश्वरं लिंगं
स्थापयामास रूर्जितं नारदाउ॰ ते भोगसर्वनागाः प्रहर्षिताः नारदीयसरः श्रेष्ठे यः स्नात्वा पूजयेत् हरे
२०९ नागेश्वरं महाभक्त्या तस्य पुण्यमनंतकं तेषां सर्पभयं नास्ति नागानां वचनं यथा इतिश्री॰ नारदीयसा
रो माहात्म्ये चतुर्थपंचशोध्यायः ५४ श्रीनारदउ॰ अपरद्वारकानामदेवी चात्रास्ति पांडव साक्षात्मा
चद्वारे वै सदेव विहिता लया चतुर्विंशतिकोटिभिर्देविभिः परिरक्षिता ततो दीर्घतपस्तप्तामयानिता रक्ष
षिता अपरस्मिन्तोद्वारे स्था॰ पिता परमेश्वरी पूर्वस्मिन्नगरद्वारे स्थापिता द्वारवासिनि नवमी चैत्रमासस्य कृ
ष्णपक्षे भवेतु या कुंडस्नानं ततः कृत्वा तां च देवी प्रपूजयेत् बलिया कुलनैवेद्यैर्गंधधूपादिपूजनैः सप्तजन्म
कृतं पापं नाशमायाति तत्क्षणात् यान् प्रार्थयते कामान् तांस्तान् प्राप्नोति मानवः वंध्या च लभते पुत्रं स्नानमात्रे
ण तत्र वै नवम्यां चैत्रमासस्य पुष्पधूपार्घपूजया विघ्नानि नाशयेद्देवी सर्वसिद्धिं प्रयच्छति भक्तानां तत्क्ष
णादेव सत्यमेतन्न संशयः उत्तरद्वारकां चापि पूज्ये वं विधिवन्नरः एतदेव फलं सोपि प्राप्नुयान्मानवोत्तमः २०९
पूर्वद्वारे तु वै देवी या स्थाता द्वारवासिनी तस्याः पूजनमात्रेण प्राप्नुयद्वांछितं फलं अश्विने मासि संप्राप्ते नर

रात्रे विशेषतः उपोष्य नवरात्रं च स्नात्वा कुंडे विमत्सितः पूजयेद्वत्रतां भक्त्या पुष्पधूपान्नतर्पणे अपुत्रो लभते
पुत्रान् निर्धनो लभते धनं वंध्या प्रसूयते पार्थ नात्र कार्या विचारणा इतिश्रीस्कंद॰ कोटितीर्थादिमहात्म्ये
पंचपंचाशोध्यायः ५५ श्रीनारदउ॰ ममापि पार्थ तत्रास्ति मूर्तिर्ब्राह्मणकाम्यया तत्र नाहं सजाम्यंग
छत्रदंडविभूषितः कार्तिकस्य तु या शुक्ला भवेत्सैकादशी शुभा तस्यां मद्दर्शनं कृत्वा कलिदोषैर्विमुच्यते
अर्जुनउ॰ बाल्यात्प्रभृति संदेहो ममायं हृदि वर्तते पृच्छतस्तं च मे विप्र न क्रोधं कर्तुमर्हसि स दान्तो मे क्षधर्मेषु
परिनिष्ठां परां गतः सर्वभूतसमो दांतो रागद्वेषविवर्जितः त्यक्तनिंदास्तुतिर्मौनी मोक्षस्य परिकीर्त्यते
त्वं च नारद लोकेषु वायुवच्चपलो मुने सौदामिनी च विचरन् दृश्यते प्राज्ञसम्मतः सदा कलिकरो लोके निर्द
यः सर्वप्राणिषु बहूनां हि सहस्राणि देवगंधर्वरक्षसां राज्ञां मुनिनरेंद्राणां कलहात् ध्वानितं भवेत् कस्मा
त्ते देषोच्छ्रेते संदेहं मे हरा द्विज संदेहान्न सुसंशेते बाणविक्षमगो यथा सूतउ॰ ज्ञान केदं वचः श्रुत्वा फा
ल्गुनाच्चारदामुनिः प्रहरन्निव बाभ्रव्य वदनं संनिरीक्षत सच बाभ्रव्य नामा वै हारितस्यान्वयोद्भवः ब्राह्मणो
नारदमुने समीपे वर्तते सदा स च ज्ञात्वा महाबुद्धिर्नारदस्य मनीषितं प्रहसन्निव भावाच फाल्गुनं स्निग्धया गि

DR. BHAU DAJI MEMORIAL

स्कं॰पु॰२ रा ब्राह्मण उ॰ सत्यमेतद्यथाप्रुष्टं त्वं नारदं प्रति पाण्डव सर्वोपि चात्र वृत्तान्ते संशयं याति मानवः तदहं
ते प्रवक्ष्यामि यथा कृष्णान्मया श्रुतं स्तोककालांतरे पूर्वं सर्वे यादवनंदनः महीसागरयात्रायां कृ
२३० ष्णस्तत्राययौ प्रभुः उग्रसेनेन सहितो वसुदेवेन बभ्रुणा रामेण रौक्मिणेयेन युयुधानादिभिस्तदा
स च स्नात्वा स्नानि समं महीसागरसंगमे पिंडदानादिकं कृत्वा दत्वा दानानि भूरिशः गुहेश्वरादिलिं
गानि यत्नतः परिपूज्य च स्नानं कृत्वा कोटितीर्थे जयादित्यं समर्च्य च पूजयन्नारदमुनिं युक्तः कृष्णो
महात्मना उग्रसेनराज्ञा वै पूर्वजन्मजटायुना महादीनि प्रमुख्यानां यदूनां चोपशृण्वतां उग्रसे
नो महाराजः कृष्णं प्रोवाच संसदि उग्रसेन उ॰ कृष्ण प्रक्ष्यामि त्वामेकं संशयं वद तं मम यो यं नाम
महाबुद्धिर्नारदो विश्ववंदितः कस्माद्दोषात्ति चपलो वायुवत् भ्रमते जगत् कलिप्रियश्च कस्मा
द्वा तस्मात्त्वय्यति प्रीतिमान् श्रीभगवानुवाच सत्यं राजंस्त्वया पृष्टमेतत्सर्वं वदामि ते दक्षेण तु
पुरा शप्तो नारदो मुनिसत्तमः सृष्टिमार्गात्सुतान्विक्ष्य नारदेन विचारितान् नावस्थानं च लोकेस्मि २३०
न्भ्रमतस्ते भविष्यति पैशून्यवक्ता च तथा द्वितीयानां प्रचालनात् इति शापद्वयं प्राप्य द्विविधात्म

जचालनात् निराकर्तुं समर्थोपि मुनिर्मेने तथैव तत् एतावान्साधुवादो हि यत्क्षमेतेश्वरः स्वयं वि
नाशकालं चावीक्ष्य कलिं वर्धयते यतः स संचवक्ति तस्माच्च न स पापेन लिप्यते ब्रह्मतोपि च सर्वत्र
नास्य यस्मात्पृथक् पृथक् अहं हि सर्वदा स्तौमि नारदं देवदर्शनं अहं हि सर्वदा स्तौमि नारदं देवद
र्शनं महेंद्रगादितेनैव स्तोत्रेण शृणु तन्नृप श्रुतिचारित्रयो जीता यस्याहंता न विद्यते अगुप्तश्रु
तिचारित्रं नारदं तं नमाम्यहं अरतिः क्रोधचापल्ये भयं नैतानि यस्य च अदीर्घसूत्रं तं धीरं नारदं प्र
णमाम्यहं कामाद्वा यदि वा लोभाद्वाचं यो नान्यथा वदेत् उपास्यं सर्वजंतूनां नारदं प्रणमाम्यहं अ
ध्यात्मगतितत्वज्ञं क्षांतं शक्तिं जितेंद्रियं ऋजुं यथास्ति वक्तारं नारदं प्रणमाम्यहं तेजसा यशसा बुध्या
नयेन विनयेन च जन्मना तपसा वृद्धं नारदं प्रणमाम्यहं कल्याणं कुरुते बाढं पापं यस्मिन्न विद्यते
न प्रीयते च परार्थे यो सौ तं नौमि नारदं वेदस्मृतिपुराणोक्तधर्मे यो नित्यमास्थितः प्रियाप्रियवि
मुक्तं तं नारदं प्रणमाम्यहं अशनादिषु लुब्धं च पंडितं नालसं द्विजं बहुश्रुतं चित्रकथं नारदं प्र॰
नार्थे क्रोधे च कामे वा भूतपूर्वस्य विभ्रमः येनैते नाशिता दोषा नारदं प्र॰ वीतसंमोहदोषो यो दृढभ

स्कं॰पु॰२ क्लिश्यश्रेयसि मुनयं सत्रपतं च नारदं॰ अशक्तः सर्वसंगेषु यः सक्तात्मेव लक्ष्यते अदीर्घसंज्ञायो वाग्मनारदं॰
नाभ्ययसागमं किंचिद्यस्तपोनोपजीवति अवंध्यकालो वश्यात्मा तवहं नौमिनारदं कृतश्रमं कृतप्रज्ञं न च तृ
२३१ प्तं समाधितः नित्ययत्नाप्रमत्तं च नारदं तं नमाम्यहं न हृष्यत्यर्थलाभेन योलाभेन व्यथत्यपि स्थिरबुद्धि
रसक्तात्मा तदहं नौमिनारदं तं सर्वगुणसंपन्नं दक्षं शुचिमकंतरं कालज्ञं च नयज्ञं च शरणं यामि नारदं
इमं स्तवं नारदस्य नित्यं राज्यन माम्यहं तेन मे परमां प्रीतिं करोति मुनिसत्तमः अन्योपि च शुचिर्भूत्वा
नित्यमेतां स्तुतिं भवेत् अचिरात्तस्य देवर्षिः प्रसादं कुरुते परं एतान्गुणान्नारदस्य तमर्थाकर्ण्य पार्थिव ज
पन्नित्यं स्तवं पुण्यं प्रीतस्तेभविता मुनिः इति विष्णुमुखाच्छ्रुत्वा नारदस्य गुणान्नृपः बभूव परमप्रीतश्चक्रे
तच्च तथा वचः ततो नारदमानर्च्य दत्वा दानांश्च पुष्कलान् नारदीयद्विजाग्र्याणां नारदः प्रीयतामिति
यं यो द्वारवतीं कृष्णः सभ्रातृ ज्ञातिबांधवः तीर्थयात्रामिमां कृत्वा विधिवत्पुरुषोत्तमः तस्मात्त्वमपि कौरव्य
नारदस्य गुणानिमान् श्रुत्वा श्रद्धामयो भूत्वा शृणु कृत्यं यदत्र च कार्तिके शुक्लद्वादश्यां प्रबोधिन्यामसौ मुनिः २३३
विष्णोर्ध्यानसमाधेश्च प्रबुद्धो जायते तदा तस्मिन्दिने नारदेन निर्मिते तत्रैव कूपके स्नानं कृत्वा प्रयत्नेन श्राद्धं

कुर्यात्समाहितः तपो दानं जपश्चात्र कूपे भवति चाक्षयं इदं विष्णोति मंत्रेण ततो विष्णुं विबोधयेत् नरदश्च
मुनिं पश्चान्मंत्रेणानेन पांडव योगनिद्रा यथा त्यक्ता हरिणा मुनिसत्तमः तथा लोकोपकाराय भवानपि
परत्यज इति मंत्रेण चोत्थाप्य नारदं परिपूजयेत् कृष्णप्रोदितया स्तुत्या छत्रधोत्रार्चनैः शुभैः ब्राह्मण्याद्द्विजा
नादेयं च छत्रं धोत्रं कमंडलुं प्रणम्य ब्राह्मणान्भक्त्या नारदः प्रियतामिति एवं कृते प्रसादात्तु मुनेः पापेन मु
च्यते जायते न कलिस्तस्य न चासौ रव्यं भवेदिह इति श्रीस्कंदपुराणे कुमारिकाखंडे नारदमहात्म्यं षट्पं
चशोध्यायः ५६ सूतउ॰ इति बाभ्रव्यवचनमाकर्ण्य कुरुनंदन प्रणम्य नारदं भक्त्या विस्मितः पुलका
न्वितः प्रशास्य चचिरं कालं पुनर्नारदमब्रवीत् गुप्तक्षेत्रमहात्म्यं शृण्वन्नस्तात् मुखान्मुने तृप्तिं नैवाधि
गच्छामि भूयस्तद्वक्तुमर्हसि श्रीनारदउ॰ महालिंगस्य वक्ष्यामि महिमानं कुरूद्वह गौतमेश्वरलिंगस्य
सावधानः शृणुष्व तत् अक्षनाम महायोगी गोतोद्योभवन्मुनिः गोदावरीसमानीता अहिल्यायाः पतिः प्रभुः
गुप्तक्षेत्रस्य माहात्म्यं स च ज्ञात्वा महोत्तमं योगसंसाधनं कुर्वन् तत्रैव तेते तपो महत् योगसिद्धिं ततः प्राप्य
गौतमेन महात्मना अत्र तं स्थापितं लिंगं गौतमेश्वरसंज्ञया संस्थाप्य तन्महालिंगं चंदनेन विलिप्य च सं

स्कं·पु·२ पूज्यपुष्पैर्विविधैर्गुग्गुलं दाहयेत्पुरः सर्वपापविनिर्मुक्तो रुद्रलोके महीयते अर्जुन उ० योग
स्वरूपं तु छामि योगतत्त्वं कुरुद्वह श्रवणादपि निर्मल्यं यस्यास्ति वनाकिमु चित्तवृत्तिविरोधाख्यं
२३२ योगतत्त्वं प्रकीर्त्यते श्रीतुनारद तत्त्वतः योग सर्वं प्रशंसंति यतः सर्वोत्तमोत्तमं श्रीनारद उ० तदृ
ष्टांगप्रकारेण साधयंती ह योगिनः यमश्च नियमश्चैव प्राणायामस्तृतीयकः प्रत्याहारो धारणा च ध्या
यं ध्यानं च सप्तमं समाधिरिति चाष्टांगो योगः संपरिकीर्तितः प्रत्येकं लक्षणं तेषामष्टानां शृणु पांड
व अनुक्रमान्नरो येषां साधनाद्योगमश्नुते अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ एते पंच यमाः प्रो
क्ताः शृण्वेषामपि लक्षणं आत्मवत्सर्वभूतेषु यो हिताय प्रवर्तते अहिंसैषा समाख्याता देवसंविहि
ता च या दृष्टं श्रुतं नानुमितं स्वानुभूतं यथार्थतः कथनं सत्यमित्युक्तं परपीडाविवर्जितं अनादानं
परस्वानामापद्यपि कथंचन मनसा कर्मणा वाचा तदस्तेयं प्रकीर्तितं अमैथुनं यतीनां च मनोवा
क्कायकर्मभिः रतौ स्वदारगमनं गृहीनां ब्रह्मचर्यता यतीनां सर्वसंन्यासो मनोवाक्कायकर्मणा २३२
गृहस्थानां च मनसा स्मृतं यैषपरिग्रहः एते यमास्तव प्रोक्ताः पंचैव नियमान् शृणु शौचं तुष्टिस्तपश्चै

व जपो भक्तिर्गुरोस्तथा एतेषामपि पंचानां पृथक् संशृणु लक्षणं बाह्यमाभ्यंतरं चैव द्विविधं शौ
चमुच्यते बाह्यं मृज्जलैः प्रोक्तामांतरं शुद्धमानसं न्यायेनागतया वृत्त्या भिक्षया वार्तयापि च
संतोषो यस्य सततं सा तुष्टिरिति चोच्यते स्वाध्यायस्तु जपः प्रोक्तः प्रणवाभ्यसनादिभिः शिवे ज्ञानं गुरोर्भक्तिः गुरुभु
क्तिरिति स्मृता एवं संध्येस्तान्नियमान् त्रामांश्च सुविचक्षणः प्राणायामाय संदध्यान्नान्यथा योगसाधकः
यतोऽशुचिशरीरस्य वायुकोपो महान्भवेत् वायुकोपात्कुष्टं च जडत्वादीन्युपाश्नुते तस्माद्विचक्षणः शुचिं
कृत्वा देहं यतनस्तरं प्राणायामस्य वक्ष्यामि लक्षणं शृणु पांडव प्राणापाननिरोधश्च प्राणायामः प्रकी
र्तितः लघुमध्योत्तरीयाख्यः स च धीरैस्त्रिधोदितः लघुर्द्वादशमात्रस्तु मात्रा निमिषउन्मिषः द्वि
गुणो मध्यमश्चोक्तस्त्रिगुणश्चोत्तमः स्मृतः प्रथमेन जयेत्स्वेदं मध्यमेन तु वेपथुं विषादं च तृतीये
जयो दोषाननुक्रमात् पाद्याद्यमासनं कृत्वा रेचकं पूरकं तथा कुंभकं च सुखासीनः प्राणायामं त्रिधा
भ्यसेत् प्राणानामुपसंरोधात् प्राणायाम इति स्मृतः यथा पर्वतधातूनां ध्मातानां दह्यते मलः य
थेंद्रियकृता दोषाः प्राणायामेन दह्यते गोशतं कापिलं दत्वा यत्फलं तत्फलं भवेत् प्राणायामेन योगज्ञ

स्कं पु॰ २ स्तस्मात्प्राणंसदायमेत् प्राणायामेनसिध्यंतिदिव्याःशांत्यादयःक्रमात् शांतिप्रशांतिदीप्तिश्चप्रसादश्चयथा
क्रमं सत्य आगंतुकामानांपापानांचप्रवर्तता ध्वंसनंशांतिरित्याख्यः प्रथमाजायतेगुणः लोभमोहात्मकान्
२३२ दोषान्निराकृत्यचकृत्स्नशः तमसांचयदाप्राप्तिःप्रशांतिरितिचोच्यते सर्वेंद्रियप्रसादश्चबुद्धेश्चैवमरुतामपि प्र
सादइतिसंप्रोक्तःप्राथमंचचतुष्टयं एवंफलंयदायोगीप्राणायामंसमभ्यसेत् म इत्यसेव्यमानस्तुसिंह
शार्दूलकुंजराः यथायांतितथाप्राणोवश्योभवतिसाधिनः प्राणायामस्त्वयंप्रोक्तःप्रत्याहारंततःशृणु विषये
षुप्रवृत्तस्यैवतस्मादिनिवर्तनं प्रत्याहारंविनिर्दिष्टंतस्यसंयमनंहियत् प्रत्याहारस्त्वयंप्रोक्तोधारणालक्ष
णंशृणु यथातोयार्थिनस्तोयंयंत्रनालादिभिःशनैः आपिबेयुस्तथावायुंयोगीनयतिसाधितं प्राणाभ्यांहृदयेचा
रयततालोभ्रुवोंतरे चतुर्दलेषट्दलेचद्वादशेषोडशच्छिके ओंकुंचनेनैवमूर्ध्नेमुनियपवनंशनैः मूर्ध
निब्रह्मरंध्रेतंप्राणंसंधारयेत्कृती प्राणायामादशद्वौचधारणेषाप्रकीर्तिते द्वेशैताधारणास्त्वाप्यप्राप्नोत्य
क्षरसंज्ञितां धारणास्थस्ययद्ध्येयंतस्यलंशृणुलक्षणं ध्यायंबहुविधंपार्थयस्यांतोनोपलभ्यते केचिच्छि २३३
वंहरिंकेचित्केचित्सूर्यंविधंपरे केचिद्देवीमहद्भूतान्युतध्यायंतिकेचन तत्रैयोयच्चध्यायेतसचतत्रप्रलीय

ते तस्मात्सदाशिवंदेवंपंचवक्त्रंहरंस्मरेत् पद्मासनस्थंतंगौरंबीजपूरकरस्थितं दशाहस्तंसुप्रसन्नवद
नंध्यानमास्थितं ध्येयमेतत्तवप्रोक्तंतस्माध्यानंसमाचरेत् ध्यानस्यलक्षणंलेतन्निमेषार्धमपिस्फुटं न
पृथक्जायतेध्येयाधारणायासमास्थितः एवमेतांउरारोहभूमिमास्थाययोगवत् नकिंचिच्चिंतयेत्पश्चात्
सासमाधिरितीर्यते समाधेर्लक्षणंसम्यक्ब्रुवतोमनिशामय शब्दस्पर्शरसैर्हीनंगंधरूपविवर्जितं परंपु
रुषंसंप्राप्तःसमाधिस्थःप्रकीर्तितः तांतुप्राप्यननोविघ्नैर्नाभिभूयेतकर्हिचित् समाधिस्थस्यदुःखेन
गुरुणापिनचाल्यते शंखादिशतशस्तस्यवाद्यतेयदिकर्णयोः भेर्यश्चापिदिहन्यंतेशब्दंबाह्यंनवेदति कृश
प्रहाराभिहतोवह्निदग्धतनुस्तथा शितांबुचस्थितोघोरेस्पर्शंबाह्यंनविंदति रूपंगंधेरसेबाह्येताद्दृस्य
तुकार्कथा दृष्ट्वायआत्मानमात्मासमाधिंलभतेपुनः दृष्ट्वावावभुवक्षाशांनातिबाधतिकर्हिचित् नस्वर्गेन
चपातालेमानुष्येचनतत्सुखं समाधिनिश्चलंप्राप्ययत्सुखंविंदतेनरः एवमारूढयोगस्यतस्यापिकुरु
नंदनः पंचोपसर्गाःकटुकाःप्रवर्तंतेयथाशृणु प्रीतिमःश्रावणोदेवोभ्रमावर्तोथभीषणः प्रतिभासर्व
शास्त्राणांप्रातिभोयंचसात्विकः तेनयोममदादद्याद्भिगाग्रंथ्यचेतसः योजनानांसहस्रेभ्यःश्रवणंश्रावणं

स्कं·पु·२ तु सः द्वितीयः सात्विकश्चायं अस्मान्मत्तो विनश्यति अंष्टोयश्चतियोनिश्च देवानां देवदूतसो अ
यंबसात्विको दोषो मदादस्माद्विनश्यति आवर्तइवंतातस्य जनावर्तैयदाकुलः आवर्ताख्यः स्वयं
२-३४ दोषो राजसः समहामयः भ्राम्याचयन्निरालंबं मनो दोषश्च योगिनः समस्ताधार विभ्रंशाद्भ्रमाख्य
स्तामसो गुणः एतैर्नास्तितयोगास्तु सकलादेवयोनयः उपसर्गैर्महाघोरैरावर्तंते पुनः पुनः प्राप्नुस
कंबलकुक्ष्यो योगीतस्मान्मनोमयं चिंतयेत्परमं ब्रह्म ननु रूपात तत्स्वरूपं मनः आहारासात्विकाश्च
व संसव्यासिद्धिमिच्छिता राजसीस्तामसीश्चैनयोगीसिद्धेन्न कर्हिचित् श्रद्धानेषु दांतेषु श्रोत्रिये
षु महात्मसु सधर्मा दनेपतेषु भिक्षायोग्या च योगिना भैक्ष्यं यवान्नं तक्रं वा पयोयावकमेव वा फलं
मूलं विपक्वं वा कणपिण्याकसक्तवः इत्येते चैव आहारा योगिनां सिद्धिकारकाः मृत्युकालं विदित्वा
च निमित्तैर्योगसाधकः योगयुञ्जीतकालस्य वञ्चनार्थं समाहितः निमित्तानि च वक्ष्यामि ----
मृत्युर्यैव रक्तचर्माम्बरधरा गायंती हसती वयं दक्षिणाशांनयन्नारी स्वप्ने सोपि न जीवति नग्नंक्षप २३४
णकं स्वप्ने प्रसमानं प्रहस्य च एवं च वीक्ष्य वल्गंतं विद्यान्मृत्युमुपागतं ऋक्षवानरयुग्यस्थो गायन्यो

दक्षिणां दिशं याति मज्जेद्थो पंके गोमये चान जीवति केशांगारैर्भस्मभुजंगैर्निर्जलां नदी
एषामन्यतमेः पूर्णं दृष्ट्वा स्वप्ने न जीवति करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः पाषाणैस्ताडितः स्व
प्ने सद्यो मृत्युं भवेन्नरः सूर्योदये यस्य शिवा क्रोशंतीयाति सम्मुखं विपरीतं परीतं वा स सद्यो मृ
त्युमर्छति दिपातिगंधनोयत्तिवमस्येग्रतथानिशि नात्मानं परनेत्रस्थं वीक्ष्यते न स जीवति शृ
क्रायुग्मं चार्धरात्रे दिवा चाहर्गणं तथा दृष्ट्वा मन्येत संक्षीणमात्मा जीवितमात्मवान् नासिका वक्रता
मेति कर्णयोर्नमतोन्नती नेत्रं च वामं स्रवति तस्य तस्यायुरुद्गतं अरक्ततामेति मुखं जिह्वा चाप्य
सिता यदा तदा प्राज्ञो विजानीयादासन्नं मृत्युमात्मनः उष्ट्ररासभयानेन स्वप्नेयो याति दक्षिणं दि
शंकर्णौ पिधायापि निर्घोषं शृणुयान्न च नस जीवेत्तथा स्वप्ने पतितस्य पिधीयते द्वारं न चोत्तिष्ट
ति च स्वभ्राद्दृष्टिश्चलोधिका स्वप्नेग्निं प्रविशेद्यस्तु न च निःक्रमते पुनः जलप्रवेशाद्पि वा तदंतं
च तस्य जीवितं यथापि हन्यते दुष्टैर्भूतैरात्रावथो दिवा स कृतविकृतिर्वापितस्यासन्नो यमांतके दे
वतानां गुरूणां च पित्रोर्ज्ञानविदां तथा निंदा मवज्ञां कुरुते भक्तोमृत्वा न जीवति एवं दृष्ट्वा निमित्ता

स्कं॰ पु॰ २ निविपरीतानि योगवित् धारणां गम्यतास्तास्तु समाधावचलो भवेत् यदिनेच्छंति तत्रस्तु ततो नास्तो प्रपद्य
ते विमुक्तिमवाप्नोति विसृजेद्ब्रह्मरंध्रनि सतिदेहविमुक्तेवा उपसर्गाश्चये पुनः योगिनं समुपायांति श्र
२३५ णुतानपिपांडव ऐशान्यराक्षसपुरयाक्षंगंधर्वएवच ऐंद्रोसौम्यप्राजापत्यब्राह्म्यश्चाष्टसुसिद्धयः भ
वंतिचाष्टौश्रृणुताः पार्थिवाद्याश्चतैजसी वायव्यामात्मिकाचैवमानसाहंभवाभिति प्रत्येकमष्टधाभिन्नाद्विगु
णाद्विगुणाक्रमात् पूर्वचाष्टौचतोषष्टीरंतेश्रृणुचतद्यथा स्थूलतान्हृताबाल्यंवार्धिक्यंयौवनंतथा नानाजा
तिस्वरूपंचचतुर्भिर्देहधारणं पार्थिवांशंविनानित्यमष्टौपार्थिवसिद्धयः विज्ञितेष्वीतलपदेशान्यभवंति
च भूमावितजलेवासोनातुराणमवापिबेत् सर्वत्रवजलप्राप्तिरपिशुष्कंद्रवंफलं धारणंत्रिमिदेहे
स्यनदीवास्थापयेत्करे अव्रणत्वंशरीरस्यकांतिश्चाप्यष्टकंस्मृतं अष्टौपूर्वाद्रुमाचाष्टौराक्षसानांपुरस्मृताः
देहादग्निविनिर्माणंतत्रापभयवर्जनं शक्तिर्दग्धुंचलोकानांजलमध्येग्निज्वालनं अग्निग्रहश्चहस्तेनस्मृ
तिमात्रेणपावनं भस्मिभूतस्यनिर्माणंद्वाभ्यांदेहस्यधारणं पूर्वाषोडशाचाष्टौतेजसायक्षसद्मनि मनो
गतिर्भूतानामंतर्निवेशनंतथा पर्वतादिमहाभारवहनंलीलयैवच लघुत्वंगौरवत्वंचपाणिभ्यांवायुधा

MEMORIAL

रणं अंगुल्यग्रनिपातेनभूमेःसर्वत्रकंपनं एकेनदेहिनिःपत्तिर्गांधर्वैवातसिद्धयः चतुर्विंशतिपूर्वाश्चाप्य
ष्टौवतोश्चसिद्धयः गंधर्वलोकद्वात्रिंशादतऊर्ध्वानिशामय दृश्याविहितनिःपत्तिरिंद्रियाणामदर्शनं आका
शगमनंनित्यमिंद्रियार्थसमस्वयं दूरेशब्दग्रहणंशासर्वशब्दावगाहनं तन्मात्रलिंगग्रहणंसर्वप्राणिनिद
र्शनं अष्टौवातात्मिकाश्चैंद्रेद्वात्रिंशादपिपूर्वकाः यथाकामोपलब्धिश्चयथाकामविनिर्गतं सर्वत्राभिभवश्चै
वसर्वगुह्यनिदर्शनं संसारदर्शनंचापिमानास्यष्टौचसिद्धयः चत्वारिंशतिपूर्वाश्चसौमलोकेस्मृतास्त्विमाः
छेदनंतापनंबंधःसंसारपरिवर्तनं सर्वभूतप्रसादत्वंमृत्युकालजयस्तथा अहंकारोद्भवंचाष्टौप्राजापत्येत्व
पूर्वकाः अकारेणजगत्सृष्टिस्तथानुग्रहमेवच प्रलयस्याधिकारंचलोकचित्रप्रवर्तनं प्रसादस्याभिदंव्यक्तं
निर्वाणंचपृथक्पृथक् शुभेतरस्यकर्तव्यमष्टौबुद्धिभवास्त्विमाः षट्पंचाशत्तथापूर्वाश्चतुःषष्टिरमेगुणाः
ब्रात्म्यपदेप्रवर्तंतेगुह्यमेतत्त्रयेषितं जीवतेदेहमेदेवासिद्धिर्ष्टितास्त्रयोगिना संगोनैवविधातव्योभयास
तनसंभवात् एतान्गुणान्निराकृत्यसंयुंजतोयोगिनःसदा सिद्धयोष्टौप्रवर्तंतेयोगसंसिद्धिकारकाः अ
णिमालघिमाचैवमहिमाप्राप्तिरेवच प्राकाम्यंचतथेशत्वंवशित्वंचतथापरं यत्रकामावसायित्वंमाहेश्वरपद

 स्थितं सूक्ष्मात्सूक्ष्मत्वमणिमा शीघ्रत्वाल्लघिमा स्मृता महिमाशेषपूज्यत्वात्प्राप्तिर्नाप्राप्यमस्य
यत् प्राकाम्यमस्य व्यापित्वादीशत्वं चेश्वरो यतः वशित्वाद्वशिता नाम सप्तमा सिद्धिरुत्तमा य
२३६ त्रेच्छा तत्र च स्थानं यत्र कामावसायिता ऐश्वर्यं पदमाप्तस्य भवंते ता अष्टसिद्धयः ततो न जायते नैव
वर्धते न विनश्यति एषमुक्त इति प्रोक्तो य एवं मुक्तिमाप्नुयात् यथा जलं जले नैक्यं निक्षिप्तमुप
गच्छति तथैव सात्म्यमभ्येति योगिनो ह्यात्मपरात्मना एवं ज्ञात्वा फलं योगी सदा योगं समभ्यसेत् अत्रो
पमां प्याहरंति योगार्थे योगिनो मलाः शशांकरश्मिसंयोगादर्ककांतेरुतथाग्निं समुत्सृजति नैकः स
तु पमा सा तिरो योगिनः कपिंजलारवुनकूला वसंति स्वामिवद्गृहे ध्वस्ते यांत्यनंतो दुःखं नैतेषां सोपमा
यते मंदहि काल्पदेहापि मुखाग्रेण कनीयसा करोति मृद्भागं च यमुपदेशः स योगिनः पशुपक्षिमनु
ष्याद्यैः पुत्रपुष्पफलान्वितं वृक्षं विलुप्यते मानं च स्तुध्या सिध्यते योगि मेत्रः रुरागात्रविषाणाग्रमाल
क्ष्य तिलकाकृतिं स हते न विवर्धते योगी सिद्धिमुपाश्नुते द्रव्यं पूर्णमुपादाय पात्रमारोहते भुवः २३६
तुंगं मार्गं विलोक्यैवं विज्ञानं किं न योगिना तद्गृहं यत्र वसति तद्भोज्यं येन जीव्यते येन निःपाद्यते

चार्थः स्वयं सा ध्येयागसिद्धये तथा ज्ञानमुपासीत योगी यत्कार्यसाधनं ज्ञानानां बहुता येयं यो
गविघ्नकरी हि सा इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत् कपिलस्य सहस्रेण नैवा ज्ञेयमवाप्नु
यात् त्यक्तसंगो जितक्रोधो लघ्वाहारो जितेंद्रियः पिधाय बुद्ध्या द्वाराणि मनो ध्याने निवेशयेत् अहो
रं सालिकं सेवनतं येन विचेतनः स्वादयंतं हि भुंजानो शिरवस्य प्रियातिथिः वाग्दंड कर्मदंडश्च मनो
दंडश्च ते त्रयः यस्यैते नियता दंडाः स त्रिदंडी यतिः स्मृतः अनुरागं जनो याति परोक्षे गुणकीर्तनं
न बिभ्यति च सत्वानि सिद्धेर्लक्षणमुच्यते अलौल्यमारोग्यमनिष्ठुरत्वं गंधः शुभो मूत्रपुरीषमल्पं
कांतिप्रसादः स्वरसौम्यता च योगप्रवृत्ते प्रथमं हि चिह्नं समाहितो ब्रह्मपरोऽप्रमादी शुचिस्तथैकांत
रतिर्जितेंद्रियः समाप्नुयाद्योगमिमं महात्मना विमुक्तमाप्नोति ततश्च योगः कुलं पवित्रं जननी कृता
र्थवसुंधरा भाग्यवती च तेन अबाह्यमार्गे सुखसिंधुमग्नं लग्नं परे ब्रह्मणि यस्य चेतः विशुद्धबुद्धिः
समलोष्टकांचनः समस्तभूतेषु च सन्मनो हियः स्थानं परं शाश्वतमव्ययं च यतिर्हि गत्वा न पुनः प्र
जायते इदं मया योगरहस्यमुक्तमेवविधं गौतमः प्राह योगं तेनेतस्थश्चोपपार्थलिंगसंदर्शनाद

स्कं॰पु॰२ चैनाकल्मषघ्नं यश्चाश्विनेकृष्णचतुर्दशीदिने रात्रौसमभ्यर्च्यतिलिंगमेतत् स्नात्वाअहिल्यासरसिप्रधानेश्रा
द्धादिसर्वंप्रविधायभक्तितः महान्तकौरणविमुक्तपापः सयातियत्रास्तिसगौतमोमुनिः इदंमयापार्थतवप्रणी
२३७ तंगुप्तस्यक्षेत्रस्यसमासयोगात् महात्म्यमेतत्सकलंशृणोतियस्याद्विशुद्धःकिमुवाचिभूयः इतिश्रीस्कंद॰कु॰
गौतमेश्वरमहात्म्यंसप्तपंचाशोध्यायः ५७ श्रीनारदउ॰ अतःपरंप्रवक्ष्यामिब्रह्मेशंलिंगमुत्तमं यस्यश्र
वणमात्रेणवाजपेयफलंलभेत् एकदातुपुरापार्थसृष्टिकामेनब्रह्मणा तपःसुचरितंघोरंसार्धवर्षसहस्र
कं तपसातेनसंतुष्टःपार्वतीपतिशंकरः वरमस्मैततःप्रादाल्लोककर्त्रेस्वयंस्थितं ततोहृष्टप्रमुदितः
कृतकृत्यपितामहः ज्ञात्वाक्षेत्रस्यमाहात्म्यंस्वयंलिंगंचकारह चखानचसरःपुण्यंनाम्नाब्रह्मसरःशुभं मही
नगरकात्पूर्वेमहापातकनाशनं अस्यतीरेमहालिंगंस्थापयामासवैप्रभुः तत्रदेवस्वयंसाक्षाद्विद्यतेकि
लशंकरः पुष्करादधिकंतीर्थंब्रह्मेशंनामफाल्गुन तत्रस्नात्वानरोभक्त्यापिंडदानंसमाचरेत् दानंचैवय
थाशक्त्याकार्तिक्यांचविशेषतः दैवंप्रपूज्ययद्भक्त्याब्रह्मेशंहृष्टमानसः पितरस्तस्यतुष्यंतियावदाहूतसं २३७
प्लवं पुष्करेषुचयत्पुण्यंकुरुक्षेत्रेरविग्रहे गंगादिपुण्यतीर्थेचयत्फलंप्राप्यतेनरः तत्फलंसमवाप्नोतितीर्थ

स्यास्यावगाहनात् मोक्षलिंगस्यमाहात्म्यंशृणुपार्थमहाद्भुतं मयास्थानहितार्थंचसमाराध्यमहेश्वरं दर्भा
ग्रेणततःपार्थकूपंखनितवाहनं प्रसाद्यलोककर्तारंब्रह्माणंपरमेष्ठिनं कमंडलोब्रह्मणश्चसमानीतासर
स्वती कूपस्मिन्मोक्षनाथस्यलोकानांप्रेतमुक्तये कार्तिकस्यतुमासस्यशुक्लपक्षेचतुर्दशी कूपेस्नात्वानरस्त
स्यांतिलपिंडसमाचरेत् प्रेतानुद्दिश्यनियतंमोक्षतीर्थफलंलभेत् कुलेनजायतेतस्यप्रेतोपार्थमसंशयः
प्रेतानांमोक्षंप्रगच्छंतितीर्थस्यास्यप्रभावतः जयादित्येकूपवरेनरःस्नात्वाप्रयत्नतः गर्गेश्वरंनमस्कृत्यनसग
र्भेषुमज्जति महात्म्यमतत्सकलंशृणोतियस्याद्विशुद्धःकिमुवाचिभूयः इदंमयापार्थतवप्रणीतंगुप्तस्य
समासयोगात् इतिश्रीस्कंदपुराणेकुमारिकाखंडेब्रह्मेश्वरादिमाहात्म्येअष्टपंचाशोध्यायः ५८
अर्जुनउ॰ गुप्तक्षेत्रमिदंकस्मात्कस्माद्ब्रूहिचनारद यस्यप्रभावःसुमहान्नैवंकस्यापिसंश्रुतः श्रीनारदउ॰
पुरातनामत्रकथांगुप्तक्षेत्रस्यकारणे शृणुपांडवशापेनगुप्तमासीदिदंवच पुरानिमित्तकस्मिंश्चित्सर्वती
र्थादिदेवताः प्रणामायाब्रह्मसदोब्राह्मणसहिताययुः पुष्करस्यप्रभासस्यनैमिषस्यार्बुदस्यच कुरुक्षेत्र
स्यक्षेत्रस्यधर्मारण्यस्यदेवताः वस्त्रापथस्यक्षेत्रस्यफल्गुतीर्थस्यचापियाः केदारस्यतथान्येषांक्षेत्राणांत्रिकोटि

स्कं॰पु॰२ नाधिपाः सिंधुसागरयोगस्य महीसागरकस्य च गंगासागरयोगस्य अधिस्तूपरिकस्य च गंगा
रेवा मुनीनां च नदीनामधिदेवताः शोणह्रदपुरोगाणां ह्रदानां चाधिदेवता तेसर्वे संघशोभला
२३८ श्चाग्रतानायमुत्तमः समुपाजमुरमलां महतीं ब्रह्मणः सभां तत्रतीर्थानि सर्वाणि समायाता
नि स्वर्वासिः उत्तस्थौ सहितः सर्वैः सभासद्भिः पितामह प्रणम्य सर्वतीर्थेभ्यः प्रबद्धकरसंपुटः
तीर्थानि भगवानाह विस्मियास्फुललोचनः अघनः सब्रह्म कलं युष्माभिरितिपावितं वयं च पावि
भूता योयुष्माकं दर्शनादपि तीर्थानां दर्शनं श्रेयः स्पर्शनं स्नानमेव च कीर्तनं स्मरणं वापि न
स्यात्पुण्यं विनात्परं महापापान्विता राजाः स्वपियस्युः सुनिष्टुराः तेपि तीर्थप्रपूयंते किंपुनर्ध
र्मसंस्थिताः एवमुक्त्वा पुलस्त्यं सपुत्रमभ्यादिदेशाह शीघ्रमर्घं तीर्थहेतोः समानय यथार्चये
पुलस्त्य उ॰ असंख्यातानि तीर्थानि दृश्यंते पद्मसंभव यथादिशसि मां तात अर्घमेकमुपानये धर्म
प्रवचनेश्लोकोयत एष प्रगीयते मेवे युर्युदसंख्याता अर्घयोग्या समर्चने ततस्तेषां वरिष्टा २३८
यदा तव्यार्घः किलकनः श्रीब्रह्मा उ॰ साभिप्रायं साधु वत्स त्वया प्रोक्तमिदं वचः एतं गुरुघचार्घ

कमानयस्व सुशीघ्रतः ततः पुलस्त्यो वेगेन समानिन्ये र्घमुत्तमं तं च ब्रह्मा करे गृह्य तीर्थान्याह ति
भारती सर्वैर्भवद्भिः संहत्य मुखास्ते कं प्रकीर्त्यते तस्मै चार्घ प्रयच्छामि नैवमामनयस्प्रशत तीर्था
न्यूचुः न वयं श्रेष्ठतां विघ्नः कथं च न परस्परं अस्माभिर्तोश्च संप्राप्ति ज्ञोत्वादेहि त्वमेव तत्त श्रीब्रह्मा
उवाच नाहं वेद्मि श्रेष्ठतां वः कथं च नन मोस्तु वः सर्वे चापरमाहात्म्याः स्वयमेव वक्तुमर्हथ यत्र गंगा ग
या काशी पुष्करं नैमिषं तथा कुरुक्षेत्रं तथा रेवा महीसागरसंगमः प्रभासाद्यानि शतशो यत्र न स्तत्र का
मतिः एवमुक्ते पद्मभुवा कोपि नावाच किंचन चिरेणेदं ततः प्राह महीसागरसंगमः मेमेन मर्वत्वं
व चदे तुरानन शीघ्रतः यतः कोटिकल्पायां वा ममकोपि न पूर्यते यतश्चेंद्रद्युम्नराज्ञा ताप्यमाना व
सुंधरा सर्वतीर्थद्रवीभूता मही वामामवन्नदी सा च सर्वाणि तीर्थानि संयुक्ता च मया सह सर्वतीर्थ
मयस्तस्मादस्मिन्ख्याता जगत्त्रये गुहेन च महालिंगं कुमारेश्वरमीश्वरं संस्थाप्य मुख्यतीर्थत्वं मम
दत्तं महात्मना नारदेनापि मत्तीरे स्थानं संस्थाप्य शोभनं सर्वेभ्यः पुण्यक्षेत्रेभ्यो दत्तं श्रेष्ठ्यं पुरा मम
एवं त्रिभिर्हेतुवरैर्मे मेवार्घप्रदीयतां गुणैकदेशेपि समं ममनी तीर्थं नैव परं इत्युक्ते वचने तत्र तीर्थराजे

स्कं.पु.२ नभारत सर्वे नोचुः किंचनापि किं ब्रह्मा वक्ष्यतीतियत् ततो ब्रह्मसुतो ज्येष्ठः श्वेतमाल्यानुलेपनः दक्षिणं बा
हुमुद्धृत्य धर्मं वीचनमब्रवीत् अहो कष्टमिदं कृतं तीर्थराजेन मोहतः सतोपि न गुणा वाच्याः स्वयं सद्भिः स्व
२३९ कायतः स्वीयान् गुणान् स्वयं यो हि संसमुपक्षिपन्यराट् भवती राजसस्त्वेषम्यहंकारो जुगुप्सितः तस्मादस्मा
दहंकारात्तत्त्वप्येषु गुणेषु च अप्रख्यातं ध्वस्तरूपं इदं तीर्थं भविष्यति स्तंभतीर्थमिति ख्यातं स्तंभो गर्वकृ
तायतः स्तंभस्यापि फलं सद्यो ब्रह्मापि प्राप किं परः इत्युक्ते धर्मदेवेन हाहेति खं उत्थितः तत्र शीघ्रं समाया
तो योगीशोहं च पांडव गुहस्ततो वचः प्राह धर्मं देहसमागमे अयुक्तमेतच्छापोयं दत्तोय धर्मधार्ष्ट्यता ब्रवी
तु कापि सर्वेषां तीर्थानां लोकेषु वर्तते यद्यैश्वर्यं नार्हतो सोमहीसागरसंगमः तिष्ठ नात्मागुणा यच्च तीर्थरा
जेन वर्णितः तत्रैकोपि गुणो नाममिथ्यावोदितस्ते गुणः अहो नियुक्तपालानां यदितेप्याविमृश्य च एवमर्था
न्करिष्यंति कं यातिशरणं प्रजाः एवमुक्ते गुहेनाथ धर्मो वचनमब्रवीत् सत्यमेतद्यदाहायं महीसागरसंग
मः मुख्यत्वं सर्वतीर्थानां मर्घश्चापि पितामहात् किं तु नाम गुणा वाच्याः सतामेतत्सदा व्रतं परक्षेपः स्वप्रशं २३९
सा ब्रह्माणमपि चालयेत् स्वप्रशंसां प्रकुर्वाणः परोक्षेपरसन्विता किंदिवाः पृथिवी पूर्वं ययातिर्न पपात ह या

नि पूर्वं प्रमाणानि कृतानि त्वेन धीमता तानि संपालनीयानि तानि कोतिक्रमेद्बुधः तवपित्रा समादिश्य यदर्थं
स्थापिता वयं पालयामः सदा तच्च त्वं च पालितुमर्हसि ईश्वरा स्वप्रमाणेन भवंतो यदि कुर्वते तदस्माभिरिदं यु
क्तं त्वारनं स्थाप्यतां वरः एवमुक्त्वा स्वयं मुद्रां मोनु कामं वृषं तदा अहं प्रस्थाप्य मन्विश्य वाक्यमेतदुदीरय
धर्मो धर्माय महते विश्वधात्रे महात्मने ब्रह्मविष्णुगिरीशैर्नित्यं पूजिताय च नाम्ने यदि मुद्रां भवान् धर्मप
रिलक्षति कर्हिचित् तदस्माकं कुतो भावो माविश्वनाशयप्रभो योगीश्वरं गुहं चापि सन्मानयितुमर्हसि शि
वव न्मानन्नियो हि यतः साक्षाच्छिवात्मजः लोचं देवा गुहः स्वामी समानयितुमर्हसि युवयोरैक्यभावेन सुखं जी
वेदिदं जगत् त्वया प्रदत्तशापोयमास्त प्रख्याति लक्षणः अनुग्रहश्च क्रियतां तीर्थराजस्य नारद एवमु
च्चरमाणं मां प्रशस्याहापि पद्मभूः साध्वेतं नारदेनोक्तं धर्मैतद्वचनं कुरु संमानय गुहं चापि गुहः स्वामी य
तो हि नः एवमुक्ते ब्रह्मणा च धर्मो वचनमब्रवीत् नमो गुहाय सिद्धाय किंकरायस्ये वयं मदीयां स्कंद विज्ञ
प्तिं नाप्तेनामवधारय स्तंभोदतन्महातीर्थं अप्रसिद्धं भविष्यति स्तंभतीर्थमिति ख्यातं सर्वतीर्थफलप्रदं
यश्चात्र स्नानदानादि प्रकरिष्यति मानवः यथोक्तं च फलं तस्य स्फुटं सर्वं भविष्यति त्रानिवारत्वमा वास्यां भव

तेषां फलं हि यत् महीसागरयात्रायां भवेत्तच्चावधारय प्रभासदशयात्राभिः सप्तभिः पुष्करस्य च
अष्टाभिश्च प्रयागस्य तत्फलं प्रभविष्यति पंचभिः कुरुक्षेत्रस्य नकुलीशस्य च त्रिभिः अर्बुदस्य च
२२०
यत्षड्भिस्तत्फलं च भविष्यति, कन्यायाः षड्भिर्यथा यस्या गोदावर्याश्च पंचभिः तत्फलं स्तंभतीर्थे वै ग्रानि
दृष्टे भविष्यति वस्त्रापथस्य तिसृभिर्गंगायाः पंचभिश्च यत् कूपोदर्याश्चतुर्भिश्च तत्फलं प्रभविष्यति
एवं दत्ते वरे स्कंदस्तदा प्रीतमना भवेत् अत्रापि स्तंभतीर्थाय ददौ वर्षं समाहितः ददौ च सर्वतीर्था
नां श्रेष्ठत्वममितद्युतिः तीर्थानि च गुहं नार्थं सन्मान्य विससर्ज सः एवमेतत्सुराख्यातं गुप्तक्षेत्रस्य
कारणं भूयश्चापि प्रसिध्यर्थं प्रेषितास्सरस्रोत्रमे विमोक्षिता याह रूपास्तया ताश्च कुरुद्वह यंतो
धर्मस्य सर्वस्य नानारूपैः प्रवर्तितः परित्राणाय भवतः कृच्छ्रस्य च मयैव भवे तदिदं वर्णितं तुभ्यं स
र्वतीर्थफलं महत् श्रुत्वेतदादितः सर्वं पुमान्पापैः प्रमुच्यते श्रुत्वेति विजयो धीमान् प्रशांसस्सुवि
स्मितं विसृष्टो नारदाद्यैश्च द्वारकां प्रति जग्मिवान् इति श्री स्कंदपुराणे कु० अर्जुनतीर्थयात्रा समाप्तः २२०
शौनक उ० इत्युक्तमिदं सूत गुप्तक्षेत्रस्य पावनं महन्माहात्म्यमतुलं कीर्तितं हर्षवर्धनं पुनर्यसिद्धि

लिंगस्य पूर्वमाहात्म्यकीर्तिते इत्युक्तं यत्प्रसादेन सिद्धमातुस्तु सेत्स्यति विजयो नाम पुण्यात्मा सा
हाय्यं चंडिलस्य च कोन्यसौ चंडिलो नाम विजयो नामकस्तथा कथं च प्राप्तवान्सिद्धिं सिद्धमातुः प्रसा
दतः एतदाचक्ष्व तत्त्वेन श्रोतुं कौतुहलं हि नः सतां चरित्रश्रवणे कौतुकं कस्य का भवेत् उग्रश्र
वा उ० साधु पृष्टमिदं विप्रा दुरंतारतमप्युत श्रुतां द्वैपायनमुखात्कथां वक्ष्यामि चात्र वः पुरा द्रुपद
राजस्य पुत्रीमासाद्य पांडवाः धृतराष्ट्रमतेः पश्चादिंद्रप्रस्थं न्यवेशयत् रक्षिता वासुदेवेन कदाचि
त्तत्र पांडवाः उपतिष्ठासभामध्ये कथाश्च कुः पृथग्विधाः देवर्षिपितृभूतानां राज्ञां चापि प्रकीर्तिते
क्रियमाणे यथ तदा गांगेय पुत्रके दोत्कच त दृष्ट्वा भ्रातरः पंच वासुदेवश्च वीर्यवान् उत्थाय सह
सा पीठाद्दोर्लिंगितु मुदायुधाः स च तान्प्रणतः प्राह दो वंदे भीमनंदनः सापि रेवतं ताराज्ञा
स्त्वोत्संगउपवेशितः आघ्राय स्नेहतो मूर्ध्नि प्रोक्तश्च जनसंसदि युधिष्ठिर उ० कुत आगम्यते पुत्र
कच्चायां विहितस्त्वया काले कच्चित्सुखं राज्यं कुरुषे मातुले हते कच्चिद्द्वेषु विप्रेषु गोषु साधुषु
सर्वदा हेडंबेनाप कुरुषे प्रियमेन क्षरेश्च नः हिडिंबस्य वनं सर्वं तस्य ये सैन्यराक्षसाः पाल्यमाना

स्कं·पु·२ त्वयासाधोवर्धतेजनक्षेमकाः क्वचिन्नंदतितेमाताभृशंनःप्रियकारिणी कन्येवयापुराभीमंतत्कामानंप
रिश्रुत्वा इतिपृष्टोधर्मराजास्मरन्हेडंबिरब्रवीत् हतेतस्मिन्दुराचारेमातुलंस्मिनियोजितः तद्राज्यंत्वा
२२३ सनेस्थाप्यदुष्टानिघ्नंश्चरामिच मातांकुशलिनीदेवीतपोदिव्यमुपाश्रिता मामुवाचसदापुत्रपितृणांभक्ति
द्भव सोहंमातुर्वचःश्रुत्वामेरुपादासमागतः प्रणामोयेवभवतांभक्तिप्रह्वेणचेतसा अत्मानंचमहत्स
र्थकस्मिश्चिन्नानियोजितं भवद्भिरहमिच्छामिफलंयस्मादिदंमतं यदाज्ञापालनंपुत्रापितॄणांसर्वदाचरेत्
तेनोर्ध्वलोकान्सजयेदिहजायेश्चकार्तिमान् सूतउ० इत्युक्तवंतंतंराजापरिरभ्यपुनःपुनः उवाचधर्मराट्पु
त्रमानंदाश्रुसगद्गदं त्वमेवैनोभक्तिकारीसहायश्चापिवर्तसे एतदर्थंचहेडंबेपुत्रानिच्छंतिसाधवः
दुःहामुन्नतारयंतेताद्दृशाश्चापिपुत्रकः अवश्यंयादृशीमातातादृशस्तनयोभवेत् माताचतेभक्तिमती
दृढंनस्त्वंचताद्दृशः अहोसपुरकंदेवीकुरुतेमेप्रियावधूः याभर्तृप्रियमुल्लंघ्यतपएवसमाश्रिता नूनं
कामंनभोगैर्वारूपबध्वानिममबाक् यापुत्रमुखमन्वीक्ष्यपरलोकार्थमास्थितः दुःकुलीनाप्रियाभक्तास् २२३
तेपलंचभक्तिमत् कुलीनमेवतन्मन्येमामिदंमतमुत्तमे एवंबहूनिवाक्यानितानितानिवदन्नृपः धर्म

राजसमाभाष्यकेशवंवाक्यमब्रवीत् पुंडरीकाक्षजानासियथाभीमादभूदयं जातमात्रस्ययस्यासीद्यौवन
स्तोबभूवह अष्टानांदेवयोनीनांयतोजन्मचयौवनं सघएवचभवेत्तस्मात्तद्योस्यास्तीतियौवनं तदास्यो
चितदारार्थेसदाचिंतास्तिकृष्णमे उचितंवतहेडंबेःकलत्रप्रदृश्यते तद्भवान्कृष्णसर्वज्ञस्त्रिलोकीमपिवेत्सि
च हेडंबेरुचितान्दारान्वक्तुमर्हसियादृशी एवमुक्तोधर्मराज्ञाक्षणंध्यात्वाजनार्दनः धर्मराजमिदंवाक्यं
पदांतरमथाब्रवीत् अस्तिराजन्प्रवक्ष्यामिदारामस्योचितांशुभां सांप्रतंसंस्थितारम्येप्राग्ज्योतिषपुरेवरे
साचपुत्रीमुरोःपार्थदैत्यस्याद्भुतकर्मणः यासौनरकदैत्यस्यप्राणतुल्यसखाभवत् सचेमेनिहतोघोरःपाश
दुर्गसमन्वितः नरकश्चदुराचारस्तेमेताद्दूत्रिवर्ततः ततोहतेमुरौदैत्येमयातस्यसुतांव्रजत् याद्भुमानति
वीर्योसाघोराकामकटंकटा तांतत्राहंमहायुद्धेखड्गखेटकधारिणीं अयोद्दयंमहाबाणैःशार्ङ्गधनुषनिः
सृतैः खड्गेनच्छिदेबाणान्ममसाचमुरोःसुता समागम्यचखड्गेनगरुडंमूर्ध्न्यताडयत् सचमोहसमाविष्टो
गरुडोभूद्द्वेतनच ततस्तस्यावधार्थायमयाचक्रंसमुद्यतं चक्रंसमुद्यतंदृष्ट्वामयातस्मिन्रणाजिरे का
मारव्यानाममांदेवीपुरस्थितावचाब्रवीत् नैनाहंतुंभवानर्हेरक्षिनोपुरुषोत्तमः आजयंतुमयाप्यस्यादत्तंरव

स्क॰पु॰२ ङ्कं च खेटकं बुभुक्षितप्रतिमाचापि शक्तिश्चपरमारणे ततस्तयात्रिरात्रं पि न जीतासीन्मुरोसुता
एवमुक्ते तदा देवी वचनं चाम हाद्भुतं अथमेषनिवृत्तोस्मि वारयेनां च त्वं शुभे ततश्चालिंग्य
२२२ तां भक्तां कामाख्या वाक्यमब्रवीत् भद्रे रणान्निवर्तस्व नायं हंतु कथं च न शक्यके नापि समरे
माधवेरण दुर्जयः नाभूदस्ति भविष्यो वा यएनं संयुगे जयेत् अपि चास्यं च कः पुत्री नैनं शक्तः
कुतोन्यकः तस्मादेनं नमस्कृत्य भाविनं श्वशुरं शुभे रणात्स्त्वं निवर्तस्व तवोचितमिदं स्फुटं
अस्य भ्रातुर्हि भीमस्य स्नुषात्वं च भविष्यति तस्मात्त्वं श्वशुरं भद्रे सन्मानय जनार्दनं नच शोकः
स्त्वयः कार्यः पितरं प्रति पंडिते जातस्य हि ध्रुवं मृत्युर्ध्रुवं जन्म मृतस्य च बहवः शास्त्रवेत्तारो व
दके नापि वार्यते ऋषयश्च देवांश्च महासुरांश्च त्रैविद्यवृद्धान्सुरूपान्नृपांश्च कालः सुरकोनपेत्त
त कालेपरावरज्ञोत्र न तुल्यते क्वचित् श्लाघ्य एव हि ते मृत्युः पितुरस्माज्जनार्दनात् सर्वपातक
निर्मुक्तो गतोसौ धाम वैष्णवं एवं कामाख्यया प्रोक्ता सा च कामं कटंकटा स क्रोधं च स वसन २२२
गात्राणि प्रणता च मां तामहं साशिषं चापि प्रवोचं भरतर्षभ अस्मिन्नेव परे तिष्ठ भगदत्तेन पूजि

ता मया दिव्यात्र पृथ्व्यात्र भगदत्त कृपो नृपः स ते पूजां बहुविधां करिष्यति स्वसुर्यथा वसंति
चात्र तं वीर हैडंबं पतिमाप्स्यसि एवमाश्वास्य तां देवी मुरोदयं मोर्वी सर्जयं सास्थिता च पुरे तत्र
गतोहं शक्र सद्म च ततो द्वारवतीं प्राप्य त्वया सह समागतः एवमेषोचिता चोरा हैडंबं वेद्यते शु
भा कामाख्या चरणे घोरा या विद्युदिव भासते न च रूपं वर्णितुं मे स्वसुरस्योचितं सुतः साधा
र्हि नेत दुचितं सर्व स्त्रीणां च वर्णनं पुनरेकश्च समयः कृतस्तं शृणुयस्तथा यो मां निरुत्तरां प्रश्न
कुलैव विजयेत्सुमान् यो मे प्रति बलश्चापि स मे भर्ता भविष्यति एनं च समयं श्रुत्वा बहवो दैत्यरा
क्षसाः तस्या जयार्थमगमं स्तेचाजिता हतास्तथा यो यं येनांगतः पूर्वं न सभ्युपान्य वर्तितां व
न्हेरिवप्रभां दीप्तां पतंगानां समुच्चयः एवमेतादृशी मौर्वी जेतुमुत्सहते यदि घटोत्कचो महावी
र्यो भार्या स्यान्नियतं भवेत् युधिष्ठिरउ॰ अलं सर्वगुणैस्तस्याप्यमास्त्वेको गुणो महान् क्रियतां किं
हि क्षीरेण यदि तद्विषमिश्रितं प्राणाधिकं मे मसैनिं कथं केवलसाहसात् क्षपयं तत्र वाक्यानां
शुश्रूषानां चाप्य कोविविदं अन्या अपि स्त्रियः संति देशदेशे जनार्दन बह्व्यस्तासां वरां कांचिद्यो षितं व

कुमर्हसि भीमउवाच सम्यगुक्तं केशवेन वाक्यं बह्वर्थमुत्तमं राज्ञापुनस्नेहवशाद्युक्तं तन्नमातिमे का
र्ये दुःसाध्य एव स्यात्क्षत्रियस्य पराक्रमः सिंहस्येव च यूथेषु गजानां नमृगेषु च अत्मा प्राख्यातिमानेषः स
र्वेषां वीरपुंगवैः सात्वख्याति कथं जाये दुःसाध्यकरणादिति नह्यात्मवर्णनं पार्थ हैडंबेरस्य लक्षणं येन दै
तः स्वयं धात्रा स एनं पालयिष्यति सर्वथा च पदारोहेयत्रः कार्यो विजानता तन्न सिध्यति चेद्दैवान्नासौ दो
षो विजानतः यथा देवव्रतस्त्वेको जान्हकाशीसुतापुरा तथैक एव हैडंबेमो वीर्यं प्राप्नोति माचिरं अर्जुनउ॰
केवलं पौरुषवरं भीमेनोक्तमिदं वचः अबलं दैवहेतुत्वात्स बलं प्रतिभाति मे नम्रषाहि वचो ब्रूते कामा
ख्याया पुराब्रवीत् भीमसेनसुतः पाणिं तव भद्रे करिष्यति अनेन हेतुनायातु शीघ्रं तत्र घटोत्कचः इति मे
रोचते कृष्ण ब्रूहि किं तव रोचते श्रीभगवा॰ रोचते मे वचस्तुभ्यं भीमस्य च महात्मनः नहि तुल्यो भैमसेने बुद्धि
वीर्ये च कश्चन अंतरात्मा च यो वक्ति प्राप्ता मे वसुरोसुतां तच्छ्राघ्यं यातु हैडंबस्त्वं च कं पुत्र मन्यसे घटोत्क
चउ॰ नहि न्याय्या स्वका वक्तुं पूज्यानामग्रतो गुणाः प्रवृत्ता एव भासंते सद्गुणाश्चरवेकराः सर्वथा तत्करि
ष्यामि पितरो येन येमलाः लज्जिष्यंति न संसत्सु मया पुत्रेण पांडव एवमुक्त्वा महाबाहुस्ताप प्रणनाम तान्

DR. BHAU DAJI MEMORIAL

याम शीर्भिश्च पितृभिर्वर्धितो गंतुमैच्छतः तं गंतुकामामाहेदं मभिनंद्य जनार्दनः कथा कथन कालेमां स्म
रेथा स्त्वं जयावहां यथा बुद्धिसु दुर्मेधां वर्धयामि बलं च ते इत्युक्त्वालिंग्य तं कृष्णो विसर्जयत साशिषं ततो
हैडं वातनयो महौजाः सूर्याक्षकालाक्ष महोदरानुगः वियत्सथं प्राप्य जगाम तत्पुरं प्राग्ज्योतिषं नाम दिनव्य
पाये इति श्रीस्कंदपुराणे॰कुमा॰नवपंचशोध्यायः ५९. सूतउ॰ सोथ प्राग्ज्योतिषाद्बाह्ये महोपव
नसंस्थितं सहस्रभौमिकं गेहमपश्यत्त हिरण्मयं वेणुवीणामृदंगानां निःस्वनैः प्रतिपूजितं दत्रासहस्रसं
ख्याभिश्चेटीभिराभिभूषितं आयाद्भिः प्रतियाद्भिश्च भगदत्तस्य किंकरैः किमिच्छतीति भगिनी पृच्छकैरभिपूरि
तं तदासाद्य स हैडंबिर्मेरोः शिखरवद्गृहं द्वारिस्थितां ददर्श सा देकर्णप्रावरणां सखीं तामाह ललितं वीरो
भद्रे साक्षमुरो सुता कामुको द्रष्टुमिच्छामि दूरदेशात्तो गतोतिथिः कर्णप्रावरणोवाच किं तवास्ति महाबाहो
तया मौर्व्या प्रयोजनं कोटिशो हि हता पूर्वं यया कामुक कामुकाः तव रूपमहं दृष्ट्वा घटहासं महोत्कचं प्रण
म्य पार्श्वया वीरस्थितेवचनं करी तन्मया सह सोदस्व भुंक्ष्व भोगांश्च कामुक तवाप्यनुचराणां हि दास्यामि
तिस्त्रोणां प्रियाः घटोत्कच॰ कल्याणि किंचदंतिते प्रयुक्ता स्वा वितां शुभे पुनर्नैतद्वचस्तुभ्यं विपते मम चेतसि

स्कं॰पु॰२ वामः कामायते भद्रे यस्मिन्नुपनिबध्यते स चात्रैनैव बध्नाति तद्वयं किं प्रकुर्महे अद्य ते स्वामि
निर्दिष्टा जीता वा कीर्तिता मया तया वा विजिता यास्य पूर्वेषां कामिनां गतिं कर्णप्रावरणेत स्माच्छी
२२४ घ्रमेव निवेदितां यथा दर्शनमात्रेण पूजयस्यतिथिं खलु इति मे मेर्वचः श्रुत्वा प्रसवन्ती नि
शाचरी प्रासादशीघ्र राया स्त्री मोर्णीमिवं वचोदयत देवी कोपीयुवा श्रीमां स्त्रैलोक्ये प्यमितप्रभः
कामातिथिस्त्वद्द्वारि वर्तते दिशितत्परं कामकटं कटाउ॰ उच्यतां शीघ्रमौ वासो विमर्थ वा विलं
ब्यते कदाचिद्दैवसंगत्या समयो मेभिपूर्यते इत्युक्तवचना च्छोटी प्राप्या बोच घटोत्कचं व्रज शी
घ्रं कामकलं तस्याम् सोश्वसंनिधौ इत्युक्तः सप्रहस्यैव तत्रात्मज्यस्वकानुगान् प्रविवेशाग्रहं
मेमिःसिंहो मेरुगुहामिव स पश्यं सुकसंघाता न्यापापतवरां तथा सारिकाश्च मदोन्मत्ताश्चैवस्त
श्चाप्यपश्यत रूपेणवयसा चैव रतरप्परातिकरि आदोलकसुखासीनां सर्वाभरणभूषितां
तां विद्युतमिवोन्नद्धां दृष्ट्वाभिनिर्चितयत अहो कष्टं न पित्रामि निर्दिष्टेयं ममोचिता भाव्यमतल्कि
त पूर्वं दृष्टायत्कामिनां गणाः शरीरं क्षयपर्याप्तं क्षीयंते यदि कामिनां कामिनीनां कृते येषां क्षीयतां गण

नात्र का एवं बहुविधं कामिश्चिंतयं नाहमन्मयः निष्ठुरे वज्रहृदये प्राप्तोहमतिथिः स च उचितातस्त
तां पूजां कुरुयां ते हरिश्चिता धिगहयन्मया पूर्वं समयः सकृतो भवत न कृतो भव्यदि पुरा अभवि
ष्यदसौ पतिः इति संचिंतयंती सा भैमि वचनमब्रवीत वृथा त्वमागतो भद्र जीवन याहि पुनः सु
खी अथ कामार्य समां त्वं तत्कथां शीघ्रमुच्चर कथामाभाष्य यदि मां संदेहे पातयिष्यति ततो हं वश
गा जाता हतो वा स्वपप्यसि मया स्मृतउ॰ इत्युक्तवचनो मत्तां नेत्रां पातेन वीक्ष्य सः स्मृत्वा चराचरं गु
रुं कृष्णमारभ्यवान्कथां कस्यांचिद्भवत्स्यांयुनाकोप्यजितेंद्रियः तस्यैवैकासुता जज्ञे भार्या चापि
मृताभवत ततो बालिकां कीर्तिपुत्रीं पुपोष चरर क्ष च सायदाभ्रैवोवनगाव्यं जिता वनवाशुभा त्रो
ल्लसत्कच मध्यांगी प्रोत्फुल्लमुखपंकजा तदापि कामलुलितमालानं प्रजहो मनः ज्ञानाचतां चतन
यां समालिंग्यउ शशयः प्राति नश्नकपुत्री त्वं मया निलात्रपोषिता भार्यार्थं सुचिरं कालं तत्कार्यं
साधयस्व प्रिये इत्युक्ता सा च मेने ता तत्तथैव च स्तदा पतित्वेन च भेजे तं भार्यात्वेन सतां तथा ततस्त
स्यां सुता जज्ञे तस्मान्मदनरासभात वदस्वात स्य भवति किं दौहित्री सुताथवा एवं प्रश्नं मम ब्रूहि

स्कं॰पु॰२ शाघ्नं ते शक्तिरस्तिते इति प्रश्नं च सा श्रुत्वा चिंतयन्त्यक्रुधा हृदि न च पश्यति निर्धारं प्रश्नस्यास्य कथंचन
ततः प्रश्नेन विजिता स्वां शक्तिं समुपाददे अतो देयरुक्मरज्जुकाराभ्यां दोलकस्य च ततो रक्षांसि निःपुतुको
२२५ टिशो भिषणान्यति सिंहव्याघ्रावराहाश्च महिषाश्चिव कामगा समीक्ष्य तानसंख्येयान्वादितं धावतोरुषा
अवादयन्त्वोभीर्भीमैः कनिष्ठांगुष्ठेनोहसन् ततो विनिःसृतास्तत्र द्विगुणा राक्षसादयः तैर्मौर्वीनिर्मितास्सर्वे
क्षणादेव समभक्षिता विजितायां स्वशक्तौ च बलशक्तिमथाददे उत्थाय सहसा दोलात् वक्रमादातुमैच्छत
उत्तिष्ठति च तां भीमी रनुसृत्य जवादिव केशेष्वादाय सव्येन पाणिना पातयन्भुवि ततः कंठे सव्यपादं दत्वा
दायच कीर्तिकां दक्षिणेन करेणास्याछेत्तुमैच्छत नासिकां विस्फुरंति ततो मौर्वीमिंदमाह घटोत्कचं प्र
श्नेन शक्त्या च बलेन नाथ त्रिविधा लयाहं जीविता नमस्ते तन्मुखं च मां कर्मकरीं तवास्मि समादिश प्रकरो
मि तच्च घटोत्कच उ॰ यद्येवं तर्हि मुक्तासि भूयो दर्शय यद्बलं एवमुक्ता मुमोचैतां मुक्ता चाह प्रणम्य सा जा
नामि त्वां महाबाहो वीरं शक्तिमतां वरं सर्वराक्षसभर्तारं त्रैलोक्ये चातिविक्रमं गुह्यकाधिपतिस्त्वं हि काल २२५
नाम इति स्मृतः षष्टिकोटिपतिर्जातो जयरक्षाकृते भुवि इति मां प्राह कामाख्या सर्वं तत्संस्मराम्यहं इदंगो

हंसानुगं मे दत्तमप्यात्मना तव समादिश प्राणनाथ कर्म किं करोमि ते घटोत्कच॰ प्रच्छन्नस्तत्र घटते न
विवाहः कथंचन मौर्वी यस्य हि वर्तते पितरो बांधवास्तथा तस्माच्छीघ्रं वह शुभे शक्रप्रस्थाय सप्रति अयं कु
लक्रमोऽस्माकं यद्भार्यापतिमुद्वहेत् तत्रानुज्ञां समासाद्य परिणेष्यामि त्वामहं सूत उ॰ भगदत्तमथो नाथं त
तो मौर्वी न्यवेदयत् समादाय बहुद्रव्यं विससर्जाथ भारत ततः स्कंधं समारोप्य घटोत्कचमनिंदिता ना
नाद्रव्यपरिवारा शक्रप्रस्थं समाव्रजत् ततो सौ वासुदेवेन पांडवैश्चाभिनंदितः उद्वह्य तां तद्धनैश्च तर्पया
मास पांडवान् कुंती च द्रौपदी चाभौ मुमुदाते नितांतं च मंगलान्यस्य चक्राते मौर्वीश्च धनतर्पिते ततो विवा
हनिर्वृत्ते प्रतिपूज्य घटोत्कचं भार्यया सहितं राजा स्वराज्य स्वराज्याय समादिशत् सोप्याज्ञां शिरसा गृह्य
हैडंबि भार्ययान्वितः शुभं हिडंबस्य वचनं सराज्यं समुपाव्रजन् ततो राक्षसयोषाभिर्विरकास्यैः प्रवर्धितः
महात्मा वनमहतां स्वराज्यं प्रमुमोद सः ततो वनेषु चित्रेषु निम्नगापुलिनेषु च रेमे सह तया भैमिर्महार्ये द
यराणव एवं विक्रीडतस्तस्य गर्भो जज्ञे महाद्युतिः हैडंबराक्षसव्याघ्रा बालसूर्यसमप्रभः स जातमात्रो वव
धे क्षणाद्यौवनगोऽभवत् नीलमेघचयप्रख्यो घटास्यो दीप्तलोचनः ऊर्ध्वकेशश्चोर्ध्वरोमा पितरौ प्रणतोऽब्रवीत्

स्कं॰पु॰ प्रणमामि युवां वीरौ जातस्य पितरौ गुरू भवतोर्हि प्रियं कृत्वा अनृणः स्यां सदा भवेत भवद्भ्यां
दत्तमिच्छामि अभिधानं तथात्मनः अतः परं च यच्छ्रेयः कर्तव्यं प्रोच्यतामिदं ततो भीमः समालिंग्य
२२६ पुत्रं वचनमब्रवीत् बर्बराकारकेशत्वाद्बर्बरीकाभिधो महान् भविष्यसि महाबाहो कुलस्यानंद
वर्धनः श्रेयश्चैतत्परमं च दृष्टं प्रकीर्तितं च वक्तृविप्रमुखैः प्रक्ष्यावहे तद्यदुवंशनाथं गत्वा पुरीं
द्वारकां वासुदेवं इति स्कंदपुराणे कु॰ नवपंचशोऽध्यायः सूत उ॰ ततो घटोत्कचो मुक्त्वा
तत्र कामकटंकटां पुत्रेणानुगतो धीमान्नियतो द्वारकां ययौ आगच्छंतं च तं दृष्ट्वा राक्षसं राक्षसा
नुगं द्वारकावासिनो योधाश्च क्रूरमुल्बणं रवं यामे यामे सुसंनद्धा तवलक्षमितास्तथा राक्षसो
द्वौ समायातौ पाल्यतां धावितारौ स्थिति तान्नाहतानायुधान्दृष्ट्वा यदुधीरान्घटोत्कचः प्रगृह्य विपुलं
बाहुं जगौ तारस्वरेण सः राक्षसं वित्त मां वीरा भीमपुत्रं घटोत्कचं सुप्रियं वासुदेवस्य प्रणामार्थ
मुपागतं निवेदयत मां प्राप्तं यादवेंद्राय सात्वतं इति तस्य वचः श्रुत्वा ते कृष्णाय न्यवेदयन् आ २२६
हृद्य च सभास्थान्य शीघ्रमात्राज्ञसौ ततः प्रवेशयामासु द्वारकां ते घटोत्कचं स पुत्रोऽत्र परिम्या

णि वनान्युपवनानि च क्रीडाशैलांश्च हर्म्याणि संपश्यन्नागतः सभां स तत्र उग्रसेनं च वसुदेवं च सा
त्यकिं अक्रूररामप्रमुखान्सर्वान्देवं कृष्णमेव च तं पादयोर्निपतितं समालिंग्य सहात्मजं सान्निध्ये
स्वसमीपस्थमुपवेश्येदमब्रवीत् पुत्र राक्षसशार्दूल कुरूणां कुलवर्धन कुशलं सर्वतः कच्चित् कि
मर्थस्ते समागमः घटोत्कच उ॰ देव युष्मत्प्रसादेन सर्वतः कुशलं मम श्रूयतां कारणं स्वामिन्
यदर्थमहमागतः देवोपदिष्टभार्यायां जातोऽयं तनयो मम स च प्रश्नं प्रवक्ष्यामि श्रूयतामागत
स्त्वतः श्रीभगवानुवाच वत्स मोर्वेय ब्रूहि त्वं सर्वं पृच्छ यदिच्छसि यथा घटोत्कचो मह्यं सुप्रियश्च
तथा भवान् बर्बरीक उ॰ प्रणम्य त्वामादिदेवं मनोबुद्धिसमाधिभिः वक्ष्यामि केन श्रेयं स्याज्जंतो
जातस्य माधव केचिच्छ्रेयो धर्ममाहुरैश्वर्यं त्यागभाजनं केचिदमंततो द्रव्यं भोगान्मुक्तिं च केच
न तदेवं शतसंख्येषु श्रेयस्सु पुरुषोत्तम ममचैवं कुलस्यास्य श्रेयो यद्ब्रूहि निश्चितं श्रीभगवान्॰
वत्स पृथक्पृथक्प्रोक्तं वर्णानां श्रेय उत्तमं ब्राह्मणानां तपोमूलं दमोऽध्ययनमेव च धर्मप्रकटनं
चापि श्रेय युक्तं मनीषिभिः बलं साध्यं पूर्वमेव क्षत्रियाणां प्रकीर्तितं दुष्टानां शासनं चापि साधूनां

स्कं॰पु॰२ परिपालनं पाशुपाल्यं च वैश्यानां कृषिर्विज्ञानमेव च शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणीभवेत् त्रि
स्त्रियो वा विविधैर्जीवेद्द्विजातिहितमाचरेत् भार्यारतिर्मत्सरपाष्टाशुचिश्चाद्यपरायणः नमस्कारेण मंत्रेण पंच
२२० यज्ञान्नहापयेत् सद्भावाक्षत्रियकुले जातोसि कुरु तच्छृणु बलं साधय पूर्वं त्वमतुलं तेननिक्षेय दुष्टानाम्य
पसाधश्च स्वर्गमेवमवाप्स्यसि बलं च लभते पुत्र देवीनां सुप्रसादतः तद्भवान्बलप्राप्त्यर्थं देव्याराधन
माचरेत् बर्बरीक उ॰ कस्मिन्क्षेत्रे च कां देवीं कथमाराधयाम्यहं एतत्प्रसादप्रवणं मनः कृत्वा प्रकर्त्त
व्य स्तत उ॰ इति पृष्टः क्षणं ध्यात्वा प्राह दामोदरो विभुः वत्स क्षेत्रं प्रवक्ष्यामि यत्र तप्स्यसि तत्तपः गुप्तक्षे
त्रमिति ख्यातं महासागरसंगमे तत्र त्रिभुवने याश्च संति देव्यः पृथग्विधा नारदेन समानीतास्ताश्चैकत्वं
सुमहात्मना वत्सस्तत्रादिदेव्यन्नवदुर्गाश्च संति याः समाराधय तां गत्वा ताः सोमैक्यं हि दुर्लभं नित्यं
पूजयतां पुत्रपुष्पधूपविलेपनैः स्तुतिभिश्चोपहारैश्च यथा तुष्यंति तास्तव तुष्टास्तु देवी सुबलं धनं च की
र्तिं च पुष्यासुभगाश्च दाराः स्वर्गस्तथामुक्तिपं च पुत्र न दुर्लभं सत्यमेतत्तवोक्तं एवमुक्त्वा बर्बरीकं कृष्णः प्रा २२०
हर्घटोत्कचं घटोत्कचार्य पुत्रास्ते ह्रदं सुहृदयोह्यसौ तस्मात्सुहृदयेत्येवं दत्तं नाम मया द्विजं एवमुक्त्वा समा

लिंग्य संतर्प्य विविधैर्धनैः गुप्तक्षेत्राय भगवान्बर्बरीकं समादिशत् सोथ कृष्णं नमस्कृत्य पितरं यादवांश्च
तान् अनुज्ञाप्य च तान्सर्वान्गुप्तक्षेत्रं समाव्रजत् घटोत्कचोपि कृष्णेन विसृष्टः स्ववनं ययौ स्मरन्पुण्यान्पत्न्या
स्वं राज्यं समपालयत् ततः सुहृदयो धीमान् दग्धसृष्टस्वकृताश्रमः त्रिकालं पूजयामास देव्याः कर्मसमा
धिभिः नित्यं पुष्पैश्च धूपैश्च उपहारैः पृथग्विधैः तस्याधरायतो देव्यास्तुतुष्टुहायनैस्त्रिभिः ततः प्रत्यक्षतां प्र
त्वा बलं तस्य महात्मनः बलं यत्त्रिषु लोकेषु कस्यचिन्नास्ति दुर्लभं उचुश्च कंचित्कालं त्वं वसात्र त्वं महाद्युते सं
गत्वा विजयस्य त्वं भूयः श्रेयो ह्यवाप्स्यसि इत्युक्तः सर्वदेवीभिः स तत्रैव व्यवस्थितः आगमोंगोथा विज्ञेया
नाम्ना मागधब्राह्मणः सप्त वा पृथिवीं कृत्वा पादाक्रांतां द्विजोत्तमाः काश्यां विद्याबलं प्राप्य साधनार्थमुपायियो
गुह्येश्वरसुरवान्येषु सप्तलिंगानि पूजन आराधयामास चिरं देव्यो विद्याफलाप्तये ततस्तुष्टास्तस्य देव्यः स्व
प्नेप्राहुरिदं वचः विद्यां साधय त्वं साधो सिद्धमातुः पुरोगणे अयं मत्कः सुहृदयः साहाय्यं ते करिष्यति तत
स्तद्वचनं श्रुत्वा विजयः स्वप्नमध्यतः उत्थाय नत्वा देव्यस्तं चक्रे भीमात्मजात्मजं सोपि देवीवचः श्रुत्वा मे
ने काहाय्यकारणं ततः कृष्णचतुर्दश्यामुपोष्य विजयः शुचिः स्नात्वाभ्यर्च्य लिंगानि देव्याश्चैवार्चयेत्तथक

स्कं॰पु॰२ कृत्वा स्नानमुपोष्यैव बर्बरिकां तिकमयत् प्रथमायां ततो रात्रौ यथा सिद्धांबिकापुरः मंडलं तत्र
कृत्वा च भगाकारं करान्नव अष्टदिक्षष्टकोलं च निखन्यैव ससूत्रकान् कृष्णाजीनधरो भूत्वा बर्ब
२.२८ रीकसमन्वितः शिखामाबध्य दिग्बंधं कृत्वारेभे ततो विधिं मध्ये वै मंडलस्यापि कुंडं शुभ्रं त्रिमेख
